THE

PRINCESS OF WALES

SARASVATĪ BHAVANA TEXTS

No. 69

PART III

THE

SAMKṢEPA ŚĀRĪRAKA

WITH

TATTVABODHINĪ

PART III

GOVERNMENT SANSKRIT LIBRARY,

BENARES.

212

Rs. 1-8-0.

Saleable at half of the printed price.

1132

KAN / SHA

Sanskrit Mahavidyalaya * BVB Sri Sankaracharya
149

212

THE

PRINCESS OF WALES

SARASVATĪ BHAVANA TEXTS

No. 69

PART III

EDITED BY

DR. MANGAL DEVA SHASTRI,

M. A., D. PHIL. (OXON.)

THE

SAMKṢEPA ŚĀRĪRAKA

WITH

TATTVABODHINĪ

PART III

Published by

The Superintendent, Printing and Stationery,

Government Press, Allahabad.

1938

Saleable at half of the printed price.

Printed by Ali Bukhsh at the
Royal Printing Works, Godowlia, Benares City.

संक्षेपशारीरकम्

श्रीमत्सर्वज्ञमुनिविरचितम्

श्रीमन्नृसिंहाश्रमविरचितया तत्त्वबोधिन्याख्यया
टीकया सहितम्

वाराणसेयराजकीयसंस्कृतमहाविद्यालयन्यायशास्त्राध्यापकेन
न्यायव्याकरणाचार्य मीमांसाशिरोमण्युपाधिकेन
श्रीसूर्यनारायणशर्मशुक्लेन संशोधितम्

(तृतीयो भागः)

THE

SAMKṢEPA ŚĀRĪRAKA

OF SARVAJÑĀTMA MUNI

WITH

TATTVABODHINĪ

OF NṚSIṂHA ĀŚRAMA

EDITED BY

SŪRYA NĀRĀYAṆA ŚUKLA,

NYĀYA VYĀKARAṆĀCHĀRYA,

Professor, Govt. Sanskrit College, Benares

1938

Bharatiya Vidya Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya
149

Bharatiya Vidya Bhavan's Sri Sankaracharya Vidyalaya
149

* ॐ श्रीगणेशाय नमः *

सटीकसंक्षेपशारीरकस्य

द्वितीयोध्यायः ।

—:○*○:—

प्रत्यक्षादिपराक्प्रमाणमखिलं प्राचीनवाचां वचः
प्रत्यङ्मात्रमितिप्रसूतिकरणं प्रक्षीणदोषं परम् ॥
बाधित्वापरिमुष्टभेदनिचये यस्मिन्ययौ मानतां
तं वन्दे परिवर्जितावधिसुखं लक्ष्मीनृसिंहं हरिम् ॥

एवं सर्वेषां वेदान्तानां सच्चिदानन्देऽखण्डैकरसे ब्रह्मणि समन्वय उपदर्शितः । इदानीमुपदर्शितमेव समन्वयं प्रत्यक्षादिविरोधपरिहारेण स्थूणानिखनन्यायेन दृढीकर्त्तुमाक्षिपति—

एवं समन्वयनिरूपणयावबोधो
जातोऽप्यखण्डविषयो ननु वाक्यजन्यः ।
मानान्तरेण परिपीडित एव जातो
भेदप्रकाशनकृताऽक्षनिबन्धनेन ॥ १ ॥

एवं समन्वयेति । एवं प्रथमाध्यायोक्तप्रकारेण निरूपणा विचारः अखण्डविषयोऽखण्डात्मविषयः नन्विति चोद्ये मानान्तरेण प्रमाणान्तरेण परिपीडितः बाधितः मानान्तरस्याद्वैतज्ञानबाधकत्वे हेतुमाह—भेदेति । भेदप्रकाशनकृता भेदप्रकाशकेन भेदविषयेणेति वा अक्षनिबन्ध-

नेन चक्षुरादिजन्येन समन्वयाध्याये हि सर्वेषां वेदान्तानामद्वितीये ब्रह्मणि समन्वय उपपादितः स चानुपपन्नः भेदग्राहिप्रत्यक्षादिविरोधादित्यर्थः ॥ १ ॥

ननु तत्पराद्वेदान्तात्प्रत्यक्षादेरेव किमिति बाधो न भवेत्तत्राह—

मज्जत्यलाबु सहसाऽप्सु शिलाः प्लवन्त
इत्यादिकादभिहितादिव वाक्यजातात् ।
जाताऽपि बुद्धिरपबाधितगोचरैव-
मद्वैतबुद्धिरपि भेदधियाऽऽत्मनि स्यात् ॥२॥

मज्जतीति । निमज्जति सहसा झटिति अभिहितात् उक्तात् अपबाधितगोचरा बाधितविषया एवमलाबु मज्जतीत्यादिवाक्यीयज्ञानवत् भेदधिया प्रत्यक्षादिजन्यभेदज्ञानेनापबाधितगोचरेत्यनुषज्यते । आत्मनि आत्मविषये इदं चाद्वैतबुद्धिरित्यत्र सम्बध्यते । अद्वितीयात्मबुद्धिरित्यर्थः । यथा हि लोके शिलाः प्लवन्त इत्यादिवाक्यं प्रत्यक्षादिबाधितविषयं सदतत्परमेव एवमात्मनः सजातीयादिभेदशून्यताप्रतिपादकैकमेवाद्वितीयमित्यादिवाक्यमपि प्रत्यक्षादिविरोधे तत्परमेव न भवति अतस्तेन प्रत्यक्षादिबाधो न भवतीत्यर्थः ॥ २ ॥

एवं तत्पदार्थसमन्वितवाक्यानां प्रत्यक्षादिबाधकमुक्त्वा त्वंपदार्थसमन्वितवाक्यानामपि तमाह—

अध्यक्षगोचरमनर्थमवैमि वाक्यं
निर्मुक्तमाह मम रूपमनर्थहेतोः ।

एवं च वेदशिरसोऽक्षनिबन्धनेन
ज्ञानेन बाधनमतीव हि दुर्निवारम् ॥ ३ ॥

अध्यक्षेति । ननु 'अत्राह सद्वयमिदं मम रूपमीक्ष' [अ. १ श्लो. ६५] इत्यादिनायं गतार्थ इति चेन्न अर्थभेदसत्त्वात् । तत्र हि प्रत्यक्षादेर्मिथ्याविषयत्वमङ्गीकृत्य लक्षणया वाक्यार्थविरोधः परिहृतः । अत्र तु प्रत्यक्षादेर्मिथ्याविषयत्वमुपपादयितुमेव पदार्थसमन्वयविरोधः शङ्क्यत इति । अध्यक्षगोचरं प्रत्यक्षविषयं मम रूपमित्यत्रापि सम्बध्यते । अनर्थमनर्थयुक्तमवैमि जानामि । वाक्यं योऽयं विज्ञानमय इत्यादिनिर्मुक्तं मुक्तमिदं चानर्थहेतोरित्यत्र सम्बध्यते अनर्थहेतुश्च कर्तृत्वादिः । एवं च एवं सति प्रत्यक्षविरुद्धार्थबोधकत्वे सतीत्यर्थः । अक्षनिबन्धनेन प्रत्यक्षजन्येन ज्ञानेन प्रमया बाधनं बाधः अतीवात्यन्तं हीति प्रसिद्धिः । अहं कर्त्ता दुःखीत्यादिप्रत्यक्षेण ममरूपमनर्थवातोपेतं पश्यामि । श्रुतिस्तु निर्मुक्तनिखिलबन्धनमावेदयति । तथा च कथं ज्ञानयोर्विरोधः । कथं वा प्रत्यक्षादिना वाक्यजन्यप्रमितेर्न बाध इत्यर्थः ॥ ३ ॥

न केवलमद्वैतात्मनि वाक्यसमन्वयस्य प्रत्यक्षादिबाधः किन्तु कर्मकाण्डबाधोपि तद्धि चेतत्फलोद्देशेन कर्म विदधत् आत्मनः कर्तृत्वं नियोज्यत्वमधिकारित्वं नियोज्यनियोगादेर्भेदं च विषयीकरोति । अयं तद्विपरीतमिति प्रामाण्यमेव दुर्लभमित्यभिप्रेत्याह—

कर्तृत्वमाह मम कर्मविधिर्नियोग-
सम्बन्धपूर्वकमपास्तसमस्तभेदम् ।
मामाह वेदशिरसो वचनं तथा च
सत्यस्य दुःस्थितमिवाऽऽपतति प्रमात्वम् ॥ ४ ॥

कर्तृत्वमिति । ननु कर्मविधिर्नियोगमेव प्रतिपादयति न कर्तृत्वं

सत्यं तदापि साक्षात्तदप्रतिपादकत्वेपि परम्परया तदपि प्रतिपादयति । अन्यथा प्रतीयमानस्य नियोगकृतिसाध्यत्वस्यानुपपत्तेरित्यभिप्रेत्याह—नियोगेति । नियोगनियोज्यविषयाणां सम्बन्धबोधनपूर्वकं नियोगस्य कृतिसाध्यतानिर्वाहाय तद्विषययागस्य कृतिसाध्यत्वाय नियोज्यस्य कर्तृत्वमपि बोधयतीत्यर्थः । फलितमाह—तथाचेति । तथा च सतीति छेदः । अस्य वेदशिरसः दुस्थितमिवापतति । अनुपपन्नमेव भवतीत्यर्थः । प्रमात्वं प्रामाण्यम् ॥ ४ ॥

ननु काण्डद्वयस्यापि 'तुल्यं हि साम्प्रदायिकम्'[जै. अ १ पा. २ सू. ८] इति प्रामाण्यस्य तुल्यत्वात् न कर्मकाण्डस्य वेदान्तबाधकत्वं नापि प्रत्यक्षादेर्वेदान्तबाधकत्वं स्वार्थप्रकाशकत्वस्योभयोरपि समत्वात् । न च ग्रावप्लवनादिवाक्यवत्प्रत्यक्षादिविरोधस्य दुर्बलतातत्परत्वग्राहकस्योपक्रमादेरत्र सत्त्वात् । तथा च कथं प्रत्यक्षादिभिर्वेदान्तबाधः कथं वा तस्याप्रामाण्यमित्याशङ्क्य यद्यपि प्रत्यक्षादेः प्रत्येकं समत्वात् वेदान्तबाधकत्वमनुपपन्नं तथापि परस्परसाहित्येन तद्बाधकत्वमुपपद्यते । दृश्यते हि समयोरपि राज्ञोरन्यसाहाय्यतदभावाभ्यां जयाजयव्यवस्थेत्यभिप्रेत्याह—

प्रत्यक्षकर्मवचसोरुभयोः समूहः
सामर्थ्यवानुपनिषद्विषयापहारे ।
एकैकमेव तु न पारयतेऽपहर्तुं
स्वार्थप्रकाशनविधावुभयोः समत्वात् ॥ ५ ॥

प्रत्यक्षेति । प्रत्यक्षं चक्षुरादि कर्मवचः कर्मकाण्डवाक्यं तयोः समूहो मेलनं प्रत्यक्षादिमिलितान्यतरदित्यर्थः । सामर्थ्यवान् समर्थः । उपनिषद्विषयापहारे उपनिषत्प्रमेयाद्वैतबाधने एकैकं प्रत्यक्षादि प्रत्येकं

न पारयते न समर्थम् । अपहर्त्तुमुपनिषद्विषयमिति शेषः । तत्र हेतुः—स्वार्थेति । स्वार्थप्रकाशनमुभयोः प्रत्यक्षाद्यन्यतमवेदान्तयोः ॥५॥

ननु प्रमाणानां प्रामाण्यबलेन बाधकत्वं वक्तव्यं तत्र यदि कर्मकाण्डस्यापौरुषेयवेदत्वेन प्रमाण्यं तद्वेदान्तानामपि तुल्यं यदि प्रत्यक्षादिसाहित्येन तर्हि परतः प्रामाण्यप्रसङ्गः तथा च कथं परस्परसाहित्येनाप्युभयोर्वेदान्तबाधकत्वं मित्याशङ्क्य पक्षान्तरमाह—

ज्यैष्ठ्यात्समर्थमथ वाऽक्षजमेकमेव
तस्यैव कर्म विधिरस्तु सहायभूतः ।
प्रत्यक्षमेव विधिवाक्यसहायमेवं
ब्रह्मात्मवस्त्वपहरिष्यति को विरोधः ॥६॥

ज्यैष्ठ्यादिति । उपजीव्यतया प्रथमप्रवृत्तत्वात् समर्थमुपनिषद्विषयापहारे इत्यनुषङ्गः । अक्षजं प्रत्यक्षजन्यप्रपञ्चभेदग्राहिप्रमा । आगमस्य व्युत्पत्तौ सिद्धौ चोपजीव्यतया तस्य प्रबलत्वात्प्रत्यक्षमेकमेव वेदान्तागमं बाधत इत्यर्थः । ननु ज्येष्ठत्वेप्युपजीव्यसजातीयत्वेपि यथा शुक्तिरजतप्रत्यक्षस्य नेदं रजतमित्यागमबाध्यत्वं तद्वदत्रापि किं न स्यादिति चेन्न । बलवद्धि वस्तु दुर्बलं बाधते ज्ञानस्य च बलवत्त्वमनन्यथासिद्धत्वम् । न च शुक्तिरजतज्ञानमन्यथासिद्धं तस्य भ्रान्तत्वात् । न चेदं प्रपञ्चभेदग्राहिप्रत्यक्षं तथा बाधकाभावात् । न च कालान्तरे बाधशङ्का भविष्यतीति वाच्यम् । तस्या अपि भेदग्राहिकर्मश्रुतिसम्वादेन निरस्तत्वात् । तथा च प्रत्यक्षस्य वेदान्तबाधने कर्मविधिः साहाय्यमाचरति इत्याह—तस्यैव इति । तस्य प्रत्यक्षस्य फलितमुपसंहरति—प्रत्यक्षमेवेति । न विधिवाक्यमित्यर्थः । विधिवाक्यसहायमिति बहुव्रीहिः । एवं सति प्रत्यक्षस्यैकस्यैव वेदान्तबाधकत्वं विधिवाक्यं तु

प्रत्यक्षसाहाय्यमेव भजते न तु प्रत्यक्षसाहाय्येन वेदान्तं बाधतं इत्यङ्गीकारे को विरोधः । कर्मवाक्यस्य प्रत्यक्षसाहाय्येन वेदान्तबाधकत्वपक्षोक्तपरतः प्रमाण्यप्रसङ्गलक्षणसिद्धान्तविरोधः कः न कोपीत्यर्थः । अथवा यथा प्रत्यक्षमुपजीव्यतया बलवत् । एवं कर्मकाण्डमपितदुपजीव्यतया बलवदेव उपजीवति हि वेदान्तः कर्मकाण्डमपि स्वापेक्षिताधिकारिसिद्धये न हि कर्मकाण्डाधीनविशुद्धाशयमन्तरेण साधनसम्पत्तिरवतरति । न च साधनचतुष्टयसम्पत्तिं विना वेदान्तः प्रवर्तितुमर्हति । तथा च कर्मकाण्डमपि भेदविषयमुपजीव्यं बलवद्बाधकमेव तत्र च प्रत्यक्षं विधिबोधितव्रीहिपुरोडाशाद्यंशे बाधशङ्कानिरासद्वारा सहायभावं भजते । न च विरोधः । विधिवाक्यस्यैकस्यैवोपजीव्यतया बाधकत्वाङ्गीकारात् । प्रत्यक्षादिसाहित्येन प्रामाण्यातिशयेन बाधकत्वानङ्गीकारादित्यभिप्रेत्याह—प्रत्यक्षमेवेति । अथवेत्यनुषङ्गनीयम् । अस्मिन्पक्षे विधिवाक्यसहाय इति पाठः । षष्ठीतत्पुरुषश्च द्रष्टव्यः । प्रत्यक्षस्य विधिवाक्यसहायतामात्रमेव बाधकत्वं तु विधिवाक्यस्यैवेत्यर्थः । तस्मादुपजीव्यप्रत्यक्षादिविसंवादाद्गर्हितः समन्वयोऽनुपपन्न इति भावः ॥ ६ ॥

अत्रायं विद्वदपसदः प्रष्टव्यः कथं वेदान्तानां प्रत्यक्षादिविसंवाद इति । किं प्रत्यक्षाद्यनवगतवस्तुविषयत्वात् । किं वा प्रत्यक्षादिसिद्धार्थाभावविषयत्वात् । नाद्यः । तथात्वे कर्मकाण्डस्यापि प्रत्यक्षादिविसंवादेन तत्प्रतिपादिताग्निहोत्रादेरप्ययथार्थत्वप्रसङ्गात् न हि तत्प्रमेयो धर्मः प्रत्यक्षविषयः । ननु धर्मस्य कार्यतया मानान्तराविषयत्वं भूषणमेव । ब्रह्मणस्तु न तथा सिद्धवस्तुनो मानान्तरयोग्यत्वनियमात् । तथा च तद्गोचरत्वादेव तद्विसंवाद इतिचेत्किं कार्यमात्रस्य मानान्तरायोग्यत्वं भूषणमित्युच्यते किं वा कार्यविशेषस्य चेत्तर्हि प्रकृतेपि सिद्धवस्तुविशेषस्य ब्रह्मणो मानान्तरायोग्यत्वं भूषणमेव । तथा च कथं तद्विसंवादः । न द्वितीयः । तदभावात् । तथा हि किं प्रत्यक्षेण

घटादिसत्तामात्रं प्रतीयते। किं वा तस्य वास्तवत्वमपि। आद्ये न तस्य घटादिपारमार्थिकत्वनिषेधकवाक्यविरोधः। न हि घटस्य प्रलयकाले अभावसाधकमनुमानमिदानीं तत्सत्ताग्राहकप्रत्यक्षेण विरुध्यते तत्कस्य हेतोः तयोर्भिन्नविषयत्वादिति चेन्न घटस्यैकत्वात् ननु घटस्यैकत्वेपि कालावच्छेदभेदेन तद्विषयज्ञानयोर्विषयभेद इति चेत्तर्हि प्रकृतेपि घटसत्तामात्रावगाहिप्रत्यक्षेण घटपारमार्थिकत्वनिषेधकश्रुतिमस्तकवाक्यस्य भिन्नविषयतया न विरोधः। द्वितीये किमिदं वास्तवत्वमबाधितज्ञानविषयत्वमिति चेत् किमागमव्यतिरिक्तप्रमाणबाधितज्ञानविषयत्वं किं वा सर्वप्रमाणबाधितज्ञानविषयत्वम्। नाद्यः। नरशिरः कपालशुचित्वादेरपि तादृशज्ञानविषयत्वेन यथार्थत्वप्रसङ्गात्। न द्वितीयः। घटादेरपि नेह नानेतिश्रुत्या बाधितत्वात्। नन्वागमस्यैतद्बाध्यस्यैतद्बाधकत्वमनुपपन्नमिति चेन्न-प्रत्यक्षस्य यथार्थविषयत्वसिद्धेः प्राक्तद्बाधकत्वानुपपत्तेः। त्रैकालिकबाधाभावघटितसत्त्वस्य वर्त्तमानमात्रग्राहिप्रत्यक्षेण ग्रहीतुमशक्यत्वाच्च। ननु सदिति प्रतीयमानत्वं तदिति चेन्न—शुक्तिरजतसंसर्गस्यापि यथार्थत्वप्रसङ्गात्। ननु सदिति प्रमीयमाणत्वं तदिति चेन्न—प्रमाया विषयसद्भावघटितत्वेनान्योन्याश्रयप्रसङ्गात्। ननु सत्ताश्रयत्वं तदिति चेन्न—सत्तादेरयथार्थत्वप्रसङ्गात्। नन्वर्थक्रियाकारित्वं तदिति चेन्न—अर्थक्रियाविरहदशायामसत्वप्रसङ्गात्। ननु यत्किञ्चिदर्थक्रियाकारित्वं सर्वदा सर्वेषामस्तीति चेन्न—एवमप्यर्थक्रियायामर्थक्रियासंभवेनासत्वे तद्घटितवस्तुसत्ताया अप्यसत्वप्रसङ्गादर्थक्रियाया अर्थक्रियाङ्गीकारेऽनवस्थानाद् घटदेर्वस्तुभूतत्वे विनाशानुपपत्तेश्च। परमार्थसतश्च विनाश इति व्याहतं वचनं तस्मात्प्रत्यक्षादेर्घटादिमात्रविषयत्वेन तत्त्ववेदकत्वाभावात्। एवमेव कर्मकाण्डस्यापि कार्यमात्रपरत्वेन न स्वातन्त्र्येण नियोज्यादिभेदपरत्वाभावात्। तत्परत्वे च वाक्यभेदप्रसङ्गात्। वास्तवभेदं विनानुपपत्त्यभावाच्च। न प्रपञ्च-

पारमार्थिकत्वनिषेधकनेतीत्यादिवाक्यस्य ताभ्यां विरोध इत्येतद्धृदि निधाय परिहारमाह—

अत्रोच्यते न खलु वेदशिरांसि मुक्ता
किञ्चित्प्रमाणमिह तत्त्वनिवेदनाय ।
शक्नोति येन भवतीह विरोधशङ्का
वेदान्तवाक्यमुखतोऽवगते प्रतीचि ॥ ७ ॥

अत्रोच्यतइति । अत्रास्मिँश्चोद्ये उच्यते परिहार इति शेषः । तत्त्वं वास्तवस्वरूपं तन्निवेदनं तत्प्रकाशनं येनेत्यस्यायमर्थः । यदि प्रत्यक्षादेः प्रपञ्चपारमार्थिकत्वबोधकत्वं स्यात्तदा वेदान्तस्य तद्विरोधो भवेत् तस्य प्रपञ्चाभावबोधकत्वात् वेदान्तावगतेऽद्वितीये ब्रह्मणि च मानान्तरबाधः स्यात्तद्विरुद्धत्वान्न त्वेदस्ति प्रत्यक्षादेर्वस्तुमात्रबोधकत्वादित्यर्थः । इहेत्यस्य प्रतीचि देहादिसाक्षिण्यद्वितीये प्रत्यगात्मनि ॥ ७ ॥

ननु प्रत्यक्षादिप्रामाण्यं सर्वादिसंमतं तत्त्वमितिजनकत्वं च प्रामाण्यं शुक्तिरजतज्ञानस्य प्रामाण्याप्रसिद्धेः । ततः कथं प्रत्यक्षादेस्तत्त्वनिवेदकत्वाभावः । कथं वाऽद्वैतागमस्य प्रत्यक्षादिविरोधपरिहार इत्याशङ्क्याह—

अज्ञातमर्थमवबोधयदेव मानं
तच्च प्रकाशकरणत्वमितीह भिज्ञाः ।
न प्रत्यगात्मविषयादपरस्य तच्च
मानस्य संभवति कस्यचिदत्र युक्त्या ॥८॥

अज्ञातमर्थमिति । तत्त्वप्रकाशकरणक्षमं तत्त्वप्रकाशजननसमर्थम- भिज्ञाः भट्टाचार्यादय आहुरिति शेष- । प्रत्यगात्मविषयादिति बहु- व्रीहिः मानादितिशेषः । तदज्ञातार्थबोधकत्वम् । अत्र परीक्षाभूमौ भट्टाचार्यादयो ह्यनधिगतार्थगन्तृ प्रमाणमिति प्रमाणलक्षणं वदन्ति । अनधिगतत्वं चाज्ञातत्वं तादृशार्थबोधकत्वं चात्मविषयप्रमाणस्यैव संभवति । आत्मन एवाज्ञातत्वात् । घटादेश्च स्वत एव जडतयाऽज्ञा- नावृतत्वलक्षणाज्ञातत्वाभावात् । ननु घटादेः स्वतोज्ञातत्वाभावेप्य- ज्ञातचैतन्याच्छेदकत्वं नाज्ञातत्वमपि वक्तव्यम्, अन्यथा—स्वतो जडस्यापि घटादेः स्वप्रकाशात्मसम्बन्धेन नित्यवत् प्रकाशप्रसङ्गादिति चेन्न—घटाद्यप्रक शस्य तदधिष्ठानावरणेन वा आगन्तुकप्रमाणवैक- ल्येन वोपपत्तेः । तथा च घटादिगोचरप्रत्यक्षादेः प्रमितिजनकत्वेन प्रामाण्येप्यज्ञातार्थविषयप्रमितिजनकत्वासंभवात् न तत्त्वावबोधनलक्ष- णप्रामाण्यमित्यर्थः । एतदेवाभिप्रेत्य युक्तयेत्युक्तम् ॥ ८ ॥

किं च घटादिवस्तुतत्त्वस्यानवच्छिन्नात्ममात्रत्वान्न तद्विषयत्वं चक्षुरादेरुपपद्यते । तस्य पराङ्मात्रविषयत्वात् 'पराञ्चि खानी'ति श्रुतेः अतोपि न तेषां तत्त्वावेदनलक्षणं प्रामाण्यमित्यभिप्रेत्याह—

सर्वं परागविषयमेव हि मानजातं
वेदावसानवचनानि तु वर्जयित्वा ।
यद्भौतिकं किमपि भौतिकगोचरं त-
द्रूपप्रदीपकनिदर्शनतः प्रसिद्धम् ॥ ९ ॥

सर्वं परागविषयमिति । परागविद्याकल्पितनामरूपात्मकः प्रपञ्चो विषयो यस्य मानजातस्य तत्तथोक्तं हि शब्दो यस्मादर्थे यस्मात्परागविषयं तस्मादज्ञातप्रत्यगात्मविषयं न भवतीत्यर्थः । मानजातं प्रमाणसमूहः जातग्रहणेन वेदान्तग्रहणं व्यावर्त्तयति—वेदावसानेति । अवसानमन्तः

वेदान्तव्यतिरिक्तप्रमाणस्य परार्थविषयत्वेऽनुमानं प्रमाणं विवक्षन् तन्मूलां व्याप्तिं सदृष्टान्तामाह—यद्भौतिकमिति । भौतिकं भूतजन्यद्रव्यमित्यर्थः । प्रकाशकमित्यपि द्रष्टव्यम् । भौतिकगोचरं भूतजन्यद्रव्यतद्धर्ममात्रविषयं प्रदीपकः प्रदीपः रूपप्रकाशकप्रदीपदृष्टान्तादित्यर्थः । अत्रेदमनुमानं विवक्षितम् । चक्षुरादि भौतिकमात्रप्रकाशकं प्रकाशकभौतिकत्वात् प्रदीपवदिति । तथाच घटादिवस्तुतत्त्वानवच्छिन्नात्ममात्रत्वेनाभौतिकत्वात् न चक्षुरादीनां तद्विषयत्वमित्यर्थः ॥ ९ ॥

इदानीं प्रकारान्तरेणापि चक्षुरादेर्घटादितत्त्वाविषयत्वं साधयति—

यद् व्यञ्जकं किमपि लौकिकमीक्षितं त-
द्व्यङ्ग्येन तुल्यमवलोकितमत्र जात्या ।
दीपः प्रकाशकतया विदितो हि लोके
रूपेण तैजसतया सदृशः प्रसिद्धः ॥ १० ॥

यद्व्यञ्जकमिति । व्यञ्जकं प्रकाशकारणं तद्व्यञ्जकं व्यङ्ग्येन प्रकाश्येन तुल्यं समानम् । अत्र जगति केनाकारेण साम्यमित्याकाङ्क्षायामाह—जात्येति । भौतिकत्वादिधर्मेणेत्यर्थः । दृष्टान्तस्य साधनवैकल्यं परिहरति—प्रकाशकतया विदित इति । तमोनिवृत्तिरूपप्रकाशकतया विदित इत्यर्थः । साध्यवैकल्यं परिहरति—रूपेणेति । केनाकारेण साम्यमित्याशङ्क्याह—तैजसेति । तेजोजन्यत्वादिनेत्यर्थः । अथवा—बाह्येन्द्रियाणां स्वसमानगुणव्यञ्जकत्वाद्गुणेनापि साम्यं विवक्षन्नाह—रूपेणेति । गन्धसमवायादेरप्युपलक्षणम् । अत्रेदमनुमानं चक्षुरादिस्वसमानधर्मवत एव व्यञ्जकं व्यञ्जकत्वात् बहिरिन्द्रियत्वाद्वा रूपादिव्यञ्जकदीपादिवत् । व्यञ्जकपदमत्र प्रकाशकरणपरम् । अतो न बुद्धौ व्यभिचारः ।

BVBSSMV

नचैवं सत्यात्मनोपि कल्पितधर्माश्रयत्वेन द्रव्यत्वादिना चक्षुरादि-समानधर्मकत्वात्तद्विषयत्वापत्तिरिति वाच्यम् । धर्मिसमानसत्ताक-धर्मेणैव समानधर्मत्वस्य विवक्षितत्वात् । न च वेदान्ते व्यभिचारः । तस्याभिव्यक्तिरूपे आत्मन्यभिव्यक्तयजनकत्वात्तथा च घटादितत्वस्या-त्मनश्चक्षुरादिसमानधर्मकत्वाभावात् न चक्षुरादेस्तद्विषयत्वं किन्तु केवलघटादिविषयत्वमतःप्रत्यक्षादेस्तत्वावेदनलक्षणप्रामाण्यासंभवात् न तेन वेदान्तविरोध इति भावः ॥ १० ॥

एवं बहिरिन्द्रियस्य घटादितत्वाविषयत्वं साधयित्वा अन्त-रिन्द्रियस्यापि तत्साधयति—

बुद्धिः समस्तविषयावगमे प्रवृत्ता
साऽपि प्रकाश्यविषयेण समानजातिः ।
बुद्धिश्च भौतिकतया श्रुतिषु प्रसिद्धा
तेनास्तु साऽपि खलु भौतिकगोचरैव ॥११॥

बुद्धिरिति । वेदान्तासहकृतान्तःकरणं बुद्धिपदेन विवक्षितम् । अन्यथा—तत्सहकृद्बुद्धेरात्मगोचरत्वेन भौतिकमात्रगोचरत्वसाधने चांशतो बाधप्रसङ्गात् । समस्तविषयावगमे प्रवृत्ता बाह्यसर्वपदार्थ-ज्ञाने प्रवृत्ता आत्मव्यतिरिक्तसकलपदार्थप्रकाशिकेत्यर्थः । सा तादृशी बुद्धिः प्रकाश्यविषयेण प्रकाश्यपदार्थेन समानजातिरिति-बहुव्रीहिः । समानधर्मिकेत्यर्थः । समानधर्मत्वं च भौतिकत्वादिना विवक्षितम् । अत्रेदमनुमानं वेदान्तासहकृतबुद्धिः स्वसमानधर्मवत एवापरोक्षतया प्रकाशिका वेदान्तासहकृतत्वे सति प्रकाशकद्रव्यत्वा-द्दीपवदिति ॥ ११ ॥

एवं प्रत्यक्षस्य घटादितत्त्वात्मविषयत्वं निराकृत्य तदुपजीव्या-

नुमानादेरपि तद्विषयत्वं नास्तीत्याह—

एवं प्रमाणमखिलं बहिरर्थनिष्ठं
वेदान्तवाक्यमपहाय यथोक्तहेतोः ।
न प्रत्यगात्मविषयं श्रुतिरप्युवाच
स्पष्टं पराञ्चि वचसाऽर्थमिमं यथोक्तम् ॥१२॥

एवमिति । प्रत्यक्षवत्प्रमाणमनुमानादिबहिरर्थनिष्ठं घटादिमात्रविषयं न तु तत्त्वात्मविषयम् । अखिलग्रहणेन वेदान्तग्रहणं वारयति-वेदान्तवाक्यमपहायेति । मयोक्तहेतोर्भौतिकत्वे सति व्यञ्जकत्वादित्याद्युक्तहेतोः प्रत्यगात्मशब्देन घटादितत्त्वात्मोच्यते । अत्रेदमनुमानं विमातान्यनुमानादीनि भूतभौतिकमात्रविषयाणि भौतिकत्वे सति परोक्षतया व्यञ्जकत्वात् तादृशबुद्धिवत् । यद्वा—'अत्रोच्यते न खलु' 'अज्ञातमर्थम्' इति [अ. २ श्लो ७-८] श्लोकद्वयेन घटादिविषयप्रत्यक्षादेस्तत्त्ववेदनप्रमाणत्वाभावात् न तेन तत्पदार्थब्रह्मणोऽद्वितीयताबोधकवेदान्तानां विरोध इत्युक्तम् । 'सर्वं पराञ्चिषयम्'इत्यादिना [अ. २ श्लो. ६] तु कर्तृत्वादिगोचरप्रत्यक्षादीनामात्मविषयत्वाभावान्न तद्बलेन त्वंपदार्थप्रत्यगात्मनः कर्तृत्वादिसिद्धिरिति न तस्य नित्यमुक्तताद्यावेदकश्रुतिविरोध इत्युच्यत इति द्रष्टव्यम् । अत्र प्रत्यगात्मशब्दो जीवस्वरूपविषयः अन्यत्तु पूर्ववत् । प्रत्यक्षादीनामनात्ममात्रविषयत्वेन प्रत्यगात्माविषयत्वे श्रुतिरपि प्रमाणमित्याह-श्रुतेरिति । केन वाक्येनाहेत्यत्राह-पराञ्चि वचसेति । पराञ्चीत्यादिवाक्येन यथोक्तमुक्तमनतिक्रम्य यथा मया प्रत्यक्षादेर्बहिरर्थमात्रनिष्ठत्वेन प्रत्यगात्माविषयत्वं युक्त्योक्तं तथैव श्रुतिरप्याहेति तात्पर्यार्थः ॥ १२ ॥

तामेव श्रुतिमाह—

पराञ्चि खानि व्यतृणत्स्वयम्भू-
स्तस्मात्पराङ् पश्यति नान्तरात्मन् ।
कश्चिद्धीरः प्रत्यगात्मानमैक्ष-
दावृत्तचक्षुरमृतत्वमिच्छन् ॥ १३ ॥

पराञ्चि खानीति । पराञ्चि बहिरर्थविषयाणि खानि इन्द्रियाणि इदं च वेदान्तव्यतिरिक्तसर्वप्रमाणानामुपलक्षणम् न तु वेदान्तस्यात्मनो वेदान्तविषयत्वस्य तत्त्वौपनिषदमिति श्रुत्या प्रतिज्ञानात् व्यतृणद्धिंसितवान् । हिंसा च तेषां निखिलानर्थनिदानपराग्विषयत्वमेव । तस्मादविवेकी जनः पराक् अनात्मवस्त्वेवेन्द्रियादिभिः पश्यति । नान्तरात्मन्नान्तरात्मानं पश्यति । धीरः विवेकवैराग्यसंपन्नः । अत एवावृत्तचक्षुर्नियमितेन्द्रियः शान्त्यादिसम्पन्न इत्यर्थः । अत एवामृतत्वमिच्छन्मुमुक्षुः प्रत्यगात्मानं वेदान्तश्रवणादिना—ऐक्षत—ईक्षत इत्यर्थः ॥ १३ ॥

नन्वनुमानादेः परोक्षज्ञानैकजनकस्वभावत्वादात्मनि च व्याप्त्याद्यसंभवान्नित्यापरोक्षात्मविषयत्वाभावेपि चक्षुरादेर्वेदान्तानामिवापरोक्षज्ञानजनकत्वात्तादृशात्मविषयत्वं किं न स्यान्न भौतिकत्वादिना चक्षुरादेस्तद्विषयत्वप्रयोजकत्वादित्याशङ्क्याह—

यत् कर्मभावमनपास्य निजप्रमेये
संवित्तिसाधनतया जगति प्रसिद्धम् ।
मानं जडार्थविषयं तदिहाभ्युपेयं
न प्रत्यगात्मविषयं कथितोपपत्तेः ॥ १४ ॥

यत्कर्मभावमिति । यन्मानमिति सम्बन्धः । कर्मभावं कर्मत्वमनिरा-

र्यानपोह्य स्वविषये प्रमेये संवित्तिसाधनतया प्रमितिसाधनतया इह जगति तन्मानं पुरोक्तहेतोः पूर्वोक्तानुमानात् । यद्धि मानं कर्मतयैव स्वविषयं बोधयति । तज्जडविषयमेव जडस्यैव ज्ञानक्रियाफलाश्रयत्वेन कर्मत्वान्नानवच्छिन्नप्रत्यगात्मविषयं तस्य स्वतः फलरूपत्वेन कर्मत्वासंभवाद् घटादिविषयं कर्त्रात्मविषयं च प्रत्यक्षं कर्मतयैव स्वविषयं बोधयति । घटादिसमवेताभिव्यक्तिरूपफलजनकत्वादत एवोक्तहेतोरपि नाप्रयोजकत्वम् । अतो न चक्षुरादिघटादितत्त्वं प्रत्यगात्मानं च विषयीकर्त्तुमलमित्यर्थः ॥ १४ ॥

तर्हि वेदान्तानामपि प्रमाणत्वाविशेषाच्चक्षुरादिवदात्मविषयत्वन्न स्यादित्याशङ्क्याह—

यत्तु प्रमाणमवधीर्य निजप्रमेये
कर्मत्वमर्थमवबोधयितुं प्रवृत्तम् ।
तत्प्रत्यगात्मविषयं भवितुं क्षमेत
तत्त्वमादिवचनं न ततोऽन्यदस्ति ॥ १५ ॥

यत्त्विति । अवधीर्य त्यक्त्वा कर्मत्वमन्तरेणेत्यर्थः । अर्थं निजप्रमेयं तत्तादृशं प्रमाणम् । नन्वकर्मतया स्वप्रमेयबोधकत्वमनुमानादीनामप्यस्ति तान्यपि किं प्रत्यगात्मविषयाणि नेत्याह—तत्त्वमादिवचनमिति । तत्प्रत्यगात्मविषयं प्रमाणमन्यदनुमानादि । यद्यप्यनुमानादिकमप्यकर्मतयैव स्वविषयं बोधयति । तथापि तस्य व्याप्त्यादिबलेनैव स्वप्रमेयावबोधकत्वात् अनवच्छिन्नानन्दे प्रत्यगात्मनि च कस्यापि व्याप्त्यादेरभावात् न तद्विषयत्वमनुमानादेः वेदान्तास्तु कथं चिल्लक्षणायाऽपरोक्षां वृत्तिमुत्पादयन्त्येव । ननु वेदान्तानामप्यपरोक्षवृत्तिजनकत्वेन च चक्षुरादिवत्कर्मतयैव स्वप्रमेयबोधकत्वं वक्तव्यम्, प्रत्यक्षविषयस्य कर्मत्वनियमात् । तथा च कथमात्मविषयत्वमिति

चेन्न—प्रत्यक्षविषयत्वस्याप्रयोजकत्वात् क्रियाजन्यफलभागित्वं हि कर्मत्वं तच्च चक्षुरादिप्रमेये जडे घटादौ संभवति । प्रमाणजन्यस्फुरणलक्षणफलभागित्वाद्वेदान्तप्रमेयस्य तु ब्रह्मणः सर्वप्रमाणफलभूततया फलितत्वाभावान्न कर्मत्वम् । तदुक्तं सुरेश्वराचार्यैः 'परागर्थप्रमेयेषु या फलत्वेन संमता । संवित्सैवेह मेयोऽर्थो वेदान्तोक्तिप्रमाणत' इति तथा च वेदान्तानां प्रमाणत्वाविशेषेऽप्यकर्मतयाऽपरोक्षबोधजनकत्वविशेषेण प्रत्यगात्मविषयत्वं संभवतीत्यर्थः । तथा च प्रत्यगात्मनः प्रत्यक्षाद्यविषयत्वान्न तेन घटादिकर्तृत्वाद्यवगाहिनात्मनो नित्यमुक्तत्वाद्वितीयत्वावेदकश्रुतिविरोध इति भावः ॥ १५ ॥

यदुक्तं घटादेरज्ञातत्वासंभवान्न तस्याज्ञातार्थग्राहकतत्वावेदनप्रमाणविषयतेति तदेवेदानीं घटादिविषयाज्ञाततायां मानाभावेन प्रपञ्चयति—

नाज्ञाततावगतिरस्ति जडेषु पूर्वं
मेयेषु तत्स्फुरणकारणवर्जितत्वात् ।
मानोदयान्न हि पुरा किमपीह मानं
नापि प्रमेयबलतो जडता हि तस्य ॥१६॥

नाज्ञाततेति । पूर्वं मानप्रवृत्तेः पूर्वं मानप्रवृत्तिदशायामज्ञाततायाएवासंभवात् । तदवगमस्तत्पूर्वमेव स्यादित्यभिप्रेत्य पूर्वमित्युक्तम् । अज्ञाततावगत्यभावे हेतुमाह—तत्स्फुरणकारणवर्जितत्वादिति । तस्याऽज्ञाततायाः यत्स्फुरणकारणमवगतिकारणं तस्याभावादित्यर्थः । ननु किमिति स्फुरणकारणाभाव इति चेत्तत्र वक्तव्यम् किं घटादिविषयप्रमाणेन तद्विषयाज्ञाततायाः स्फुरणमुतात्माज्ञाततावद्विषयवलेनैव नाद्य इत्याह—मानोदयादिति । प्रवर्त्तमानप्रमाणोदयात्किमपि प्रत्यक्षाद्यन्यतम-

दिहाज्ञाततायां मानं घटादिविषयं मानम्। अज्ञानं हि घटादिविशिष्टमेवानुभूयमानं तद्विषयप्रमाणेनैवानुभूयत इति वक्तव्यम्। तद्विषयप्रमाणप्रवृत्तिदशायाञ्चाज्ञानस्यैवाभावात्। तत्पूर्वं च प्रमाणप्रवृत्तेरेवाभावान्न कथमपि प्रमाणेनाज्ञाततासिद्धिरित्यर्थः। न द्वितीय इत्याह—नापीति। प्रमेयबलतः घटादिविषयबलात्तत्र हेतुः—जडतेति। हि यतस्तस्य घटादिप्रमेयस्य घटादेर्जडत्वान्न तेनाप्यज्ञाततासिद्धिरित्यर्थः॥ १६॥

नन्वज्ञाततायश्चक्षुरादिप्रत्यक्षप्रमाणगम्यत्वाभावेपि विमतं पूर्वमज्ञातमिदानीं ज्ञायमानत्वादित्यनुमानेन पूर्वकालीनाज्ञानस्यापि वेद्यत्वसंभवात् न तत्र प्रमाणाभाव इत्याशङ्कायां द्वितीयपक्षोक्तदूषणं विशदयन् निराकरोति—

नाज्ञाततावगतये स्वयमेव बाह्यं
मेयं समर्थमवबोधविलक्षणत्वात्।
नापि प्रमाणमवबोधकमस्ति किञ्चि-
न्मानोदयात्पुर इति स्फुटमभ्युपेयम्॥१७॥

नाज्ञाततावगतय इति। स्वयमेव समर्थं नेति सम्बन्धः। तत्र हेतुः—अवबोधविलक्षणत्वादिति। ज्ञानविलक्षत्वाज्जडत्वादिति यावत्। किञ्चिदनुमानमपि मानोदयात् प्रवर्त्तमानप्रमाणोदयात् पुरः पूर्वम्। न चोक्तानुमानं तत्साधकं-धरावाहिकविज्ञानगम्ये व्यभिचारात्। न च तत्रापि यदा कदाचित्पूर्वमज्ञातत्वमस्तीति वाच्यम्। तथापि शुक्तिरूप्यादौ व्यभिचारादिदानीमेवेति विशेषणे चान्योन्याश्रयादज्ञानासिद्धो हेतुः। मानान्तरं च तद्विषयं न पश्यामोत्यर्थः॥ १७॥

ननु माभून्मानप्रवृत्तेः पूर्वमज्ञाततावगमः अनवगम्यमानायामेव

तस्यां वस्तुनोऽज्ञातेषु घटादिषु मानप्रवृत्तिरस्तु तथा च मानविषयत्वानुपपत्तिरेव घटाद्यज्ञाततायां प्रमाणं भविष्यतीति चेत्तत्राह—

नाज्ञाततामनवगम्य पुरा प्रवेशा-
न्मानस्य किंचिदपि मानबलेन बोद्धुम् ।
शक्नोति कश्चिदपि मानबलेन बुद्धं
किं वा स्वभाव इति निश्चयहेत्वभावात् ॥१८॥

नाज्ञाततामिति । अनवगम्याज्ञात्वा मानसप्रवेशात् पुरेति सम्बन्धः । मानप्रवृत्तेः पूर्वमित्यर्थः । किञ्चिदपि किमपि प्रमेयं मानबलेन बोद्धुं प्रमाणबलेनैव ज्ञातुं तथा वा व्यवहर्त्तुमित्यर्थः । कश्चिदपि पुरुषः न शक्नोतीति सम्बन्धः । तत्र हेतुः—मानबलेत्यादि । बुद्धमवगतं वस्त्विति शेषः । स्वभावः प्रकाशोऽस्य वस्तुन इति शेषः । एतदुक्तं भवति लोके हीदमिदानीमनेन ज्ञातव्यमिति बुभुत्सया हि तत्तद्विषयं प्रमाणतोऽवगच्छन्तो दृश्यन्ते । बुभुत्सा च नात्यन्तमज्ञाते न वात्यन्तं ज्ञाते भवति तदसंभवात् । ननु सामान्यतो ज्ञाते विशेषतश्चाज्ञाते सा भवतीति चेत्तत्र यदि सामान्यं विशेषाद्भिन्नं तर्हि न तज्ज्ञानादपि विशेषबुभुत्सा तस्यात्यन्तमज्ञातत्वात् । यद्यभिन्नं तर्हि विशेषोपि ज्ञात एवेति सुतरान्न तत्र बुभुत्सा । ननु सर्वापि विषयावगतिर्न बुभुत्साधीना पथिकस्य तृणादिविषयोपेक्षाज्ञानस्यापि दर्शनादिति चेन्न । तत्रापि विषयविशेषबुभुत्साभावेपि सामान्यबुभुत्सायाः सत्त्वात्तस्मादज्ञाततया ज्ञात एव घटादौ बुभुत्सा वक्तव्या । तथा च पूर्वमज्ञाततावगमाभावे बुभुत्साया एवाभावात । प्रमाणप्रवृत्तेरप्यसंभवान्न कोपि विषयप्रतिपत्तौ समर्थो भवेत् । किं च लोके मयेदं प्रमाणतोऽवगतमिति व्यवहारो दृश्यते । इदं च प्रमाणप्रवृत्तेः पूर्वं वस्तुनः अज्ञाततयावगतत्व एव संभवति । अन्यथा—इदंप्रमाणेनावगतं किं वा

विषयस्वभावादिति विषयावगतेर्विषयस्वाभाविकत्वशङ्काया अपि दुरपह्नवत्वेन प्रमाणेनेति निश्चयानुपपत्तेः । ततो मानप्रवृत्त्यर्थं मानतो बुद्धमिति व्यवहारार्थं च पूर्वमज्ञाततासिद्धिर्वक्तव्या । न च प्रमाणप्रवृत्त्यनुपपत्त्या तत्सिद्धिः उक्तप्रकारेणाज्ञाततावगमात् पूर्वं मानप्रवृत्तेरेवाभावात्तत्प्रवृत्त्या तदधिगमेऽन्योन्याश्रयप्रसङ्गादिति ॥ १८ ॥

ननु विषयस्याज्ञाततावगतिं विनापि तदवगतेर्मानान्वयव्यतिरेकाभ्यां मानजन्यता ज्ञातुं शक्यते । ततः प्रमाणतोऽवगतत्वव्यहारार्थमज्ञाततावगमो न वक्तव्य इत्याशङ्क्य उक्तमर्थं सदृष्टान्तं प्रपञ्चयति—

प्रक्षालनेन धवलं किमिदं बभूव
किंवा पुराऽपि धवलं स्वयमेव वस्त्रम् ।
इत्येवमेष न विवेक्तुमलं कदाऽपि
यो दृष्टवान्न मलिनं वसनं पुरस्तात् ॥१९॥

प्रक्षालनेनेति । द्वाभ्यामेषः पुरुषः एवं विवेक्तुमलं समर्थो नेति सम्बन्धः । एवशब्दार्थमाह—प्रक्षालनेनेत्यादिनेत्यन्तेन । धवलं शुभ्रमिदं वस्त्रमिति सम्बन्धः । कदाचित्कदाचिदपीत्यर्थः । एष क इत्याकाङ्क्षायामाह—य इत्यादिना । वसनं वस्त्रं वसनं मलिनं न दृष्टवानिति सम्बन्धः । पुरस्ताद्धावल्यदर्शनात्पूर्वम् ॥ १९ ॥

दार्ष्टान्तिकमाह—

एवं पुरानधिगतं यदि नानुभूतं
मानेन बोधितमिदं प्रतिभाति मेयम् ।

न स्वप्रकाशमिति शक्यमिदं विवेक्तुं
केनापि नैव तदवस्थतयैव दृष्टेः ॥ २० ॥

एवमिति । वक्ष्यमाणप्रकारेण पुरा मानवृत्तेरिति शेषः । अनुभूतमवगतमेयमनधिगतमिति नानुभूतं यदीति सम्बन्धः । बोधितं ज्ञापितं सदिदं मेयं प्रतिभाति स्फुरति न स्वप्रकाशं स्वप्रकाशं सत् न स्फुरति इदं केनापि पुरुषेण विवेक्तुं न शक्यमेवेति सम्बन्धः । इदंशब्दार्थ एव मानेनेत्यादिना इतीत्यन्तेन दर्शितः । अशक्यत्वे हेतुः—तदवस्थतयेति । प्रकाशकालमात्रावच्छिन्नतयैव दृष्टेर्दर्शनात् प्रकाशकालावच्छिन्नस्यैव घटादेर्ज्ञायमानत्वात् । तज्ज्ञानस्य च प्रमाणजन्यत्वाजन्यत्वपक्षयोस्तुल्यत्वान्न विवेकः सम्भवति । न चान्वयव्यतिरेकाभ्यां विषयावगतेः प्रमाणजन्यत्वनिश्चयः पूर्वमज्ञाततावगतिं विनान्वयव्यतिरेकयोर्दुर्निरूपत्वात्ताभ्यां चक्षुरादिजन्यत्वनिश्चयेऽपि मानजन्यत्वनिश्चयासंभवाच्च अज्ञातार्थावगाहिन एव मानत्वादिति मानेनेति वदतो भावः ॥ २० ॥

ननु घटाद्यज्ञाततायाः प्रमाणसिद्धत्वाभावेऽप्यात्मा ज्ञाततावच्चित्यानुभववलादेव तत्सिद्धिः स्यादिति चेन्न—अज्ञानस्य समानाश्रयविषयत्वनियमेन घटादिविषयाज्ञानस्य घटाद्याश्रितत्वापत्त्या नित्यानुभवसम्बन्धाभावेन तद्बलादपि सिद्ध्यनुपपत्तेः । तस्मादात्मन एवाज्ञातत्वं नत्वनात्मनः तथा च न तद्विषयप्रमाणानां तत्त्वावेदकत्वमित्यभिप्रेत्योपसंहरति—

अज्ञातमर्थमवबोधयितुं न शक्त-
मेवं प्रमाणमखिलं जडवस्तुनिष्ठम् ।
किं त्वप्रबुद्धपुरुषं व्यवहारकाले
संश्रित्य संजनयति व्यवहारमात्रम् ॥ २१ ॥

अज्ञातमर्थमिति । एवं सत्यनात्मनो ज्ञातत्वे प्रमाणाभावे सतीत्यर्थः । जडवस्तुनिष्ठं जडवस्तुविषयं घटादेरज्ञातत्वाभावादेव न तद्विषय-प्रमाणं सर्वमज्ञातार्थावबोधनसमर्थमित्यर्थः । तत्किमिदानीं प्रत्यक्षादिकं प्रमाणमेव नेति चेन्न । तस्याज्ञातवस्त्ववबोधकत्वाभावेन तत्त्वावेदनप्रामाण्याभावेपि व्यवहार्योग्यवस्तूपदर्शनेन व्यावहारिकं प्रामाण्यमस्तीत्याह—किंत्वित्यादिना । अप्रबुद्धपुरुषं तत्त्वावबोधरहितं पुरुषम् । एतच्चाज्ञानिन एव व्यवहारः संभवतीत्यभिप्रेत्योक्तम् । व्यवहारकाले व्यवहारदशायां संश्रित्याश्रित्य आश्रयणं चाभिमानविषयत्वं संजनयति उत्पादयति तत्तद्विषयज्ञानजननद्वारेति शेषः । व्यवहारशब्दोभिवदनादिपरः मात्रचा तत्र विषयत्वं व्यावर्त्यते ॥ २१ ॥

ननु प्रत्यक्षादेस्तत्त्वावेदकत्वाभावे लोके सत्यमिथ्यादिविभागो न स्यात् । न च व्यवहारिकत्वतदभावाभ्यां तद्विभागः । व्यावहारिकत्वं हि व्यवहारजनकत्वं व्यवहारजनकत्वं च भ्रान्तिस्थलेपि दृश्यत इत्याशङ्क्य सदृष्टान्तं तद्विभागमाह—

आबोधतः सकलमेव हि सत्यमिथ्या-
भ्रान्तिप्रमाणविनिवर्त्यनिवर्तकत्वम् ।
स्वप्नेऽपि दृष्टमिदमेवमिहापि जाग्र-
त्काले भवत्वखिलमापरमात्मबोधात् ॥ २२ ॥

आबोधत इति । जाग्रद्बोधोदयपर्यन्तं हीति प्रसिद्धौ । इदं सकलं स्वप्नेपि दृष्टं हीत्यन्वयः । इदंशब्दार्थमेवाह—सत्यासत्येति । सत्यत्व-मिथ्यात्वभ्रान्तित्वप्रमाणत्वनिवर्त्यत्वनिवर्त्तकत्वमेवं स्वप्नवदखिलं सत्यत्वादिकमापरमात्मबोधाज्जीवब्रह्मैक्यसाक्षात्कारपर्यन्तम् । तथा च यथा स्वप्ने प्रातीतिके सति प्रत्यक्षादेस्तत्त्वावेदनप्रामाण्याभावेन तत्स्थप्रपपञ्चस्य वस्तुतो मिथ्यात्वाविशेषेऽपि निद्रादोषदुष्टानां

मूढानां शुक्त्यादितद्विषयज्ञानतज्जनकचक्षुरादेः सत्यप्रमाणनिवर्त्तकत्वं शुक्तिरूप्यादितद्विषयज्ञानतज्जनकचक्षुरादेस्तु मिथ्याभ्रान्तिनिवर्त्यत्वं चेति विभागो दृष्टिमात्रप्रयुक्तो जाग्रद्बोधोदयपर्यन्तं दृष्टः। एवं जाग्रत्प्रपञ्चस्यापि प्रत्यक्षादितत्त्वावेदनप्रमाणाभावेन वस्तुतः सत्यमिथ्यादिविभागाभावेपि तत्त्वसाक्षात्कारोदयपर्यन्तमविद्यामहापिशाचग्रस्तानामविवेकिनां दृष्टिमात्रप्रयुक्तः सत्यामिथ्यादिविभागः सम्भवतीति भावः ॥ २२ ॥

ननु सर्वस्यापि प्रमाणप्रमेयजातस्य वस्तुतो मिथ्यात्वाविशेषे शिष्टानां बौद्धार्हतकापिलकणभुगादिशास्त्रादिकं तत्प्रमेयतप्तशिलारोहणादिगतेष्टोपायतादिकं च वितथं हेयं वेदतन्मूलमीमांसाशास्त्रादिकं तत्प्रमेयाग्निहोत्रादिगतश्रेयःसाधनत्वादिकं चावितथमुपादेयमिति विभागः कथं संगच्छते वस्तुतः प्रमाणप्रमेयवैषम्याभावे तदधीनहेयोपादेयसुखदुःखादिव्यवस्थानुपपत्तिरित्याशङ्क्य स्वप्नदृष्टान्तेनैव सर्वमुपपद्यत इत्याह—

स्वप्ने तप्तशिलाधिरोहणगता निःश्रेयसोपायता
मिथ्या ब्राह्मणतर्पणादिनिलया सत्या तथा लौकिकी।
स्रक्सत्या तदहिर्मृषैव विदितो निद्रानिवृत्तौ पुनः
स्वप्ने दृष्टमशेषमेव वितथं ग्राह्यं तथा जागरे ॥ २३ ॥

स्वप्नेतप्तेत्यादिना श्लोकद्वयेन। तप्तशिलाधिरोहणगता तन्निष्ठा मिथ्येति लिङ्गविपरणमेन विदितेत्यनुषङ्गः। ब्राह्मणतर्पणादिनिलया ब्राह्मणभोजनादिनिष्ठा निःश्रेयसोपायतेत्यनुषङ्गः सत्या विदितेत्यप्यनुषङ्गः स्वप्न एव लौकिकमुदाहरणमाह—तथेति। यथा शास्त्रीयमुदाहरणं तथा स्रग् माला सत्या विदितेत्यप्यनुषङ्गः। तदहिः स्रजि परिकल्पितसर्पः विदित इति पाठः। ननु स्वप्नेपि वस्तुत एव सत्यमिथ्यादिविभागः

ततः कथं तद्दृष्टान्तेन जाग्रतो मिथ्यात्वसाधनमित्याशङ्क्याह—निद्रानिवृत्तौ पुनरिति। अशेषं पूर्वोक्तं सर्वं वितथमेवेति सम्बन्धः। मिथ्यैवेत्यर्थः। स्वप्नदृष्टस्य कस्य चिद्वस्तुसत्वे जाग्रत्यपि तत्तथैवानुभूयेत। न हि परमार्थसतोऽवस्थाविशेष एव नियतप्रतिपत्तिर्युज्यते। न च वस्तुसत्त्वेपि तस्य क्षणिकत्वादेव जाग्रत्यनुपलम्भ इति वाच्यम्। तत्र किं सत्येव जाग्रच्छरीरे स्वाप्नशरीराद्युत्पत्तिः। उत विनष्टे तस्मिन्। नाद्यः। मनुष्यशरीरादौ तिष्ठति। व्याघ्रादिशरीराद्यभिमानानुपपत्तेः। अत एवात्मवादिनस्तव एकदा शरीरद्वयप्रवेशासंभवात्। एकदा शरीरद्वयव्यापारानुसंधानप्रसङ्गाच्च। न द्वितीयः। पुनरुत्थानकाले पूर्वोत्पन्नमनुष्यादिदेहाद्यनुपलम्भप्रसङ्गात्। तदानीमेव तदुत्पद्यत इति चेन्न। तत्कारणमातापितृरेतः सेकाद्यभावान्मिथ्यात्वपक्षे तु न नियतकारणसंपत्त्यादिकमपेक्ष्यते। अविद्ययैव विचित्रसर्वोत्पत्युपपत्तेः। ततः स्वप्नदृष्टं सर्वं मिथ्यैवेत्यर्थः। तथा च यथा स्वप्नदृष्टपदार्थानां सर्वेषां मिथ्यात्वेपि तप्तशिलाधिरोहणादिगतश्रेयःसाधनत्वादिकं प्रतीतं तद्बोधकबुद्धशास्त्रादिकं च वितथं हेयं ब्राह्मणभोजनादिगतश्रेयःसाधनत्वादिकं तद्बोधकवैदिकशास्त्रादिकं चावितथमुपादेयमिति विभागबुद्धिः। एवमेव जाग्रत्यपि वस्तुसत्वाभावेपि विभाग उपपद्यतइति दार्ष्टान्तिकमाह—ग्राह्यं तथेति। तथा स्वप्नवदेव जाग्रत्यपि सर्वं ग्राह्यं न तु तत्र प्रमाणप्रमेयवैषम्यापेक्षा। न हि जाग्रत्यनुभवकाले विचारकाले वा विवेकिनामणुमात्रमपि स्वाप्नाद्विशेषः कश्चित्प्रतीयत इत्यर्थः॥ २३॥

ननु कथं न प्रतीयते यतः स्वप्ने कृतस्य यागादेर्जाग्रति क्रियमाणस्य च स्पष्टमेव विशेषः प्रतीयत इति चेत्तत्र किं तयोः साधनकृतो विशेषः किं वा स्वरूपकृतः किं वा फलकृत. न सर्वथापि ऋत्विक्पश्वादेः साधनस्याग्नेयादेः स्वरूपस्य स्वर्गादेश्च फलस्योभयत्रापि समत्वादस्ति हि स्वप्नेपि स्वप्नानुष्ठिततया यागफलं स्वर्गोनुभूयत इत्यभिमानः। ननु स्वप्ने संन्यासिनापि स्वस्य यागाद्यनुष्ठानमनु-

भूयते न तु जाग्रति तथानुष्ठानमनुभूयते तत्कथमनयोः साम्यमिति चेन्न । संन्यासिनोपि स्वप्ने गृहस्थाभिमानपूर्वकमेव यागाद्यनुष्ठानाभिमानात् । नन्वेवं सति स्वप्नानुष्ठितयागः पुरुषो नैव जाग्रति नैव तमनुतिष्ठेत् तत्प्रयोजनस्य सिद्धत्वात् ततश्च स्वप्नकृतयागस्य फलं नास्तीत्येव वक्तव्यम् । तथा च फलकृतो विशेषोऽस्त्येवेति चेन्न । जाग्रत्यपि प्रतिवसन्तं ज्योतिष्टोमावृत्तिवत् जाग्रत्फलानुभवार्थं वा तदुपपत्तेः । नन्वेवमप्याधानादेः पुनरनुष्ठानानुपपत्तिः । तन्निष्पाद्याहवनीयादेः स्वप्न एव सिद्धत्वादिति चेन्न । शास्त्रीयं कर्म यथाशास्त्रमेवानुष्ठेयं शास्त्रं च येन यजमानेन यदाधानमनुष्ठितं तस्यैव तस्मिन्नग्नौ यागं विधत्ते नत्वन्ययजमानसाध्येऽग्नावपि यजमानश्च स्वप्नजाग्रतोः शरीरभेदात् भिद्यते पूर्वं ब्राह्मणस्यैव सतो जन्मान्तरे वैश्यस्य वैश्यस्तोमे प्रवृत्तिदर्शनादस्ति च जाग्रत्स्वप्नयोः शरीरभेदः अत एव स्वप्नानुष्ठितब्रह्महत्यादेर्जाग्रदनुष्ठितेन साम्येपि न जाग्रत्पुरुषस्तेन पतितो भवति इत्येतत्सर्वमभिप्रेत्य ग्राह्यं तथेत्युक्तमेवार्थं प्रपञ्चयति—

श्रेयःसाधनताऽग्निहोत्रनिलया सत्येति संगृह्यते
मिथ्या तप्तशिलाधिरोहणागता शिष्टैः परित्यज्यते ।
रज्जुः सत्यतया स्थितैव तदहिर्मिथ्यैव तावद्भवे-
द्यावन्मूलतमोविदारणपटुर्विद्योदयो नाऽऽगमत् ॥२४॥

श्रेयःसाधनतेति । अग्निहोत्रनिलया अग्निहोत्रनिष्ठा इतिशब्दः प्रकारे संगृह्यते उपादीयत इत्यर्थः । शिष्टैरित्यत्राप्यनुषञ्जनीयम् । जाग्रत्यपि लौकिकमुदाहरणमाह—रज्जुरिति । तदहिः रज्ज्वां परिकल्पितः सर्पः । एवं विभागप्रतीतेरवधिमाह—तावदिति । मूलतमोविदारणपटुः सत्यमिथ्याविभागभ्रान्तिमूलाज्ञाननिवर्त्तनक्षमः विद्योदयः आत्मसाक्षा-

त्कारोदयः आगमात्तत्वमादेस्तथा च जाग्रद्दृष्टपदार्थः स्वप्नपदार्थवत् दृष्टिमात्रसन्नित्यर्थः। ननु कथं तस्य दृष्टिमात्रसत्वं तत्र प्रमाणाभावादिति चेन्न—विमतं दृष्टिमात्रशरीरं दृश्यत्वात् स्वाप्नपदार्थवदित्यनुमानस्यैव तत्र प्रमाणत्वात्। न च प्रत्यभिज्ञाबाधः प्रत्यभिज्ञाया अपि स्वप्न इवोपपत्तेः। न चैवं सति बौद्धसिद्धान्तप्रवेशापातः तन्मतेऽपि प्रपञ्चस्य क्षणिकविज्ञाने कल्पिततया दृष्टिमात्रशरीरत्वादिति वाच्यम्। अस्माभिः प्रपञ्चव्यतिरिक्तस्यापि परमानन्दाद्वितीयाङ्गीकारेण महतो वैषम्यस्य विद्यमानत्वादन्यथा येन केनापि प्रकारेण साम्यापादने सर्वेषामपि वादिनां तन्मतापातप्रसङ्गात्। एवमन्याश्च या या अनुपपत्तयोत्तरवादिभिरुद्भावनीयाः ताः सर्वा अपि स्वप्ननिदर्शनेनैव परिहर्त्तव्याः तस्मान्न किञ्चिदवद्यमिति भावः ॥ २४ ॥

एवं निर्दुष्टत्वेन स्थिते स्वाभिमतदर्शनरहस्ये प्रकारान्तरेणापि बौद्धसाम्यं परिहर्त्तुं बौद्धसिद्धान्तसमतामाशङ्कते—

ननु शाक्यभिक्षुसमयेन समः
प्रतिभात्ययं च भगवत्समयः।
यदि बाह्यवस्तु वितथं नु कथं
समयाविमौ न सदृशौ भवतः ॥ २५ ॥

ननु शाक्येति। नन्विति चोद्ये शाक्यभिक्षुसमयेन समः भदन्तसिद्धान्तेन समः तुल्यः अयं इयता सन्दर्भेण प्रतिपादितः भगवत्समयः सर्वज्ञभगवत्पादराद्धान्तः कथं साम्यमित्याशङ्क्य साम्यप्रकारमेवाह—यदीति। बाह्यवस्तु घटादि वितथमसत्यं समयौ सिद्धान्तौ इमौ भदन्तसर्वज्ञबादरायणाभिमतौ बाह्यवस्तुनोर्वैतथ्याङ्गीकारे पक्षद्वयेपि विशेषाभावादिमौ कथं तुल्यौ न भवेतां किन्तु भवेतामित्यर्थः ॥ २५ ॥

ननु सर्वशून्यवादी बौद्धः वयं तु न सर्वशून्यवादिनः किन्तु बोधमात्रसत्यत्ववादिनः तत्कथमस्माकं तस्य च साम्यमित्याशङ्क्य माभूत् शून्यवादिना साम्यं विज्ञानवादिना तु भविष्यतीत्यभिप्रेत्याह–

यदि बोध एव परमार्थवपु-
र्न तु बोध्यमित्यभिमतं भवति ।
ननु चाऽश्रितं भवति बुद्धमुने-
र्मतमेव कृत्स्नमिह मस्करिभिः ॥ २६ ॥

यदि बोध एवेति । वपुः स्वरूपं बोध्यं दृश्यं घटादि भवति यदीति सम्बन्धः । ननु चेति खल्वर्थः । इह परीक्षाभूमौ मस्करिभिः श्रीवादरायणमतानुगतश्रीशङ्करभगवत्पादादिभिः विज्ञानवादिभिरपि विज्ञानमेव परमार्थमन्यत्सर्वं तत्र कल्पितमपरमार्थमित्युच्यते । भगवद्भिरपि परमार्थसति दृगात्मनि प्रपञ्चः परिकल्पित इत्युच्यते । अतो न मतद्वयवैषम्यमित्यर्थः । तथा च जगत्पारमार्थिकत्वं वक्तव्यमिति भावः ॥ २६ ॥

प्रपञ्चवैतथ्यस्य मतद्वयसाम्येप्यान्तरालिकवैषम्यस्य सत्त्वान्न बौद्धसाम्यमित्यभिप्रेत्य परिहरति –

ननु मातृमानविषयावगती-
रपरस्परं प्रति विभागवतीः ।
उपयन्भदन्तमुनिना सदृशः
कथमेष वैदिकमुनिर्भवति ॥ २७ ॥

ननु मात्रिति । वैदिकमुनिः श्रीमदाचार्यः कथमेव कथं वा भदन्त-

मुनिना बौद्धेन सदृशो भवति न कथमपीत्यर्थः । तत्र हेतुगर्भितं विशेषणम् । नन्वित्याद्युपयन्नित्यन्तं मातृमानविषयावगतीः प्रमातृ-प्रमाणप्रमेयप्रमितीः परस्परं भेदवतीः उपयन्नङ्गीकुर्वन् । ननु खलु यद्यपि मात्रादिप्रपञ्चवैतथ्यमुभयोरपि समानं तथापि तानि मात्रादीनि व्यवहारकाले परस्परभिन्नान्येवाचार्यैरङ्गीक्रियन्ते न तथा विज्ञान-वादिभिः ते हि केवलं विज्ञानं प्रमातृ तदेवासन्याकारयुक्तं प्रमेयमस-त्प्रकाशनं सत् प्रमितिः तत्प्रकाशनशक्तं प्रमाणमित्यनेन रूपेण विज्ञान-स्यैकस्यैव चतुष्टयात्मत्वं वर्णयन्ति । न तु तेषां परस्परभेदम् । अत एतादृशवैषम्यस्य विद्यमानत्वात्कथं तेन साम्यमित्यर्थः ॥ २७ ॥

किं च प्रमात्रादिविभागो नित्यसिद्धपरमात्माश्रितमाययैव विजृम्भितः स च स्थिर इत्यस्माभिरङ्गीक्रियते न तथा विज्ञानवा-दिभिस्तन्मते स्थायिन आत्मनस्तदाश्रितानाद्यविद्यायास्तत्कार्यप्रपञ्च-स्थेन्नश्चाभावादतोपि महद्वैषम्यमित्यभिप्रेत्याह—

परमात्मसंश्रयतमोजनितं
प्रविभक्तमेव तु परस्परतः ।
स्थिरमभ्युपेतमिह नः समये
ननु मातृमानविषयप्रभृति ॥ २८ ॥

परमात्मेति । मातृमानविषयप्रभृतीतिप्रभृतिशब्देन प्रमितिर्गृह्यते । एतच्चतुष्टयं परमात्मसंश्रयतमोजनितं परमात्माश्रितमायाविजृम्भि-तम् । एवकारोऽत्रापि सम्बध्यते । परस्परतः प्रविभक्तमेवेति सम्बन्धः । अन्योऽन्यभिन्नमेवेत्यर्थः । स्थिरं बहुतरकालावस्थाय्येव नोऽस्माकं समये सिद्धान्तेऽभ्युपेतमङ्गीकृतम् । ननु खल्वतः कथं साम्यमित्यर्थः ॥ २८ ॥

किं च विषयविज्ञानव्यतिरिक्तस्वप्रकाशस्थस्वरूपः सञ्जाती-

यादिभेदशून्यः परमात्मा स्वाध्यस्तं सकलं प्रपञ्चं साधयतीत्यस्माभिरुच्यते न तथा बौद्धैः तन्मते बुद्धिवृत्तेरेव जडाया विज्ञानत्वेनाङ्गीकारात् । एतद्विज्ञानस्य च क्षणिकस्य क्षणिकप्रपञ्चसाधकत्वाद्विज्ञानानामनेकत्वाच्च अतोपि न साम्यमित्यप्रेत्याह —

तमसा विनिर्मितमिदं सकलं
चतुरः स पश्यति परः पुरुषः ।
अविकारिबोधवपुरद्वयकः
करणैर्विना सकलसाक्षितया ॥ २६ ॥

तमसेति । अविद्यया विनिर्मितं कल्पितमिदं सकलं पश्यतीति सम्बन्धः । इदंशब्दार्थमाह—चतुर इति । मात्रादिभेदेन चतुर्विधान् प्रपञ्चान् चतुर्धा स्थितमिदं सकलमित्यर्थः । चतुरो विवेकीति वा । क इत्याकाङ्क्षायामाह—स इति । श्रुतिसिद्धः परः बुद्ध्यादिव्यतिरिक्तः । अविकारिबोधवपुः कूटस्थचैतन्यात्माऽद्वयकः सजातीयादिभेदरहितः कथं पश्यतीत्याकाङ्क्षायामाह—करणैर्विनेति । चक्षुरादिविकलः सन् पश्यतीत्यर्थः । ननु करणव्यापारहीनस्य कथं द्रष्टृत्वमित्याकाङ्क्षायामुक्तम्–सकलसाक्षितयेति । स्वाध्यस्तसकलप्रपञ्चाधिष्ठानस्वप्रकाशचैतन्यरूपत्वेनात्मनः श्रोत्रस्य श्रोत्रमित्यादिना श्रोत्रादेरपि ग्राहकत्वेन श्रवणात् न प्रपञ्चद्रष्टृत्वे कारणापेक्षा किन्तु स्वप्रकाशबोधरूपत्वेन स्वयमेव सर्वं पश्यति । करणं त्वविद्यानिवृत्तावेवार्थ्यते । बुद्धमते त्वालयविज्ञानसन्ततिश्चक्षुरादिकरणमपेक्ष्यैव स्वविषयं प्रकाशयति न स्वत इति न साम्यमित्यर्थः ॥ २६ ॥

नन्वसङ्गस्वरूपस्यात्मनः कथं सकलसाक्षित्वं साक्ष्यसम्बन्धाभावात् न हि दृश्यसम्बन्धाभावे दृशः साक्षित्वं संभवति । सर्वविष-

यकज्ञानक्रियायोगे वा कथं तस्य कौटस्थ्यमपि विकारवत्त्वादित्याशङ्क्य वास्तवतत्सम्बन्धाभावेप्याविद्यकस्य तस्य सत्वान्न साक्षित्वानुपपत्तिर्न वा कौटस्थ्यहानिरित्यभिप्रेत्याह—

निजमायया परिगतः पुरुषः
परतन्त्रया तु निजया प्रभया ।
परिकल्पितं सकलमाकलय-
न्स हि साक्षितामुपगतो भवति ॥ ३० ॥

निजमाययेति । स्वाश्रयविषयमायया परिगतस्तादात्म्यसम्बन्धेन व्याप्तः पुरुषः सकलशरीरेष्वन्तर्यामितयानुप्रविष्टः सः परमात्मा परतन्त्रयाऽविद्यावृत्त्यधीनयाऽविद्यावृत्त्यभिव्यक्तयेति यावत् । निजया स्वाभाविक्या प्रभया चैतन्येनाथवा परतन्त्रयेति निजया माययेत्यस्य विशेषणं परमात्माधीनयेत्यर्थः । एतच्च साक्षिणो मायाधीनजीववैलक्षण्यार्थमिति द्रष्टव्यं परिकल्पितमध्यस्तम । अध्यासे च निजमाययेत्यनेनैव हेतुरप्युक्तः । आकलयन् पश्यन् सन् साक्षितां सर्वद्रष्टृतामुपगतः प्राप्तो भवति तथा च तत्तदाकाराविद्यावृत्त्यभिव्यक्तस्वरूपचैतन्येनैव सकलद्रष्टृत्वान्न कौटस्थ्यक्षतिः मायिकद्रष्टृत्वस्य स्वाभावाविरोधित्वान्नाप्यसङ्गस्यात्मनो दृश्येन सम्बन्धाभावात् सकलसाक्षित्वानुपपत्तिः आविद्यकस्य तस्य सत्त्वादित्यर्थः ॥ ३० ॥

ननु स्थायित्वेन मतवैलक्षण्यमुक्तमनुपपन्नम् । स्थायित्वे प्रमाणाभावात् । न च प्रत्यभिज्ञा प्रमाणमस्तीति वाच्यम् । तस्या ज्वालादिप्रत्यभिज्ञावदन्यथासिद्धत्वेनाप्रमाणत्वादिति चेत् । भवेदेतदेवं यदि प्रत्यभिज्ञा प्रामाण्यं न सेत्स्यति सिद्ध्येव तु प्रत्यभिज्ञा प्रामाण्यमभिज्ञाप्रामाण्यवदित्यभिप्रेत्याह—

ग्राह्यग्राहकयोः स्थिरत्वगमनी तत्प्रतिभिज्ञा प्रमा नोपपत्स्यत चेदसेत्स्यदपि नौ सिद्धान्तयोस्तुल्यता। सा निर्वक्ष्यति सिध्यतीति जगतः स्थैर्यं स्वरूपात्मकं चैतन्यस्य च भङ्गुरत्वमिव मे सर्वस्यते दर्शने ॥ ३१ ॥

ग्राह्यग्राहकयोरिति। ग्राह्यः प्रपञ्चः ग्राहकः आत्मा तयोः स्थिरत्वगमनी स्थायित्वसाधिका तत्प्रत्यभिज्ञा ग्राह्यग्राहकविषयप्रत्यभिज्ञाप्रमा नोपपत्स्यत इति चेत् प्रमाणमुपपन्नं न भवेच्चेत् नौ आवयोः सिद्धान्तयोस्तुल्यताऽसेत्स्यदपि सिद्धा भवेदपि तदेव नास्ति किन्तु सा ग्राह्यग्राहकविषयप्रत्यभिज्ञा मे मम पक्षे जगतो ग्राह्यस्य चैतन्यस्य च ग्राहकस्य स्वरूपात्मकं स्वरूपभूतं स्थैर्यं स्थायित्वं निर्वक्ष्यति साधयिष्यति। इतिशब्दो हेतौ यतो निर्वक्ष्यति अतः स्थैर्यं सिद्धयतीत्यर्थः। अथवा—सिध्यतीति निर्वक्ष्यति यथा सिध्यति तथा निर्वक्ष्यतीत्यर्थः। अयम्भावः—किं प्रत्याभिज्ञायाः विकल्पप्रत्ययत्वेनाप्रामाण्यं सिसाधयिषितं किं ज्वालादिप्रत्यभिज्ञावत् प्रत्यभिज्ञात्वेन। अथवा—दोषजन्यत्वेनाहोस्विद्बाध्यत्वेन। आद्ये यो यो विकल्पप्रत्ययस्स सर्वोऽप्रमाणं यथा रजतादिप्रत्यय इत्यनुमितेरप्रामाण्ये प्रत्यभिज्ञानाप्रामाण्यसाधकत्वानुपपत्तिः। तत्प्रामाण्ये च विकल्पप्रत्ययत्वहेतोस्तत्रैव व्यभिचारः। न द्वितीयः। अप्रयोजकत्वात्। यथा तत्र विरुद्धपरिमाणवत्त्वेन ज्वालाभेदानुमानं बाधकमस्ति। नैवं घटादौ भेदग्राहि बाधकं प्रमाणं दृश्यते। तथा च तत्र प्रामाणिकभेदवद्विषयत्वमुपाधिः। किं चाप्रमाणीभूता अपि प्रत्यभिज्ञा क्षणभङ्गपक्षे नोपपद्यते। सा हि सादृश्यनिबन्धना जातिनिबन्धना वा वक्तव्या न च तथा क्षणभङ्गपक्षे संभवति। उत्पन्नमात्रापवर्गिणि घटादौ सादृश्यादिधर्माश्रयत्वानुपपत्तेः। न ह्येकक्षणमात्रवर्तिन्याश्रयभावः

संभवति। किं च सादृश्यं यदि प्रत्यभिज्ञाविषयं तर्हि सादृश्यप्रतियोगिसादृश्यतद्विशिष्टपदार्थविषयज्ञातत्रयकालान्वयिनि तद्गृहीतर्येकस्मिन्नसति कथं तद्विषयिण्यपि प्रत्यभिज्ञोदीयात्क्षणत्रयावस्थायिनि चात्मनि कथं सर्वक्षणिकवादः। नन्वेकस्यामालयविज्ञानज्ञं ? ततोपतितमन्यदेव विज्ञानं तत्रितयमपि ग्रहीष्यतीति चेत्तत्र संतानस्य संतानिनोऽतिरिक्तस्य स्थायिनः सत्त्वे सर्वक्षणिकतावादभङ्गः संतानिव्यतिरेकेण चासत्त्वे कथमन्यदृष्टप्रतियोगिकं सादृश्यमन्येनानुभूयेत। तस्मान्न क्षणभङ्गवादिमते सादृश्य दिनिमित्तापि प्रत्यभिज्ञोपपद्यते। न तृतीयः। दोषस्यानुभूयमानस्याभावात् कल्पनायां चान्योऽन्याश्रयात् प्रत्यभिज्ञाभ्रान्तित्वेन हि तस्या दोषजन्यत्वं कल्पनीयं दोषजन्यत्वे च भ्रान्तित्वं कल्पनीयमिति। न तुरीयः। ज्वालाप्रत्याभिज्ञावदत्र बाधकाभावात्। ननु घटादिः कालान्तरभाव्यर्थक्रियां जनयितुं समर्थो न वा। आद्ये प्रथमक्षण एव सर्वा अर्थक्रियाः कुर्यात्। समर्थस्य विलम्बायोगात्। ततश्च द्वितीयादिक्षणे घटादेरसत्त्वमेव प्राप्तम्। अर्थक्रियाजनकस्यैव सत्वात्। न द्वितीयः। कालान्तरेपि तदभावप्रसङ्गादसमर्थत्वान्न हि शिलापृष्ठं वर्षधाराशतेनाप्यङ्कूरं जनयितुमुत्सहते। ततः पुनरप्यसत्त्वमेव प्राप्तं तथा च कथमत्र प्रत्यभिज्ञायाः बाधाभाव इति चेन्न। आत्मस्वरूपसत्ताया एव सर्वपदार्थानामपि सत्त्वेनार्थक्रियाकारित्वाभावेप्यनेकक्षणसत्वोपपत्तेः। समर्थस्यापि सहकारिक्रमेण क्रमकार्यकरत्वोपपत्तेश्च। न चात्र शिलापृष्ठनिदर्शनं संगच्छते। तस्य स्वतो ऽसमर्थत्वात् तस्माद्बाधकाभावात्। प्रत्यभिज्ञाप्रमाणेन सर्वपदार्थानां स्थायित्वं सिध्यतीति न च स्थैर्यनाम धर्मः येन ग्राहकस्यात्मनोऽनेकरसत्वापत्तिरित्यभिप्रेत्योक्तम्—स्वरूपात्मकमिति। स्थैर्यविशेषणं स्थैर्यं बहुकालावस्थानयोग्यतालक्षणं ग्राह्यग्राहकस्वरूपमेव न धर्मः न च धर्मत्वेपि तस्य कल्पितत्वान्नानेकरसत्वापत्तिरिति वाच्यम्। तथात्वे मोक्षदशाया-

मात्मनोऽसत्वप्रसङ्गात्तस्मादेवमेव वक्तव्यमिति भावः। स्थैर्यस्य ग्राह्य-ग्राहकस्वरूपत्वे दृष्टान्तमाह—भगुरत्वमिव सर्वस्य ते दर्शन इति। यथा ते तव क्षणिकवादिनो दर्शने पक्षे सर्वस्य ग्राह्यग्राहकलक्षणस्य जगतः भङ्गुरत्वं स्वरसविनाशित्वं स्वरूपमेव न धर्मः क्षणिकपक्षे धर्मधर्मि-भावानुपपत्तेः। तथा अस्मन्मतेऽपीत्यर्थः। अतः प्रपञ्चस्य वैतथ्येपि प्रमात्रादिभेदादिवैलक्षण्यान्न बौद्धसाम्यमिति भावः॥ ३१॥

नन्वेवमपि जगत्प्रपञ्चस्य वितथत्वाङ्गीकारे स्वप्नवैषम्यं न स्यात्। न च प्रत्यभिज्ञया स्थायित्वसिद्धेर्विशेषः कल्पितत्वाविशेषेण तस्या-प्यनुपपत्तेरित्यभिप्रेत्याशङ्कते—

ननु कल्पितं यदि हि जागरितं
वद कीदृशी खलु विलक्षणता।
स्वपनादमुष्य भवतोऽभिमता
परिकल्पितत्वमुभयोस्तु समम्॥ ३२॥

ननु कल्पितामिति। नन्विति चोद्ये स्वपनात् स्वप्नात्। अमुष्य जा-गरितप्रपञ्चस्य कीदृशी विलक्षणता भवतो वेदान्तिनोऽभिमता न केनापि प्रकारेण विलक्षणता सिद्धतीत्यर्थः। कुतो वैलक्षण्यन्न सिद्धेदित्याशङ्क्य कल्पितत्वस्योभयत्रापि तुल्यत्वादित्याह—परिकल्पि-तत्वमिति। तु शब्दो हेतौ यतः उभयोर्जागरितस्वप्नयोः कल्पितत्वं सम-मत इत्यर्थः॥ ३२॥

कल्पितत्वाविशेषेपि व्यावहारिकत्वप्रतीतिकत्वभेदेन तयोर्विशे-षात्स्थायित्वं जाग्रतः सिद्धयतीत्यभिप्रेत्य परिहरति—

न प्रमातरि सति प्रबाध्यते
जागरः स्वपनदृष्टवस्तुवत्।

मातृमानविषयोपलब्धिभिः
साकमेव तमसो निराकृतेः ॥ ३३ ॥

न प्रमातरीति । प्रमातर्यन्तःकरणावच्छिन्नचैतन्ये सति जागरो जाग्रद्दृष्टपदार्थो न प्रबाध्यते । स्वमूलाज्ञानेन सह न निवर्त्यते । तत्र वैधर्म्यदृष्टान्तः । स्वपनेति । यथा स्वप्नदृष्टपदार्थः प्रमातरि सत्येव जाग्रत्येव बाध्यते नैवं जाग्रत्पदार्थः सति प्रमातरि बाध्यत इत्यत्र हेतुमाह—मातृमानेत्यादिना । प्रमातृप्रमाणप्रमेयप्रमितिभिः साकं सहैव तमसो जागरकारणाविद्याया निराकृतेस्तत्त्वसाक्षात्कारेण निवर्त्यत्वादित्यर्थः । तथा च सति प्रमातरि बाध्यत्वं प्रातीतिकत्वं तद्विपरीतं च व्यवहारिकत्वमिति तयोर्विशेषात् जाग्रत्स्थैर्यमपि प्रत्यभिज्ञया संगच्छत इत्यर्थः ॥ ३३ ॥

प्रमात्रादिना सहैव जागरकारणाविद्याया निराकरणं प्रमात्रादौ सत्येव स्वाप्नपदार्थस्य निराकरणमित्यत्रोपपत्तिमाह—

देशकालपुरुषैरवस्थया
जागरस्य खलु कारणं तमः ।
साकमेव सहसा निरस्यते
वेदवाक्यजनितात्मसंविदा ॥ ३४ ॥

देशेति । देशो जम्बूद्वीपादिः कालो नौपाधिकः कालः पुरुषः प्रमाता तैःअवस्थाऽवान्तरकालः तया च साकमेवेति सम्बन्धः । खलुशब्दो हेतौ । यतस्तमोविद्यादेशादिभिः सहैव जाग्रत्पदार्थस्य कारणं न तु देशादिषु सत्सु केवलस्य जाग्रत्पदार्थस्य सर्गाद्यकाले देशादीनामभावात्ततस्तु जातं सकलं विचित्रमिति श्रुतेश्च । ततस्तत्कारणं तमस्तैः सहैव निरस्यते न तेषु विद्यमानेषु केवलजागरणे सह निव-

र्त्यते । एकस्मिन्नधिष्ठाने एकदाध्यस्तानामधिष्ठानज्ञानेन एकनिवृत्तावन्यनिवृत्त्यवश्यंभावेन जाग्रत्पदार्थनिवृत्तौ तेन सहोत्पन्नदेशादीनामपि निवृत्त्यवश्यंभावात् । नैवं स्वप्नपदार्थो देशादिभिः सहोत्पद्यते । यद्यपि स्वप्ने देशादेरपि तादात्विकस्यैवानुभवात् । तेन सहैवोत्पत्तिः सर्वस्यापि स्वप्ने वासनामात्रत्वात् । तथापि व्यावहारिकजाग्रद्देशादौ सत्येव तज्जातीयस्यैव मायिकरूप्यवदुत्पत्तिः तस्यैव वासनामात्रत्वं चेति न विरोधः तथा च सत्स्वेव देशादिषु स्वप्नपदार्थस्य निवृत्तिसम्भवात् प्रतिप्रमात्रादौ बाध्यत्वं तस्य नैवं जाग्रत इति भावः । ननु कुतस्तद्बाधः । ननूक्तं तत्त्वज्ञानेनेति चेत् किं तत्त्वज्ञानमात्मविषयज्ञानमिति चेत् तर्ह्यहमिति ज्ञानस्य सर्वदा सत्वात् नित्यनिवृत्तिप्रसङ्ग इत्याशङ्क्य—नाहमिति ज्ञानं तत्त्वज्ञानं किन्तु तत्त्वमादिवाक्यसमुपजातब्रह्मात्मविषयाखण्डसत्यज्ञानानन्दब्रह्माहमिति ज्ञानमेव तदेव सविलासमज्ञानं निवर्त्तयतीत्यभिप्रेत्याह—वेदवाक्येति । वेदवाक्यं तत्त्वमादिवाक्यं तेन जनिता या आत्मसंवित् ब्रह्मात्मविषया ब्रह्माहमिति साक्षात्प्रमितिः तयैव सहसा स्वसमय एव निरस्यते नत्वहमिति ज्ञानेन अतो न नित्यनिवृत्तिप्रसङ्ग इत्यर्थः ॥ ३४ ॥

प्रमात्रादिभिः साकमेव जाग्रत्पदार्थो बाध्यते तेषु सत्स्वेव स्वप्नपदार्थो बाध्यत इत्यत्रोपपत्तिमुक्त्वाऽनुभवमपि प्रमाणयति—

स्वप्नदृष्टमिह रज्जुसर्पव-
देशकालपुरुषेषु बाध्यते ।
जागरः पुनरयं तथाविधं
बाधकं न लभतेऽसमीक्षणात् ॥ ३५ ॥

स्वप्नदृष्टमिति । वस्त्विति शेषः । इह जगति प्रमात्रादौ सति बाध्यत्वे दृष्टान्तमाह—रज्जुसर्पवदिति । पुनः शब्दः स्वप्नाज्जागरस्य विशे

षद्योतकः । विशेषमेवाह—तथाविधमिति । देशादिषु सत्सु जायमानं न लभते न प्राप्नोति । उभयत्राप्यनुभवमेव प्रमाणमाह—समीक्षणादिति । स्वप्नस्य सत्येव देशादौ जाग्रति बाध्यत्वेनानुभवाज्जाग्रतश्च तस्मिन्सत्यबाध्यत्वेनानुभवादित्यर्थः । तथा च सति सति प्रमातरीत्याद्युक्तव्यवस्थोपपद्यत इति भावः । एतच्च सर्वं जाग्रद्दर्शनेन स्वप्नदृष्टस्य बाध इति लौकिकप्रतीत्यनुरोधेनोक्तमत एव समीक्षणादिति हेतुरुक्तः । वस्तुतस्तु न जाग्रद्दर्शनेन स्वप्नपदार्थस्य तदानीमसंभवादधिष्ठानज्ञानाभावादविद्याया एकत्वाच्च । न च मिथ्यात्वनिश्चयलक्षणो बाधो बाधशब्देन विवक्षितः । तथात्वे विचारदशायां जाग्रत्पदार्थेपि तत्सद्भावेन प्रातीतिकलक्षणस्यतत्रातिव्याप्तिप्रसङ्गात्तस्मात्प्रमातृपदेन तत्तद्विषयोपलब्धोच्यते । तथा च स्वोपलब्धरि सति बाध्यत्वं प्रातीतिकत्वं तदबाध्यत्वं व्यवहारिकत्वमिति तल्लक्षणमत्र विवक्षितं स चोपलब्धा जाग्रत्यन्तः करणावच्छिन्नं चैतन्यं तस्यैव प्रमाणव्यापारयितृत्वात् स्वप्ने च केवलचैतन्यमेव न त्वन्तः करणावच्छिन्नं तत्र तत्प्रेर्य्यप्रमाणाद्यभावात् तदनपेक्षणाच्च । तथा च स्वप्नोपलब्धरि केवलचैतन्ये सत्येव तत्त्वसाक्षात्कारेण स्वप्नपदार्थस्य स्वोपादानाज्ञानेन सह निवृत्तेः । जाग्रत्पदार्थस्य च स्वोपलब्ध्यन्तःकरणावच्छिन्नेन सहैव निवृतेः । न लक्षणस्यातिव्याप्त्यादिदोषः । न च जाग्रत्प्रपञ्चस्यापि साक्षिणा प्रतीयमानत्वात् प्रातीतिकलक्षणस्यातिव्याप्तिः व्यावहारिकलक्षणस्य बाधश्चेति शङ्क्यम्। अन्तःकरणावच्छिन्नस्यापि तदुपलब्धृत्वात्प्रमातृपदेन यावत्स्वोपलब्धैर्विवक्षितत्वादिति द्रष्टव्यम् । अथवा-मिथ्यात्वनिश्चयलक्षणो बाध एव बाधशब्देन विवक्ष्यते । प्रमातृपदेन चान्तःकरणावच्छिन्न एव विवक्ष्यते । तथा च प्रमातृसत्यत्वनिश्चयदशायां मिथ्यात्वबुद्धिविषयत्वयोग्यत्वं प्रातीतिकत्वं तस्मिन्सति तदयोग्यत्वं व्यावहारिकत्वमिति लक्षणनिष्कर्षः । न च प्रातीतिकलक्षणस्य जाग्रत्यतिव्याप्तिः । जाग्रतो हि विवेकदशायां

दृश्यत्वादिहेतुना मिथ्यात्वनिश्चयो वक्तव्यः । तादृशश्च निश्चय आत्मव्यतिरिक्तं सकलं विषयीकुर्वन् प्रमातारमपि विषयीकरोति । तस्यापि दृश्यत्वात् । तथा च तस्य प्रमाता सहैव मिथ्यात्वनिश्चयविषयत्वात् तत्सत्यत्वनिश्चये च तदभावान्नातिव्याप्तिरिति भावः ॥ ३५ ॥

तस्मान्मिथ्यात्वाविशेषेपि व्यावहारिकत्वप्रातीतिकत्वाभ्यां स्वप्नजाग्रतोर्विशेषे सिद्धे जाग्रतः स्थायित्वं सिद्धयतीत्यभिप्रेत्योपसंहरति—

तेन सत्यमिह जागरं विदुः
स्वप्नविभ्रमविरूढधर्मकम् ।
आपरात्मपरमार्थदर्शनाः
क्नेनबाधितवपुर्न सत्क्वचित् ॥ ३६ ॥

तेनेति । येन देशादिभिः सहैव जाग्रद्बाध्यते न तु स्वप्नवत् तेषु सत्सु तेन इह जगति जागरं सत्यं विदुर्जानन्ति लौकिकाः । तत्र हेतुः—स्वप्नविभ्रमेति । स्वप्नविभ्रमविरुद्धः देशकालादिषु सत्सु बाध्यस्वप्नदृष्टपदार्थेऽवर्त्तमानः धर्मो देशादिभिः सहैव बाध्यत्वादिरूपो यस्याम् । जागरामिति । ननु जागरस्य सत्यत्वेऽऽत्मवत्परमार्थतया बाधो न स्यादित्यत आह—आपरात्मेति । आङ्मर्यादायां परो देहत्रयानुपहितः कूटस्थचैतन्यबोध आत्मा स एव परमार्थतश्च तद्विषयं यद्दर्शनं सत्यज्ञानानन्दब्रह्माहमस्मीति साक्षात्कारस्तस्मात्पूर्वमेव जागरः सत्यः न तु तत्परमपि । अतः सर्वदा सत्यत्वाभावाद्बाधः स्यादित्यर्थः । आत्मदर्शनात्पूर्वमेव जागरः सत्य इत्यत्र हेतुमाह—तेन बाधितवपुरिति । तेनात्मदर्शनेन जागरो यतो बाधितवपुः अत इत्यर्थः । तथा विद्वान्नामरूपाद्विमुक्त इत्यादौ प्रपञ्चस्यात्मदर्शनेन बाधः श्रूयते तच्च सर्वदा

सत्यत्वे न स्यात् अतो बाधितपुष्ट्यादात्मदर्शनात् पूर्वमेव स सत्य इत्यर्थः। ननु बाधितवपुष्ट्वं सर्वदा सत्यत्वस्य विरोधि न भवति नेह नानेति श्रुत्या ब्रह्मात्मन्येव प्रपञ्चप्रतिषेधात्तत्साक्षात्कारेण तस्मिन्प्रपञ्चबाधेपि पुरो देशे निषिध्यमानरजतादिवदन्यत्र तत्सत्वोपपत्तेरित्याशङ्क्याह—न सन् क्वचिदिति। क्वचिद्ब्रह्मव्यरिक्तस्थले प्रपञ्चः सन्न भवति प्रमाणाभावादनुपपत्तेश्च। तथाहि—किन्निषेधप्रत्यय एव निषिध्यमानस्य देशान्तरसत्वं विषयीकरोति। किं वा तदनुपपत्तिः। नाद्यः। प्रसक्तप्रतियोगिकाभावमात्रविषयस्य तस्य देशान्तरीयतत्सत्वविषयत्वानुपपत्तेः। न द्वितीयः। निषेधप्रत्ययो हि निषिध्यमानप्रसक्तिं विनानुपपद्यमानस्तामेव कल्पयति। न तु निषिध्यमानस्यान्यत्र सत्तामप्यनुपयोगात्। ननु निषेधश्रुत्यापि प्रपञ्चाभावः पारमार्थिक इत्येव बोधनीयः प्रपञ्चो नास्तीत्येवंरूपेण निषेधे प्रत्यक्षादिविरोधस्यानिवार्यत्वात् अभावस्य च पारमार्थिकत्वं पारमार्थिकप्रतियोगित्वं प्रतियोगिनश्च पारमार्थिकत्वं क्वचिद्देशकालान्तरे सत्वमतो निषेधानुपपत्त्यैवान्यत्र सत्वं सिध्यतीति चेतत्र न देशकालान्तरे विद्यमानत्वं वस्तुनः पारमार्थिकत्वं देशकालयोरसत्त्वप्रसङ्गात्र ह्यनौपाधिको देशः कालश्च देशान्तरे कालान्तरे वा विद्यते। अनौपाधिकदेशकालान्तरस्याभावात्। नन्वौपाधिके तत्तद्देशे तत्तत्काले च तयोरपि वृत्तिः स्यादिति चेन्न। औपाधिकस्यानौपाधिककार्यतया तदाश्रयत्वानुपपत्तेः। किं च श्रुतिरपि न प्रपञ्चाभावः पारमार्थिक इति ब्रूते प्रपञ्चपारमार्थिकतायामपि तथाविधप्रतीतिसंभवेनात्मनोऽद्वितीयत्वपरश्रुत्यन्तरविरोधापत्तेः। ननु प्रपञ्चाभावः पारमार्थिको न प्रपञ्च इति निषेधप्रतीतिवर्णनात् किमिति श्रुत्यन्तरविरोध इति चेत्तर्हि प्रपञ्चः पारमार्थिको न भवतीत्यत्रैव श्रुतेस्तात्पर्यं वर्ण्यतां न प्रपञ्चाभावः पारमार्थिक इत्यत्राप्युभयत्र तात्पर्यकल्पनायां गौरवात्। नचैवं सति प्रपञ्चाभावस्य कथं पारमार्थिकत्वसिद्धिरिति

वाच्यम् । तस्याधिष्ठानमात्रतया अधिष्ठानपारमार्थिकतावगाह्यागमेनैव तत्पारमार्थिकतासिद्ध्युपपत्तेः । ननु निषिद्ध्यमानप्रसक्तिर्नाम तत्प्रतीतिः सा च निषिद्ध्यमानप्रतियोगिनो देश कालान्तरे सत्त्वं विनानुपपन्ना निषेधप्रदेश एव प्रतियोगिनः प्रतीतौ निषेधानुपपत्तेः । न च घटवत्तया प्रतीतदेश एवेह घटो नष्ट इति तन्निषेधवत्तदुपपत्तिरिति वाच्यम् । यत्र हि प्रध्वंसो निषेधविषयः तत्र तथा भवति प्रध्वंसस्य प्रतियोगिसमानदेशत्वात् । यत्र त्वत्यन्ताभावस्तद्विषयस्तत्र न तथात्यन्ताभावस्य प्रतियोगिव्यधिकरणत्वात् । न चात्र प्रपञ्चप्रध्वंसो निषेधप्रतीतिविषयः किन्तु तदत्यन्ताभाव एव प्रध्वंसविषयत्वे सतोपि प्रतियोगिनो ध्वंससंभवेन प्रपञ्चस्य मिथ्यात्वासिद्धिप्रसङ्गात्तस्मान्निषेधानुपपत्त्यैव प्रपञ्चस्यान्यत्र सत्वं सिध्यतीति चेत् । सत्यम् । अत्र प्रतिषेधप्रत्ययेन प्रपञ्चात्यन्ताभावो विषयीक्रियत इति तथापि नान्यत्र प्रपञ्चस्य सत्त्वप्रसक्तिः ब्रह्मण्येव तत्संभवात् । नचैवं सति निषेधानुपपत्तिः न हि प्रपञ्चः प्रपञ्चत्वेन निषिद्ध्यते । येन तत्रैव तत्सत्वे निषेधानुपपत्तिः किन्तु पारमार्थिकत्वाकारेण । ननु येन प्रकारेण प्रपञ्चस्यात्यन्ताभावो वर्ण्यते । तेन प्रकारेण प्रपञ्चस्यात्मनि सत्त्वेन तत्र तदत्यन्ताभावः सिद्ध्यति । अन्यत्र सत्वे तस्यात्मवद्वस्तुतया मिथ्यात्वानुपपत्तिः । उभयत्र चासत्वेऽत्यन्तासतः प्रसक्त्यभावात् तन्निषेधानुपपत्तिरिति चेन्न प्रतियोगिनो हि प्रसिद्धिर्वक्तव्या । प्रतियोगी च प्रपञ्चः आत्मनि सिद्ध एव । ननु प्रतियोगिप्रसिद्धिवत् प्रतियोगितावच्छेदकस्यापि प्रसिद्धिर्वक्तव्येति चेत् । अस्त्येव साप्यात्मन्येव । ननु प्रतियोगितावच्छेदकधर्मविशिष्टतया प्रतियोगिप्रसिद्धिरभावप्रसिद्धावङ्गमिति चेन्न । लाघवात् प्रतियोगितवच्छेदकप्रतियोगिप्रसिद्धिमात्रस्यैवाभावज्ञानकारणत्वात् । सा च क्वचिद्विशिष्टविषयिणी क्वचिद्विशकलितविषयिणीति नानुपपत्तिः । नन्वेवं सति घटवद्भूतले समवायितया घटात्यन्ताभावसत्वात्तत्र घटवत्तया ज्ञान

भ्रान्तिः स्यादिति चेन्न। येनाकारेण यत्र यदत्यन्ताभावः तेनाकारेण तत्र तद्वत्ताप्रतीतिर्हि भ्रान्तिर्भवति च घटस्य भूतल समवेतत्वप्रतीतिर्भ्रान्तिः घटस्य च तत्र स्वरूपेणानिषिद्धत्वान्न तत्र तद्वत्ताप्रतीतिर्भ्रान्तिर्भवति । प्रपञ्चस्य तु वास्तवत्वेन निषेधे अनिषेध्यप्रपञ्चाकारस्याप्यवास्तवत्वमेव घटे भूसमवायित्ववत् तत्र तदभावात् तस्मात्प्रमाणाभावान्नान्यत्र सन्प्रपञ्चः किं च प्रपञ्चस्य ब्रह्मणि प्रतिषिध्यमानस्यान्यत्र सत्त्वानुपपत्तिश्च प्रसक्तं हि प्रतिषिध्यते नाप्रसक्तमिति सर्वसम्मतं प्रसक्तिश्च यत्र प्रतिषेधः तत्रत्यैव कारणमिति परैरप्युपेयते । सा च प्रपञ्चस्यान्यत्र सत्त्वे न संभवति । अन्यथाख्यातेर्निरस्तत्वात् । किं च कार्यं स्वोपादान एव तिष्ठति नान्यत्र निखिलप्रपञ्चोपादानं च ब्रह्मैवातः कथं ब्रह्मणि प्रपञ्चनिषेधेऽन्यत्र प्रपञ्चः सन् भवेत् । तस्मादन्यत्र सत्त्वाभावान्नेतीति वाक्यानुगृहीततत्त्वमादिवाक्यसमुपजातब्रह्मात्मसाक्षात्कारनिवर्त्यतया प्रतिपन्नोपाधौ बाध्यमानत्वाच्च जाग्रन्मिथ्याव्यवहारदशायामबाध्यमानत्वाच्च व्यावहारिक इति भावः ॥ ३६ ॥

ननु प्रतिपन्नोपाधौ बाध्यमानत्वन्न मिथ्यात्वप्रयोजकं बाधो ह्यधिष्ठानतत्त्वज्ञानादारोप्यस्य निवृत्तिर्न हि सा सर्वसंप्रतिपन्नमिथ्याभावे स्वप्ने संभवति इदानीं स्वप्नाधिष्ठानपूर्णात्मतत्त्वज्ञानाभावान्न च स्वप्नस्याहं कर्त्तैवाधिष्ठानमिति वाच्यम्। तथात्वे सर्वस्याप्यहंतासामानाधिकरण्यप्रतीतिप्रसङ्गात् । अहमिति विशेषदर्शनाच्च । अतः कथं प्रतिपन्नोपाधौ बाध्यमानत्वेन जाग्रतो मिथ्यात्वमित्याशङ्क्येदानीं तादृशाधिष्ठानज्ञानासंभवेपि कालान्तरेऽधिष्ठानपूर्णात्मज्ञानादेव स्वप्नस्याप्यात्यन्तिकनिवृत्तेर्नाप्रयोजकत्वमित्यभिप्रेत्याह—

तत्र सत्यमनृतं च भेदतः
प्रत्यगात्मतमसा विकल्पितम् ।

प्रक्षिणोति परमात्मवस्तुगा
बुद्धिवृत्तिरविचालिनी सती ॥ ३७ ॥

तत्र सत्यमिति । तत्र पूर्णात्मनि सत्वद्वैविध्ये वा सत्यं व्यवहारकाल एव सत्यं जाग्रत्पदार्थमनृतं व्यवहारकालेपि सर्वदाऽसन्तं प्रातीतिकं स्वप्नपदार्थं ज्ञाननिवर्त्यत्वे हेतुत्वेन तदुभयं विशिनष्टि—भेदत इत्यादिना । आत्मनः पृथक्त्वेन परस्परवैलक्षण्येन वा प्रत्यगज्ञानेनाऽऽरोपितं प्रक्षिणोति । प्रकर्षेणात्यन्तं निवर्त्तयति मूलाज्ञानेन सह निवर्त्तयतीत्यर्थः । परमात्मवस्तुगा परमात्मविषयिणी बुद्धिवृत्तिः साक्षात्प्रमितिः अविचालिनी परमात्मैक्याकारा । न च प्रतिपन्नोपाधौ बाध्यमानत्वस्य मिथ्यात्वप्रयोजकत्वे स्वप्ने तन्निश्चयाभावात्कथं लौकिकानां तत्र मिथ्यात्वव्यवहार इति वाच्यम् । जागरे उत्तरोत्तर भ्रमनिवर्त्यपूर्वपूर्वभ्रमविषय इव विरोधिज्ञाननिवर्त्यत्वज्ञानादेव तदुपपत्तेः । तज्ज्ञानस्यैव तद्व्यवहारप्रयोजकत्वात् । अत एव जागरे तदभावात् न मिथ्यात्वव्यवहार इतिभावः । अथवा—यदुक्तं न सन् क्वचिदिति तत्रैवोपपत्त्यन्तरमाह—तत्र सत्यमिति । तत्र एवं सर्वस्याप्यवास्तवत्वे सति यद्यात्मनि बाध्यमानः प्रपञ्चोऽन्यत्र सन्नित्युच्यते तदायमनात्मनि विद्यत इति वक्तव्यम् । तत्र संभवति आत्मव्यतिरिक्तस्य सर्वस्याप्यात्मसाक्षात्कारेण बाधितत्वादिति भावः । यद्वा - लोके हि घटादिकार्यं लीयमानं शक्तिमत्कारण एव विलीयमानं दृश्यते । अन्यथा—कालान्तरे कार्योत्पादायोगात् तद्वत्तत्त्वज्ञानेन प्रपञ्चोपि विलीयमानः शक्तिमत्कारणे अविद्याशबले ब्रह्मण्येव विलीयत इति वक्तव्यम् । ततः कथं स्वकारणाज्ञानेन सह बाध इत्याशङ्क्याह—तत्र सत्यमिति । सत्यं कारणं कार्याभावेपि कारणस्य सत्वात् तज्ज्ञानमनृतं कार्यकारणव्यतिरेकेणासत्वादज्ञानस्य स्वपरनिर्वाहकत्वात्प्रत्यगात्मतमसा विकल्पितमिति सत्यस्यापि विशेषणं तत्त्वज्ञानस्याज्ञान-

विरुद्धत्वात्तदपि नाशयत्येव । तथा च नाज्ञानेन सह निवृत्त्यनुपपत्तिरित्यर्थः ॥ ३७ ॥

ननु व्यवहारकाले प्रपञ्चस्य सत्यत्वाङ्गीकारे कथं तथा आत्मनोऽद्वितीयत्वं कथं वा तस्याविद्याकार्यत्वं किंचाविद्यानिवृत्तेः प्रागसत्यायास्तत्त्वबोधसाध्यत्वाङ्गीकारे कथमात्मनः श्रुतिसिद्धनित्यमुक्तता तत्राह—

नित्यबोधपरिपीडितं जग-
द्विभ्रमं नुदति वाक्यजा मतिः ।
वासुदेवनिहतं धनंजयो
हन्ति कौरवकुलं यथा पुनः ॥ ३८ ॥

नित्यबोधेति । नित्यबोधेनानासिद्धिस्वरूपचैतन्येन परिपीडितं वस्तुतो निवर्तितं ज्ञानस्वभावस्याविद्याविरोधिस्वभावात् वृत्यभिव्यक्तचैतन्यस्यैव प्रयोजकत्वात् नित्यबोधपरिपीडितमित्युक्तं तथा च जगतो व्यवहारकाले सत्येऽप्यविद्यायास्तत्त्वसाक्षात्कारेण निवर्त्यमानत्वे च नित्यबोधेन वस्तुतो निवर्त्तितस्यैव प्रपञ्चस्य साक्षात्कारेण निवर्त्यनानात्वान्नाद्वैतक्षतिः । न वा नित्यमुक्तत्वक्षतिरिति भावः । आविद्यकत्वमप्यस्तीत्याह—जगद्विभ्रममिति । जगदेव विभ्रमः अधिष्ठानपूर्णात्मविपरीतरूपत्वेन प्रतीयमानत्वात् । तथा च शुक्तिरूप्यादिवदविद्याकार्यत्वमित्यर्थः । नुदति निवर्त्तयति । वाक्यजा तत्वमादिवाक्यजन्या मतिः साक्षात्कारः । ननु नित्यबोधमहिम्नैवाविद्या तत्कार्यनिवृत्तौ तन्निवृत्तये तत्साक्षात्कारप्रयासो व्यर्थः स्यादित्याशङ्क्य न व्यर्थः प्रतीयमानानिर्वचनीयाकारनिवृत्त्या तदर्थवत्वादित्यभिप्रेत्य वस्तुतोऽन्येन निवृत्तस्यापि प्रतीयमानाकारनिवृत्तिमात्रेण प्रयत्ना-

न्तरस्याप्यर्थवत्त्वे दृष्टान्तमाह—वासुदेवेति । वासुदेवः श्रीकृष्णः तेन हतं संहृतं कौरवकुलं कुरुवंशं धनञ्जयोऽर्जुनः यथा हन्ति तथेत्यन्वयः । तथा चोक्तं भगवता 'द्रोणं च भीष्मं च जयद्रथं च कर्णं तथान्यानपि योधवीरान् । मया हतास्त्वं जही'ति कालरूपिणा मया हतानेव त्वं जहीत्यर्थः । अथवा—ननु बुद्धिवृत्तिः प्रक्षिणोतीत्युक्तमनुपपन्नं बुद्धिवृत्तेर्जडाया अविद्यानिवर्त्तकत्वानुपपत्तेरित्याशङ्क्याह—नित्यबोधेति । नित्यबोधो वाक्यार्थबुद्धिवृत्त्यभिव्यक्तात्मस्वरूपबोधः तेन परिपीड्यमानमित्यर्थः । मतिः अखण्डाकारवृत्तिः । तथा च वृत्तेर्जडत्वेपि वृत्त्यभिव्यक्तचैतन्येनैव प्रपञ्चस्य निवर्त्यमानत्वात् वृत्तेश्च निवर्त्तकचैतन्याभिव्यञ्जकत्वमात्रेणैव निवर्त्तकत्वोक्तेर्नोक्तदोष इत्यर्थः । अन्येन निवर्त्यमानं प्रति सहकारितया प्रयोजकत्वमात्रेण तन्निवर्त्तकत्वोक्तौ दृष्टान्तः—वासुदेवेति । निहतं निहन्यमानं तदुक्तं—भगवता—निमित्तमात्रं भव सव्यसाचिन्निति ॥ ३८ ॥

तदेवं स्वमते जाग्रत्स्वप्नयोस्तत्त्वज्ञाननिवर्त्यतया प्रतिपन्नोपाधौ बाध्यतया च मिथ्यात्वाविशेषेपि व्यावहारिकत्वप्रातीतिकत्वाभ्यामवान्तरविशेषसद्भावात्प्रपञ्चस्य सर्वसंप्रतिपन्नः सत्यमिथ्याविभागः सम्भवतीत्युपपादितमिदानीं प्रतीयमानसत्यमिथ्याविभागान्यथानुपपत्त्यापि प्रपञ्चस्याविद्यकत्वं वक्तव्यमित्यभिप्रेत्य द्वैतसत्यत्ववादितेऽयं विभागो न सिद्ध्यतीत्याह—

सत्यमेवमनृतं च दुर्लभं
ब्रह्मवादिसमयाद्बहिः पुनः ।
सत्यतो यदि मृषा पृथग् भवे-
त्सत्यमेव तदपि प्रसज्यते ॥ ३९ ॥

सत्यमेवमिति । एवं यथाऽस्मन्मते सत्यपदार्थोऽसत्यपदार्थश्च सुलभ

एवं ब्रह्मवादिसमयाद्बहिर्वेदान्तवादादन्यत्र तद्द्वयं सुलभन्न भवति । कथं न भवतीति चेत् तत्र किं सत्याद्वस्तुनो मृषात्वेनाभिमतं वस्तु भिन्नमुताभिन्नमुत भिन्नाभिन्नम्। तत्राद्यमनूद्य दूषयति–सत्यत इति । मृषा मिथ्यात्वेनाभिमतं वस्तु सत्यतः सत्याद्वस्तुनः पृथक् भिन्नं यदि भवेदिति सम्बन्धः। तदपि मृषात्वेनाभिमतं वस्त्वपि सत्यमेव स्यात् सत्यप्रतियोगिको हि भेदः सत्य इत्येव वक्तव्यम्। असत्त्वे तुच्छेन तेन सत्यमिथ्यावस्तुनोः परस्परासंकीर्णत्वानुपपत्तेः । सत्यप्रतियोगिकस्य तस्यासत्वानुपपत्तेश्च । न च भेदोऽनिर्वचनीयः परपक्षेऽनिर्वचनीयत्वाप्रसिद्धेः भेदस्य चानिर्वचनीयत्वाङ्गीकारे किमपराद्धं प्रपञ्चमिथ्यात्वेन तुल्यन्यायत्वात् । सत्यत्वे च तस्य तदाश्रयभूतं मृषात्वेनाभिमतं वस्त्वपि सत्यमेव स्यान्मृषावस्तुनः सत्यधर्माश्रयत्वानुपपत्तेरित्यर्थः ॥ ३६ ॥

अभेदपक्षमनूद्य दूषयति—

सत्यतो यदि मृषा न भिद्यते
सत्यमेव सुतरां तदिष्यताम् ।
न द्वयात्मकतयाऽनृतं मतं
पक्षयोः कथितदूषणद्वयात् ॥ ४० ॥

सत्यतो यदि मृषेति । तच्छब्दो मृषात्वेनाभिमतवस्तुविषयः सत्याद्भेदेपि मृषावस्तुनः सत्यत्वापत्तौ किमु वक्तव्यं तदभेद इत्यभिप्रायेणोक्तं सुतरामिति । भेदाभेदपक्षं दूषयति—न द्वयेति । अनृतमसत्याभिमतं वस्तुद्वयात्मकतया सत्यभिन्नाभिन्नात्मकतया न मतं तत्र हेतुः—पक्षयोरिति । भेदपक्षेऽभेदपक्षे चोक्तस्य सत्यभेदाश्रयत्वात्सत्यं स्यात् सत्याभिन्नत्वात्सुतरां सत्यं स्यादिति दूषणद्वयस्यात्रापि संभवादित्यर्थः । भेदाभेदयोरेकत्र विरोधाच्चेत्यपि द्रष्टव्यम् ॥ ४० ॥

नन्वस्तु मृषावस्तुनोऽपि सत्यत्वं का नः क्षतिरित्याशङ्क्य क्षतिरस्तीत्याह—

वेदवाक्यविषयस्य सत्यता
बुद्धवाक्यविषयो मृषा भवेत् ।
इत्यतः कथयितुं न शक्नुया-
द्ब्रह्मवादिसमयाद्बहिर्मुखः ॥ ४१ ॥

वेदवाक्येति । अत इत्यादौ सम्बन्धनीयम् । यतः सर्वस्यापि सत्यता अतः ब्रह्मवादिसमयाद्बहिर्मुखः समयान्तरनिष्ठो नैयायिकादिः वेदवाक्यविषयस्य वेदवाक्यप्रतिपाद्यज्योतिष्टोमादेरेव सत्यता बुद्धवाक्यप्रतिपाद्यः चैत्यवन्दनादिस्तु मृषैव इत्येवं विभागेन वदितुं समर्थो न भवेत् । तथा च चैत्यवन्दनादेरपि यागादिवदुपादेयतया सुखदुःखादिव्यवस्थाभावात्सर्वसाङ्कर्यापत्तिः स्यादतः सत्यमिथ्याविभागोऽङ्गीकर्त्तव्य इति भावः ॥ ४१ ॥

तस्मात्सर्वसंमतसत्यमिथ्याविभागान्यथानुपपत्त्या प्रपञ्चस्याविद्यकत्वमेव वर्णनीयमित्युपसंहरति—

सत्यमेवमनृतं च भेदतः
कल्पितं भवतु वर्णितान्नयात् ।
तत्र तद्घटयितुं हि शक्यते
नेतरत्र कथितोपपत्तिभिः ॥ ४२ ॥

सत्यमेवमिति । एवं सति प्रपञ्चसत्यत्वपक्षे सत्यमिथ्याविभागासंभवे सतीत्यर्थः । सत्यं सत्यत्वेनाभिमतं जाग्रद्दृष्टवियदादि अग्नि-

होत्रादि चानृतं स्वप्नदृष्टगजादिवस्तुचैत्यवन्दनादि च वर्णितात् न प्रमातरीत्यादिनोपपादितात् नयाद्युक्तेर्भेदतः परस्परभिन्नत्वेन कल्पितमारोपितमेवास्तु। न च कल्पितत्वपक्षेपि सत्यमिथ्यावैलक्षण्यमुपपादयितुमशक्यमिति शक्यं वक्तुं मृषावस्तुनः सत्यप्रतियोगिकानिर्वचनीयभेदाश्रयत्वेन तद्वैलक्षण्यस्य वर्णयितुं शक्यत्वादित्यभिप्रेत्याह—तत्रेति । तत्रारोपितत्वपक्षे तत्सत्यानृतवैलक्षण्यं घटयितुमुपपादयितुं नेतरत्र पक्षान्तरे तदुपपादयितुं न शक्यं तत्र पूर्वोक्तमेव हेतुं स्मारयति—कथितेति । भेदाभेदविकल्पोक्तयुक्तिभिरित्यर्थः ॥४२॥

तस्मात्सर्वस्यापि प्रपञ्चस्यारोपितत्वेन मिथ्यात्वाविशेषेप्युपपादितप्रकारेणावान्तरवैषम्यसंभवात्तन्मात्रेण च लौकिकवैदिकासंकीर्णव्यवहारोपपत्तेः । तदर्थं प्रपञ्चस्याद्वैतश्रुतिविरुद्धपारमार्थिकत्वस्यावक्तव्यत्वात्। परमार्थत्वे चासंकीर्णव्यवहारानुपपत्तेः। प्रत्यक्षादेर्व्यावहारिकमेव प्रामाण्यं न तत्त्ववेदकमित्युपसंहरति—

व्यावहारिकमतोऽवगम्यतां
मानजातमखिलं न तात्त्विकम् ।
बाह्यवस्तुविषयं विरोधतोऽ-
बुद्धबोधविधिशक्त्यसंभवात् ॥४३॥

व्यावहारिकमिति । यतः सर्वस्यापि बाह्यवस्तुनः कल्पितत्वमेव न पारमार्थिकत्वमतस्तद्विषयमखिलं प्रमाणजातं व्यावहारिकमेव न तात्त्विकं न तत्त्ववेदकमित्यवगम्यतामिति सम्बन्धः । अखिलमिति प्रत्यक्षादिप्रमाणापेक्षया, मानजातमिति चक्षुरायवान्तरप्रमाणापेक्षया तत्त्ववेदकत्वाभावे हेत्वन्तरमाह—अबुद्धबोधेति । अबुद्धबोधविधिः अज्ञातार्थविषयज्ञानोत्पादनं तत्र शक्त्यसंभवात् । अज्ञातत्त्ववेदकत्वाभावे हेत्वन्तरमाह—अबुद्धेति । अर्थज्ञापनासंभवादित्यर्थ । तत्र हेतुः—विरोधत इति ।

अज्ञातपदार्थो हि प्रत्यक्तत्त्वं प्रत्यक्षादिकं च परागवबोधनस्वरसं तथा च परागविषयस्य प्रत्यगविषयत्वविरोधात् नाज्ञातार्थबोधकसामर्थ्यसंभवः । तदभावे च न प्रत्यक्षादेस्तत्त्वावेदने प्रामाण्यमज्ञातार्थबोधकस्यैव तत्त्वादित्यर्थः ॥ ४३ ॥

ननु किमिदमज्ञातार्थबोधकत्वं यदभावात्प्रत्यक्षादेरतत्त्वावेदकत्वमुपवर्ण्येत अप्रकाशमानवस्तुविषयत्वमिति चेन्न स्वप्रकाशब्रह्मविषयवेदान्तनामप्रामाण्यप्रसङ्गात् । ननु तद्विषयस्यापि ब्रह्मणः पूर्णानन्दाकारेण प्रकाशमानत्वमस्तीति चेन्न । पूर्णानन्दाकारस्यापि स्वप्रकाशबोधांशाभिन्नतया प्रकाशमानत्वात् । ननु तर्ह्यप्रकाशमानतया प्रतीयमानवस्तुविषयत्वं तदिति चेत् न प्रत्यक्षादेरपि तत्त्वावेदकत्वप्रसङ्गात् । तस्याप्येतावन्तं कालं घटो मया न ज्ञात इत्यप्रकाशमानतया प्रतीयमानघटादिविषयत्वात् । ननु प्रमाणान्तरागोचरविषयत्वं तदिति चेत्किं यदा कदा चित्प्रमाणान्तरागोचरविषयत्वं किं वा स्वसामग्र्यव्यवहितपूर्वक्षणीयप्रमाणान्तरागोचरविषयत्वं न तद्द्वयमपि एकक्षणानुभूतविनष्टघटादिविषयप्रत्यक्षादेरपि तत्त्वावेदकत्वप्रसङ्गात् । अनुमानादिकं चात्मन्यपि तुल्यं तस्मादज्ञातार्थबोधकत्वस्य दुर्निरूपत्वात्तदभावेन प्रत्यक्षादावतत्त्वावेदकत्वं वर्णयितुमशक्यमिति चेन्न भावरूपाज्ञानविषयविषयत्वस्यैवाज्ञातार्थबोधकत्वरूपत्वात् । नन्वेवं सति प्रत्यक्षादेर्व्यावहारिकप्रामाण्यमपि न स्यात् । प्रमाणलक्षणानाक्रान्तत्वात् । न च तत्र प्रमितिजनकत्वमेव प्रमाणलक्षणमिति वाच्यम् । धारावाहिकविज्ञानजनकचक्षुरादेरपि प्रामाण्यप्रसङ्गादिति चेदज्ञातार्थबोधकत्वं हि प्रमाणसामान्यलक्षणं तत्राज्ञातत्वं मुख्यामुख्यभेदेन द्विविधं मुख्यं तावदात्मनः तस्य भावरूपाज्ञानविषयत्वात् । अत एवात्मविषयप्रमाणस्य मुख्यमज्ञातार्थबोधकत्वमिति तत्त्वावेदनप्रामाण्यं अमुख्यं तु घटादेः तस्य भावरूपाज्ञानविषयत्वाभावात् । ननु कथं तर्हि तस्याज्ञातत्वं ज्ञानसामग्रीक्षणतदव्यवहितपूर्वक्षणका-

लीनज्ञानविषयत्वानधिकरणत्वेनेति गृहाण। तथा च घटादेर्मुख्याज्ञातत्वासंभवेपि गौणाज्ञातत्वस्य विद्यमानत्वात् तद्बोधकप्रत्यक्षादेर्व्यावहारिकप्रामाण्यमस्त्येव। नन्वात्मनोपि घटादिवदेवाज्ञातत्वमस्तु विनिगमकाभावात्। तथा च घटादिप्रमाण्यस्य व्यावहारिकत्वे तत्प्रमाणस्यापि व्यावहारिकत्वमेव। तत्प्रमाणस्य च तत्त्वावेदकत्वे घटादिप्रमाणस्यापि तात्त्विकत्वं स्यादिति चेन्न। विनिगमकाभावासिद्धेः न हि स्वप्रकाशस्यात्मनो घटादिवदागन्तुकज्ञानाभावमात्रेणाज्ञातत्वं संभवति। घटादेस्तु ज्ञानाधीनप्रकाशस्य तदभावेन तदुपपद्यते। तथा च भावरूपाज्ञानविषयत्वेनैवात्मनोऽज्ञातत्वं घटादेस्तु उक्तविशेषणविशिष्टज्ञानविषयत्वानधिकरणत्वेन। नन्वेवमपि मुख्यामुख्यविभागो वैपरीत्येन किमिति न स्यादिति चेन्न। भावरूपाज्ञानं हि वस्तुतत्त्वमेव विषयीकरोति तस्यैव नित्यवत् प्रकाशप्रसक्त्याऽज्ञानविषयतौचित्यादतो भावरूपाज्ञानविषयत्वेन प्राप्तमज्ञातत्वमेव मुख्यमागन्तुकज्ञानाभावस्तु अवस्त्वपि विषयीकरोति। कल्पितरजतादावपि तत्सत्वात्। ततस्तत्प्रयुक्तमज्ञातत्वममुख्यमेव। तस्माद्घटादेः प्रत्यक्षादितात्त्विकप्रामाण्यप्रयोजकमुख्याज्ञातत्वासंभवात् न तद्विषयप्रत्यक्षादेस्तत्त्वावेदकत्वमतो न वेदान्तबाध इति परमप्रकृतमुपसंहरति—

एवं न तत्त्वविनिवेदनशक्तियोगः
संभाव्यतेऽनधिगताधिगतेरयोगात्।
मानान्तरस्य सकलस्य ततश्च तेन
बाधस्त्रयीशिरसि वर्णयितुं न शक्यः॥ ४४॥

एवमिति। एवमुक्तप्रकारेण सकलस्य मानान्तरस्य वेदान्तव्यतिरिक्तप्रत्यक्षादिमानस्य तत्त्वविनिवेदनशक्तियोगः तत्त्वावेदनसाम-

र्थसम्बन्धो न सम्भाव्यत इत्यत्र एवं शब्दपरामृष्टं पूर्वोक्तमेव हेतुं स्मारयति—अनधिगतेति। अज्ञातवस्तुबोधनस्यासंभवादित्यर्थः। यतस्तत्त्ववेदकत्वाभावः। ततश्च तेन प्रत्यक्षादिना वेदान्तबाधः वर्णयितुं न शक्यत इत्यर्थः॥ ४४॥

ननु 'तदनन्यत्वमारम्भणशब्दादिभ्यः' 'भावाच्चोपलब्धेरि'तिसूत्राभ्यां कार्यानुगतकारणस्वरूपकार्यसत्तामात्रावगाहिन्याः प्रत्यक्षबुद्धेस्तात्विकप्रामाण्यमङ्गीकृत्य कार्यकारणभेदावगाहिविकल्पबुद्धेर्वाचारम्भणश्रुत्यनुरोधेन तदभावमभिधाय सूत्रकारेण समन्वयस्य प्रत्यक्षादिविरोधः परिहृतः। तत्कथं भवद्भिः प्रत्यक्षमात्रस्य तत्त्ववेदकत्वं निराक्रियत इत्याशङ्क्याह—

आरम्भणादिवचसा खलु निर्विकल्प-
प्रत्यक्षबुद्धिमनुसृत्य विकल्पबुद्धेः।
आभासतां मुनिरुवाच तदास्य भावो
विज्ञायते स्फुटतरो गुडजिह्विकायाम्॥ ४५॥

आरम्भणादीति। तदनन्यत्वमारम्भणशब्दादिभ्य इत्यादिवाक्येन निर्विकल्पप्रत्यक्षबुद्धिं कार्यानुगतकारणस्वरूपकार्यसत्तावगाहिप्रत्यक्षबुद्धिं भेदादिविशेषानवगाहित्वात्तस्या निर्विकल्पकत्वमनुसृत्य प्रमाणमित्यङ्गीकृत्येत्यर्थः। विकल्पबुद्धेः कार्यकारणभेदादिविषयसविकल्पबुद्धेराभासतामप्रमाणतां मुनिर्बादरायणः तदा तदनन्यत्वमित्यादिसूत्रप्रणयनसमयेऽस्य मुनेर्भावोऽभिप्रायः गुडजिह्विकायां निम्बरसायमानजिह्वायां गुडानुलेपनं गुडजिह्विका तस्यां सूत्रकारो ह्यद्वैतप्रत्यङ्मात्रं विषयवेदान्तसमन्वयस्य भेदावगाहिप्रत्यक्षादिविरोधं परिजिहीर्षुः सहसा सकलप्रत्यक्षाप्रामाण्यकथने प्रतिपत्तारव्याकुलचित्तो भविष्यतीति मत्वा गुडजिह्विकान्यायेनादौ कारण-

स्वरूपकार्यसत्तावगाहिप्रत्यक्षस्य प्रामाण्यमङ्गीकृत्य भेदविषयप्रत्यक्षस्य तन्निराचकार न तु वस्तुतस्तत्प्रामाण्यं तदभिप्रेतं प्रत्यङ्मात्रसमन्वयस्य भेदावगाहिप्रत्यक्षेणैव घटादिकार्यानुगतकारणमृत्पिण्डादिस्वरूपसत्वावगाहिनापि विरोधस्याविशिष्टत्वात् । तस्मात्सूत्रकारस्य तत्र तात्पर्याभावान्न तद्विरोध इत्यर्थः ॥ ४५ ॥

ननु भगवान् जैमितिः सत्संयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमिति प्रत्यक्षलक्षणसूत्रेण द्विविधस्यापि प्रत्यक्षस्य तात्त्विकं प्रामाण्यमसूसुचत् । तत्कथं बादरायणस्येत्थं तद्विरुद्धत्वेनाभिप्रायो वर्ण्यत इत्याशङ्क्य जैमिनेरपि प्रत्यक्षस्य व्यावहारिकप्रामाण्य एवाभिप्रायः न तु तत्त्वावेदन इति वक्तुमादौ तेनापि निर्विकल्पकप्रामाण्यमेवाभ्युपेतं न तु सविकल्पकप्रामाण्यमिति तत्कृतलक्षणार्थपरीक्षयाह—

सत्संप्रयोग इति जैमिनिरप्युवाच
यल्लक्षणं तदुभयोः समभेव विद्यात् ।
आपाततस्तदथ युक्तिनिपीडितं स-
त्सन्मात्रसंविदि निषीदति निर्विशङ्कम् ॥४६॥

सत्संप्रयोग इति । इदंचोक्तसूत्रैकदेशग्रहणं लक्षणं प्रत्यक्षलक्षणं तल्लक्षणमुभयोः सविकल्पकनिर्विकल्पकयोरापाततः एव समं विज्ञाय तान्नामेत्यर्थः । सम्यग्विचारे तु नैवमित्याह—तदपीति । प्रत्यक्षलक्षणमपि युक्तिनिपीडितं सद्युक्तया सम्यग्विचारेण संकुचितं सत् सन्मात्रसंविदि कारणस्वरूपसत्तामात्रविषयनिर्विकल्पप्रत्यक्षे निषीदति पर्यवस्यति । सत्ता अबाधितेनार्थेनेन्द्रियस्य यः सन्निकर्षः तज्जन्यं ज्ञानं प्रत्यक्षमिति हि प्रत्यक्षलक्षणसूत्रार्थः । स चाबाधितार्थो न सविकल्पकविषयः सामान्यादिर्भवेदिति सामान्यादेर्वृत्त्यादिविकल्पेन

दुर्निरूपत्वान्निर्विकल्पकविषयस्तु कारणस्वरूपमात्रमबाधितमतस्तत्प्रयोगस्यैव सत्संप्रयोगत्वात्तज्जन्यं निर्विकल्पमेव प्रत्यक्षं प्रमाणमिति तदभिमतं न तु सविकल्पकं तत्र तदुक्तप्रत्यक्षलक्षणाभावादित्यर्थः ॥ ४६ ॥

नन्वस्तु निर्विकल्पकमेव प्रत्यक्षं प्रमाणमिति तदभिमतं न तु सविकल्पकं तत्र तदुक्तप्रत्यक्ष (लक्षणस्याभावात्) तथापि द्विविधप्रत्यक्षस्यापि तत्त्वा वेदकत्वाभावोक्तिर्विरुद्धत इत्याशङ्क्य निर्विकल्पकप्रामाण्यमपि विचार्यमाणे व्यावहारिकमित्येव तदभिमतं न तत्त्ववेदनमतो न विरोध इत्यभिप्रायेणाह—

तत्रापि दुर्घटमवैति यदा तु तत्त्व-
बोधं विवक्षति विसृज्य विकल्पजालम् ।
किं कारणं वदति येन स तत्त्वगामि-
विज्ञानमर्थमवबोधयदप्रबुद्धम् ॥ ४७ ॥

तत्रापीति । निर्विकल्पकप्रत्यक्षेपि दुर्घटं प्रत्यक्षलक्षणमिति शेषः । अवैति जानाति जैमिनिरित्यनुषज्यते कदा जानातीत्याकाङ्क्षायामाह—यदात्विति । तत्त्वबोधं परमार्थाद्वितीयबोधं विवक्षति अभिप्रैति । यदा तु जैमिनिर्वेदान्तजन्यपरमार्थवस्तुतत्त्वबोधमभिप्रैति तदा घटादिविषयनिर्विकल्पकप्रामाण्यमपि न तात्त्विकमवैति । तद्विषयस्य घटादिस्वरूपस्यातत्त्वेनावधारणादित्यर्थः । एवं तस्याभिप्रायवर्णने किं बीजमिति पृच्छति—किं कारणमिति । निर्विकल्पके प्रत्यक्षलक्षणस्य दुर्घटतां जानातीत्यत्र किं कारणं किं लिङ्गमित्यर्थः । तद्वचनगतमेव लिङ्गमाह—वदतीति । येन हेतुना स जैमिनिः तत्त्वगामि तत्त्वविषयम् अप्रबुद्धमज्ञातं यतो जैमिनिरज्ञातमर्थमवबोधद्विज्ञानमेव तत्त्वज्ञान-

मित्याह तत एवं ज्ञायते । नूनं वेदान्तानामेव तात्त्विकं प्रामाण्यं तदभिमतमज्ञातार्थविषयत्वात् न निर्विकल्पकप्रत्यक्षस्यापि तद्विषयस्याज्ञातत्वाभावादित्यर्थः ॥ ४७ ॥

जैमिनिना कुत्रैवमुक्तमित्याकाङ्क्षायामाह—

औत्पत्तिके हि भगवानयमप्रबुद्ध-
मर्थं प्रमाणविषयं कथयांबभूव ।
अत्राऽऽह तत्र ननु धर्मगतं प्रमाणं
तत्त्वार्थगामि कथितं न परात्मगामि ॥ ४८ ॥

औत्पत्तिक इति । औत्पत्तिकसूत्रे हिः प्रसिद्धौ । अयं जैमिनिः अर्थेऽनुपलब्धे तत्प्रमाणमित्यत्र ह्यज्ञातार्थगन्तृ प्रमाणमिति जैमिनिनोक्तमित्यर्थः । ननु जैमिनिवचनादेव प्रत्यक्षादेस्तत्त्वावेदकत्वपरित्यागे तस्मादेव वचनाद्धर्मविषयप्रमाणस्यैव तत्त्वावेदकत्वं स्यात् न ब्रह्मप्रमाणवेदान्तस्येत्यभिप्रेत्य चोदयति—अत्राऽऽहेति । एवं स्थिते किमाहेत्याकाङ्क्षायामाह-तत्रेति । औत्पत्तिकसूत्रे । नन्विति प्रसिद्धौ धर्मगतं धर्मविषयं तत्त्वार्थगामि तात्विकवस्तुविषयं परात्मगामि परमात्मविषयमौत्पत्तिकसूत्रे हि धर्मविषयप्रमाणस्य चोदनाया एव तात्विकं प्रामाण्यमुक्तं तस्या एव प्रकृतत्त्वात् न ब्रह्मप्रमाणस्य तथा च ब्रह्मप्रमाणस्यापि तात्विकत्वं न स्यादित्यर्थः ॥ ४८ ॥

परिहरति—

सत्यं यदाह पितृमान् व्यवहारदृष्टि-
माश्रित्य तत्कथितवान्प्रकृतोपयोगात् ।

दूरप्रसरितनिसृष्टनिगूढभाव-
स्तद्बादरायणमतानयनात्प्रतीमः ॥ ४६ ॥

सत्यमिति । औत्पत्तिकसूत्रे धर्मविषयस्य प्रामाण्यमेवोक्तमिति पितृमान् शिक्षितबुद्धिः भवान् यदाह तत्सत्यं कथं तर्हि भवदिष्टसिद्धिस्तत्राह—व्यवहारेति । व्यवहारानुकूलदृष्टि तद्धर्मप्रमाणस्य तात्त्विकत्वमेवं कथने हेतुमाह—प्रकृतोपयोगादिति । धर्मानुष्ठानानुकूलप्रकृतधर्मविचारोपयोगादित्यर्थः । जैमिनिराचार्यो हि धर्मविचाराय प्रवृत्तो धर्मे प्रतिज्ञातचोदनाप्रामाण्यानुरोधेन धर्मविषयप्रमाणं तत्त्वावेदनमित्याह—अन्यथा प्रकृतविचारासंगतेः । न हि धर्मविचारं प्रतिज्ञाय तत्प्रमाणमतत्त्वावेदकमित्युक्तिः शोभामावहति । अतो वस्तुतो तत्त्वावेदनमपि धर्मप्रमाणं धर्मस्य व्यावहारिकसत्यतामाश्रित्य तत्त्वावेदनमित्युक्तं न तु वेदान्तानामतत्त्वावेदकत्वाभिप्रायेण वस्तुतो जैमिनेरपि वेदान्तानामेव तत्त्वावेदनप्रामाण्यमित्यत्रैव तात्पर्यमित्याह—दूरप्रसारितेति । दूरेऽप्रकृतत्वात् गभीरत्वाच्च दूरभूते वेदान्तार्थे प्रसारितो विस्तारितो निसृष्टः स्वाभाविको निगूढो नितरां गूढो भावोऽभिप्रायो यस्य स तथोक्तः । यदि जैमिन्याचार्यस्य वेदान्ततत्त्वावेदनप्रामाण्य एव दृष्टिः तर्हि किमिति तेन मुखतो नोक्तमित्याशङ्क्योक्तं—निगूढेति । अप्रकृतत्वात्प्रकृतानुपयुक्तत्वात् प्रकृतविरुद्धत्वाच्च तन्मुखतो नोक्तमित्यर्थः । नन्वेवन्तस्याभिप्राय इति कुतो हेतोर्ज्ञायते तत्राह—तद्बादरायणेति । तद्व्यवहारिकदृष्टिमाश्रित्यैव कथितमित्येतद्बादरायणमतानयनात् बादरायणस्यानपेक्षत्वादिति प्रमाणतया बादरायणमतस्याङ्गीकारात् बादरायणस्य चात्मविषयवेदान्तानामेव तत्त्वावेदनप्रामाण्यस्याभिमतत्वात् । वस्तुतस्त्वस्याप्येवंरूपत्वाज्जैमिनेरप्यभिप्राय एवमेवेति जानीम इत्यर्थः ॥ ४६ ॥

नन्वात्मा वाऽरे द्रष्टव्य इत्यादौ आत्मातिरिक्तनियोगस्यापि तत्त्वावेदनवेदान्तमेयत्वं गम्यते अतस्तन्न्यायेनानात्मविषयप्रत्यक्षादेरपि तात्त्विकत्वं किं न स्यादित्याशङ्क्याह—

द्रष्टव्य इत्यपि विधिर्न विधिप्रमेय-
मात्मानमेव विनियच्छति तत्कुतश्चेत् ।
अज्ञातता च परमात्मन एव यस्मा-
द्यस्माच्च कर्तृवशवर्ति न दर्शनं तत् ॥ ५० ॥

द्रष्टव्यइत्यपीति । द्रष्टव्य इति विधिरपीति सम्बन्धः । द्रष्टव्य इत्यादितव्यप्रत्ययोपीत्यर्थः । विधिप्रमेयं विधिर्नियोगः प्रमेयं यस्य विधिप्रत्ययस्य तमात्मानं स्वात्मानं नियच्छति नियमयति । किन्त्वात्मपर एवेत्यर्थः । अथवात्मानं परमात्मानं विधिप्रमेयं विधीयमानदर्शनविषयतया न नियच्छति न विनियुङ्क्ते इत्यर्थः । विधिः प्रमेयमिति व्यस्तपाठे द्रष्टव्य इत्यादिविधिरपि न विधिर्न विधायकः न नियोगप्रतिपादकः किन्त्वात्मानं परमात्मानमेव प्रमेयं नियच्छति तात्पर्येण प्रतिपादयतीत्यर्थः । उभयत्रापि हेतुं पृच्छति—तत्कुतश्चेदिति । तद्विधिवाक्यस्यापि न नियोगपरत्वं किन्त्वात्मपरत्वमेवेत्येतत् कुतः कस्माद्धेतोरिति चेदित्यर्थः । द्वितीयस्योत्तरमाह—अज्ञाततेति । आद्यस्योत्तरमाह—यस्माच्चेति । कर्तृवशवर्त्यनुष्ठातृपुरुषपरतन्त्रं दर्शनं ज्ञानं तत्तस्मात् ॥ ५० ॥

ननु द्रष्टव्यादिविधेर्नियोगपरत्वनिराकरणे तव्यादिप्रत्ययस्य का गतिः कथं वा तस्यात्मपरत्वं तत्राह—

अहे कृत्यतृचश्च पाणिनिवचः स्पर्धं विधत्ते यत-
स्तस्माद्दर्शनयोग्यतां वदति न स्तव्यो न तत्त्वान्तरम् ।

तस्मादात्मपदार्थमात्रनियतं मेयत्वमेकान्ततो
द्रष्टव्यादिवचो वदत्यनुभवादज्ञात आत्मा यतः ॥५१॥

अर्ह इति । अर्हार्थान् कृत्यतृचः कृत्प्रत्ययान् तृचप्रत्ययं च पाणिनिवचः अर्हे कृत्यतृचश्चेति सूत्रं तथा च तव्यादिप्रत्ययस्य नियोगपरत्वनियमाभावात् अर्हार्थत्वेन गतिरित्याह—दर्शनयोग्यतामिति । मुमुक्षुणा द्रष्टुं योग्य आत्मेन्यात्मनो दर्शनयोग्यतां वदति । तथा चात्मपरत्वं सम्भवतीत्यर्थः । नः अस्माकं तव्यः द्रष्टव्य इत्यादि तव्यप्रत्ययः न तत्त्वान्तरमात्मातिरिक्तं नियोगाख्यं वस्तु नः प्रतिपादयतीत्यर्थः । तथा च वेदान्तानामात्मपरत्वेनैव तत्त्ववेदनप्रामाण्यमित्युपसंहरति—तस्मादिति । यस्माद् द्रष्टव्य इत्यादितव्यप्रत्ययः आत्मनो दर्शनयोग्यतामेव वदति न नियोगमतस्तस्मादात्मपदार्थमात्रनियतं परमात्मैकनिष्ठं मेयत्वं तात्विकमेयत्वमेकान्ततस्तात्पर्यतः द्रष्टव्यादिवाक्यमात्मनो वैदान्तैर्दर्शनयोग्यतां वदत् आत्मन एव वेदान्तप्रमेयत्वं तात्पर्येण वदतीत्यर्थः । आत्मनो ज्ञातत्वे मानमाह—अनुभवादिति । नित्यानुभवात् साक्षिणः । तथा च द्रष्टव्यादिवचोदृष्टान्तेनापि प्रत्यक्षादेस्तात्विकप्रामाण्यमित्यर्थः ॥ ५१ ॥

नन्वेवं सति सत्संप्रयोग इत्यादिजैमिनीयप्रत्यक्षसूत्रं व्यर्थम् । आत्मन एव तात्विकप्रमेयतया सत्त्वेन तदतिरिक्तसतोऽभावादित्याशङ्क्य पारमार्थिकसत्त्वाभावेऽप्यापेक्षिकसत्त्वमादायैव तल्लक्षणस्य प्रवृत्तत्वान्न वैयर्थ्यमित्यभिप्रेत्याह—

रूपादिविभ्रममपेक्ष्य हि शुक्तिकादौ
सत्संप्रयोगजनितैव तु बुद्धिवृत्तिः ।

तामप्यपेक्ष्य सति संहृतसर्वभेदे
सत्संप्रयोगजनिता मतिरभ्युपेया ॥ ५२ ॥

रूप्यादिविभ्रमेति । शुक्तिकादौ शुक्तित्वादिविशिष्टशुक्तिकादिविषये बुद्धिवृत्तिः शुक्तित्वादिसामान्यविशिष्टाकारबुद्धिवृत्तिः यद्यपि शुक्तित्वादिसामान्यस्य वृत्तिविकल्पादिना दुर्निरूपतया तद्विशिष्टस्याप्यसत्वमेव तथापि तस्य तदप्रतिसंधानदशायाम् तत्रारोपितसत्त्वेन स्पष्टं रजताद्यपेक्षतया सत्वमिति कृत्वा तत्संप्रयोगजन्यं सविकल्पकज्ञानं सत्संप्रयोगजनितमिति प्रत्यक्षप्रमाणमित्युच्यत इत्यर्थः । ततोऽपि व्यक्तिमात्रविषयस्य निर्विकल्पकस्य सत्संप्रयोगजत्वमस्तीत्याह—तामप्यपेक्ष्येति । तां सामान्यविषयसविकल्पकबुद्धिवृत्तिं सति व्यक्तौ संहृतसर्वभेदे निराकृत सामान्यादिसकलभेदकधर्मे संहरणं च विद्यमानस्यापि सामान्यादेरविषयीकरणमात्रं सामान्यादिकमविषयीकृत्य केवल, व्यक्तिमात्रविषयिणी मतिरित्यर्थः । तत्संप्रयोगे तत्र तच्छब्देन सदुच्यते । सत्संप्रयोगेति च पाठः व्यक्तः सामान्यवद्वृत्तिविकल्पादिना दुर्निरूपत्वाभावत्तस्मादपि तस्याः सत्वमिति तद्विषयं निर्विकल्पकज्ञानं तत्संप्रयोगजमभ्युपेयमित्यर्थः ॥ ५२ ॥

निर्विकल्पस्यापि सत्संप्रयोगजत्वं वस्तुतो नास्तीत्याह—

वेदान्तवाक्यजनितां परमात्मबुद्धि-
वृत्तिं व्यपेक्ष्य पुनरत्र न काचिदस्ति ।
सत्संप्रयोगजनिता भुवनत्रयेऽपि
बुद्धिस्तमोविरचितं हि जगत्समस्तम् ॥ ५३ ॥

वेदान्तेति । परमात्मबुद्धिवृत्तिं परमात्मविषयबुद्धिवृत्तिं व्यपेक्ष्य अपेक्ष्यात्र भुवनत्रयेपि काचिद् बुद्धिः सत्संप्रयोगजनिता नास्तीति सम्बन्धः । तत्र हेतुमाह—तमोविरचितमिति । अविद्याकल्पितं हि यतः तथा च कल्पितस्य वस्तुसत्त्वानुपपत्तेः । व्यक्तेरपि तमोविरचितत्वात् न तन्मात्रविषयनिर्विकल्पकरूपापि बुद्धिः वस्तुनः प्रमा आत्मनस्त्वकल्पिततया सदा सत्त्वात् तद्विषयिणी बुद्धिर्वस्तुतः प्रमैवेत्यर्थः ॥५३॥

नन्वेवमपि धर्मस्य चोदनाप्रमेयत्वेनापूर्वतया मुख्याज्ञातत्वसंभवेन च तद्विषया धीस्तत्त्वमतिरेव स्यादित्याशङ्क्याह—

धर्मेऽपि तत्त्वमतिरेव तु चोदनायाः
सत्त्वादिवस्तुनि यथाऽज्ञानिबन्धना धीः ।
अज्ञातनापि सदृशी व्यवहारकाले
तत्त्वावबोधसमये न तु तत्त्वबुद्धिः ॥ ५४ ॥

धर्मेऽपीति । चोदनाया इति हेतुपञ्चमी धीरित्येतदत्राप्यनुषञ्जनीयम् अपिशब्दोऽत्र सम्बध्यते चोदनाजन्या धीरपीत्यर्थः । सदृशी सत्त्वादिवस्तुसदृशी व्यवहारकाल एवेति सम्बन्धः । धर्मचोदनाजन्या धीरपि सत्त्वादिजातिधीवत् बाधितविषयत्वात्स्वप्रमेयस्यतद्वदेव भावरूपाज्ञानविषयत्वाभावाच्च । व्यवहारकाल एव तत्त्वमतिरित्यर्थः । एवकारव्यावर्त्यमाह—तत्त्वावबोधेति । तत्त्वसाक्षात्कारसमये धर्मबुद्धिरपि तत्त्वबुद्धिर्न भवतीत्यर्थः ॥ ५४ ॥

ननु घटादेरज्ञातत्वाभावेन तद्विषयप्रत्यक्षादेस्तत्त्वावेदनप्रामाण्यनिराकरणमनुपपन्नं घटादेः सत्यत्वेन तद्विषयप्रामाण्यस्यापि तात्त्विकत्वावश्यंभावात् । न च तत्सत्यत्वमापेक्षिकं परमार्थसद्ब्रह्मपरिणामत्वेन घटादेरपि परार्थसत्त्वादित्याशङ्क्य विवर्त्तवादाश्रयणेन

परिणामवादस्य निराकृतत्वान्नैवमित्यभिप्रेत्यारम्भणाद्यधिकरणसिद्धमर्थं दर्शयति—

आरम्भणादिवचनं सकलं प्रवृत्तं
प्रत्यक्षबुद्धिविषयादपहर्त्तुमुच्चैः ।
तत्त्वं यथोदितनयेन विवर्त्तवाद-
माश्रित्य सत्यपरिणामनिवारणेन ॥ ५५ ॥

आरम्भणादीति । तदनन्यत्वमारम्भणशब्दादिभ्यः भावे चोपलब्धेरित्यादिसूत्रं प्रत्यक्षबुद्धिविषयाद् घटादेस्तत्त्वं परमार्थत्वमपहर्त्तुमिति सम्बन्धः उच्चैः स्पष्टं यथोदितनयेन यथावत्तत्र तत्रोक्तन्यायेन विवर्त्तवादं स्वस्वरूपापरित्यागेनानिर्वचनीयरूपान्तरप्राप्तिलक्षणविवर्त्तसिद्धान्तं सत्यपरिणामनिवारणेन सत्यो यः परिणामः तत्त्वतोऽन्यथाभावस्तन्निराकरणेनारम्भणादिसूत्रं यथोक्तन्यायेन परिणामनिराकरणपूर्वकं विवर्त्तवादमाश्रित्य घटादेः परमार्थसत्वं पराकर्त्तुं प्रवृत्तमिति न घटादेः परमार्थसत्वमित्यर्थः—अयम्भावः । उत तमादेशमप्राक्ष्यः येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति । यद्विज्ञानात् सर्वविज्ञानं तत्किं त्वं जानासीत्युद्दालकश्वेतकेतुसंवादेन एकविज्ञानेन सर्वविज्ञानप्रतिज्ञामवतार्य श्रुतिः स्वयमेव भेदप्रपञ्चस्यासत्यतोपवर्णनेन तामुपपादयति यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्यादिना । तस्य चायमर्थः । यथा घटादिविकारो न तत्कारणमृदादेः पृथक् सन् किन्तु केवलं वाचामुकोयममुकोयमित्यारभ्यते । अत एव विकारघटादिस्वरूपमृदादिज्ञानात् घटादिस्वरूपं ज्ञातं भवति । तथा ब्रह्मकार्यं जगदपि न ब्रह्मव्यतिरेकेण पृथक् सत् किन्तु ब्रह्मैव तत्स्वरूपं ततः तर्ह्यनेन सर्वविज्ञानमुपपन्नमिति । एतच्च विवर्त्तवादाश्रयण एव

सङ्गच्छते। परिणामपक्षे तु कार्यस्य कारणात् पृथक्सत्त्वेनान्यविज्ञानेनान्यविज्ञानायोगात् प्रतिज्ञाश्रुतिः पीड्येत। किं च मृदादिकारणे विद्यमाने उपलभ्यमान एव च घटादिकार्ये विद्यते उपलभ्यते च नान्यथेति सर्वसंमतम्। एतच्च घटादेर्मृदाद्यात्मकत्व एव संभवति न तु तदन्यत्वे। नन्वन्यस्मिन्नग्नौ सत्येवान्यस्य धूमस्य स्थितिर्दृश्यत इति चेन्न—विनष्टेऽपि वह्नौ गगनविपरिवर्त्तिधूमोपलम्भात्। ननु समवायोपाधिक एवायं नियम इति चेन्न। एवमप्यन्यत्वप्रयुक्तनियतानुपलम्भदूषणस्यानिवृत्तत्वाद्यस्मात् भिन्नं तत्तस्मिन्नुपलभ्यमान एवोपलभ्यते नेति व्याप्तेः कुलालघटादौ दर्शनात्। ननु तत्रासमवायित्वमुपाधिरिति चेन्न—गन्धतद्वतोः साध्याव्यापकत्वात् न हि गन्धाश्रये गृह्यमाण एव गन्धो गृह्यते। न च तत्रासमवायित्वमस्तीति। किंचोत्पत्तेः पूर्वं कारणे कार्यं सदेवेति वक्तव्यमसत उत्पत्त्यनुपपत्तेः। ननु सतोप्युत्पत्तिरनुपपन्नेति चेन्न—अभिव्यक्तेरेवोत्पत्तिपदार्थत्वात्। अभिव्यक्तिश्चान्धकारावृतघटस्येव प्रदीपादिना कारणव्यापारेण विद्यमानस्यैवोपपद्यते। नन्वभिव्यक्तेरप्यसत्त्योत्पत्तिरनुपपन्नेति चेन्न—अभिव्यक्तेरनिर्वचनीयत्वेनासत्वाभावात्। ननु पूर्वं कारणे कार्यस्य नात्यन्तासत्वं येनोत्पत्तिर्न स्यात् किन्तु तस्मिन् तत्प्रागभाव एवेति चेन्न। कारणावस्थाव्यतिरिक्तप्राग भावसत्वे प्रमाणाभावात्। ननु कार्यानुपलब्धिरेव तत्र प्रमाणमिति चेन्न। विद्यमानस्याप्यन्धकारावृतवस्तुवदनभिव्यक्तत्वेनानुपलम्भोपपत्तेः। न चात्र विनिगमकाभावः असत्त्वकल्पनातः कार्यस्य सत्त्वकल्पनाया एव लघुत्वेन लाघवस्यैव विनिगमकत्वात्। न चात्राप्यनभिव्यक्तिरभावः कल्पनीयः। तस्य त्वन्मतेपि समत्वात्। तथा च कार्यस्य स्वोत्पत्तेः पूर्वं सत्त्वे कारणस्वरूपमेव कार्यसत्तेति वक्तव्यमन्यस्यानुपलम्भात्। न हि मृत्पिण्डव्यतिरेकेण घटो नाम कश्चिदुत्पत्तेः पूर्वं तत्रास्ति। ततः कार्यस्य कारणस्वरूपातिरेकेण सत्त्वा-

दपि जगत्कार्यं स्वकारणात् ब्रह्मणः पृथक् सन्न भवति। तथा च श्रुतिरपि सदेव सोम्येदमग्र आसीदिति सच्छब्दपरामृष्टब्रह्मणेदं-शब्दपरामृष्टस्य जगतः सामानाधिकरण्येनाभेदमेव दर्शयति। अभेदश्च जगतो ब्रह्मव्यतिरेकेणासत्त्व एव संगच्छते पृथक्सतोरैक्यानुपपत्तेः। तथा च यत्सत् तत्सर्वदा सर्वत्र सदेव भवति यथात्मा न हि सतः क्वचित्कदाचिदसत्वं संगच्छते। सतोऽसत्वधर्मित्वानुपपत्तेः। यच्च क्वचित्कदाचिदसत् तत्सर्वदा सर्वत्रासदेव यथा गन्धर्वनगरादि न ह्यसतः सत्वाश्रयत्वमुपपद्यत इति कार्याकारस्य स्वोत्पतेः पूर्वं कारणव्यतिरेकेणासत्वे ततः परमपि तद्व्यतिरेकेण कार्यमसदेव प्रतीयमानाकारस्त्वनिर्वचनीयः। तस्मादात्मन एव परमार्थसत्वाज्जगतश्च तत्परिणामत्वाभावेन तादृशसत्त्वाभावान्न प्रपञ्चविषयप्रमाणस्य तत्त्वावेदनत्वम्। ननु सच्च त्यच्चाभवदिति जगतो ब्रह्मपरिणामत्वं श्रूयते। परिणामश्च परिणामसमानसत्ताको जगति विख्यायते ततः परमार्थसद्ब्रह्मपरिणामजगदपि परमार्थसदेव। न च जगतो ब्रह्मणः पृथक् सत्वे एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा पीड्येत अन्यज्ञानादन्यज्ञानायोगादिति वाच्यम्। परिणामवादे कार्यकारणयोरभिन्नत्वस्यापि सत्त्वेन तदुपपत्तेः। अत एवात्मैवेदं सर्वम् ऐतदात्म्यमिदं सर्वमित्यादिरपि संगच्छते। अतः कथं प्रपञ्चविषयप्रत्यक्षादेरतत्वावेदकत्वमिति चेत्तत्र किं सत्यज्ञानानन्दब्रह्मस्वरूपे स्थित एव ब्रह्मणो जगदाकारेण परिणामित्वं श्रुतिराचष्टे। किं वा तस्मिन्विनष्टे। आद्ये। नामान्तरेण विवर्तवाद एवाश्रितो भवति। लोके रज्ज्वादिस्वरूपे सति सर्पादिरूपान्तरापत्तेर्विवर्तत्वदर्शनाद्दध्याद्याकारेण परिणामिनि क्षीरादौ क्षीरस्वरूपदर्शनाच्च। द्वितीये जगदुपादानब्रह्मणोऽसत्वेन जगतः स्थित्यनुपपत्तिः। प्रलयकाले शून्यपरिशेषापातश्च। ननु ब्रह्मणो नात्यन्तमसत्वं तस्य प्रपञ्चाकारेणैव वर्त्तमानत्वात्। अतो न जगतः स्थित्यनुपपत्तिः। नापि शून्यपरिशेषापातः प्रपञ्चाका-

रेणैव वर्तमानस्य ब्रह्मणः पुनः प्रलयकाले सत्याद्याकारेण परिणामित्वादिति चेन्न तथात्वे सत्यादिस्वरूपस्य कार्यतया विनाशप्रसङ्गेन मोक्षाभावप्रसङ्गात्। निरवयवस्य तस्य सावयवपृथिव्याद्याकारेण परिणामानुपपत्तेश्च। ननु मृत्पिण्डे घटाद्याकारेण परिणाममाने तदवयवा अपि परिणमन्त इति वाच्यम्। अवयवविकारं विना अवयविविकारानुपपत्तेः एवं तत्तदवयवपरिणामे च तत्तदवयवा अपि परिणमन्त इति निरवयवपरिणामसिद्धिरिति चेत्तत्र परिणामो नाम यदि स्वावयवानां स्वावयवसंयोगेन सम्मूर्छितावस्थानमित्युच्यते तदा कथं निरवयवस्य तत्सम्भवः। अवयवाभावात्। यदि द्रव्यान्तरोत्पत्तिः तदावयविनि परिणममानेऽवयवानामपि परिणाम इत्येतन्न संभवति। तथा हि किं घटव्यतिरिक्तद्रव्यान्तरोत्पत्तिरवयवपरिणामः किं वा घटोत्पत्तिरेव। नाद्यः। तादृशद्रव्यान्तरोत्पत्त्यदर्शनात्। मृत्पिण्डस्य च पूर्वमेव सिद्धत्वात्। न द्वितीयः। तस्य मृत्पिण्डपरिणामत्वात्। किंच निरवयवद्रव्यमागन्तुकहेतुना संबध्य परिणमते। उतासंबध्य। नाद्यः। निरवयवस्य हेतुसंबन्धानुपपत्तेः। न द्वितीयः। सर्वदा परिणामप्रसङ्गात्। अज आत्मा महान् ध्रुवः कूटस्थमचलं ध्रुवमित्यादिश्रुतिस्मृतिविरोधाच्च। न वस्तुतो रूपान्तरापत्तिलक्षणपरिणामो ब्रह्मणः संभवति। किं च परिणामपक्षे कार्यकारणयोर्भेद एव वक्तव्यः। अभेदे कार्यकारणभावानुपपत्तेः। तथा चैकविज्ञानेन सर्वविज्ञानप्रतिज्ञाश्रुतिबाधः। ऐतदात्म्यमिदं सर्वमित्यादिश्रुतिविरोधश्च। ननु कार्यकारणयोर्भेदाभेद एव तथा च भेदस्य विद्यमानत्वात्कार्यकारणभावः अभेदस्य विद्यमानत्वात् प्रतिज्ञादिकमपि सिद्धयतीति चेन्न। एकत्र भेदाभेदयोर्विरुद्धत्वेनासम्भवात्। ननु नास्ति विरोधः। अनुभूयमानत्वात् अनुभूयते हि हेमपरिणामरुचकस्वस्तिकादौ हेमाकारेणाभेदः रुचकस्वस्तिकाद्याकारेण भेदश्च नह्यनुभवसिद्धे विरोधः कश्चिदस्तीति चेत्तत्र किं

रुचकाकारस्य हेमाकारात् भेदोऽभेदो वा । आद्ये न रुचकस्य स्वस्तिकाभेदः संभवति । तदनुगतहेमाकाराद्भिन्नत्वात्प्रतिज्ञाश्रुतिश्च पीड्येत। कारणाकारात् कार्याकारस्य भिन्नत्वात् । द्वितीये हेमाकारवद्रुचकाकारस्यापि स्वस्तिकेऽनुवृत्तिप्रसङ्गः । तस्मान्परिणामपक्षस्यानुपपन्नत्वाद्विवर्तवादे चोक्तदोषाभावेन तस्यैवाङ्गीकार्यत्वात् प्रत्यक्षादेर्न तात्त्विकविषयत्वमित्यारम्भणाद्यधिकरणसिद्धमिति ॥ ५५ ॥

नन्वारम्भणादिनये कारणसत्ताव्यतिरिक्तकार्यसत्तैव निराक्रियते न विवर्त्तवादाश्रयणं तत्र प्रतीयते । तदाश्रयणेपि निराकार्यत्वेनैव तदाश्रयणं किं न स्यादतः कथं विवर्त्तवादमाश्रित्यारम्भणाद्यधिकरणं प्रवृत्तमित्युक्तम् तत्राह—

वाक्यप्रवृत्तिमनुसृत्य च सूत्रकाः
सिद्धान्ततामनयदत्र विवर्त्तवादम् ।
तत्त्वप्रकाशनविधावपहृत्य शक्ति-
मारम्भणादिवचनादरप्रमायाः ॥ ५६ ॥

वाक्यप्रवृत्तिमिति । वाचारम्भणं विकारो नामधेयमित्यादि तदनन्यत्वमारम्भणेति मूलवाक्यप्रवृत्तिं तद्वाक्यार्थमिति यावत् । अत्रारम्भणाधिकरणे नयतेर्द्विकर्मकत्वाद्विवर्त्तवादं सिद्धान्ततामनयदित्युक्तं विवर्त्तवादं सिद्धान्तत्वेन प्रापितवानित्यर्थः । उक्तं स्मारयन् विवर्त्तवादाश्रयणे बीजमाह—तत्त्वप्रकाशनविधाविति । अपरप्रमाया वेदान्तव्यतिरिक्तप्रत्यक्षादिजन्यप्रमायाः तत्त्वप्रकाशनविधौ शक्तिं तत्त्वाभिव्यक्तिकरणे सामर्थ्यमारम्भणादिवचनादपहृत्य इति सम्बन्धः । यद्यप्यारम्भणाधिकरणे कारणसत्ताव्यतिरिक्तकार्यसत्तानिराकरणमेव मुखतः प्रतीयते तथापि तन्निराकरणमुखेन विवर्त्तवादोप्यङ्गीकृत एव तस्य

सूत्रस्य शब्दतोऽर्थतश्च वाचारम्भणश्रुतितुल्यतया तन्मूलकत्वात् । तस्याः श्रुतेश्च विकारो नामधेयमात्रं न परमार्थसदित्येवंरूपार्थतया विवर्त्तपरत्वात् । तन्मूलकसूत्रस्यापि श्रुतिसमानार्थतया विवर्तपरत्वस्यैव युक्तत्वात् । कार्यस्य पृथक्सत्तानिराकरणाच्च । न च तस्य पूर्वपक्षत्वेनैवाश्रयणमद्वैतब्रह्मसमन्वयप्रतिप्रत्तिशेषत्वेन सिद्धान्तत्वात् । अन्यथा कारणसत्ताव्यतिरिक्तकार्यसत्तानिराकरणस्यैवानुपपत्तेः । उतरत्र स्ववचसैव तद्व्युत्पादनानुपपत्तेश्च इत्यर्थः ॥ ५६ ॥

नन्वारम्भादिपक्षोपि प्रामाणिको भवति अक्षपादादिपरमर्षिभिरङ्गीकारात्तत्कथं विवर्त्तवाद एव सिद्धान्ततया बादरायणसंमत इति शङ्कित्वा त्तदङ्गीकारमङ्गीकरोति—

आरम्भसंहतिविकारविवर्त्तवादा-
नाश्रित्य वादिजनता खलु वावदीति ।
आरम्भसंहतिमते परिहृत्य वादौ
द्वावत्र संग्रहपदं नयते मुनीन्द्रः ॥ ५७ ॥

आरम्भेति । वादशब्दः प्रत्येकमभिसम्बध्यते । तत्रारम्भवादो नाम मृदादौ कारणे प्रागसदेव घटादिकार्यं समवाय्यसमवायिनिमित्तकारणैरारभ्यत इति वादो नैयायिकाद्यभिमतः । संहतिवादो नाम खरस्नेहोरणस्वभावानां चतुर्विधपरमाणूनां पृथिव्यादिरूपेण संघातः रूपविज्ञानवेदनासंज्ञासंस्कारलक्षणपञ्चस्कन्धानामाध्यात्मिकसर्वव्यवहारास्पदभावेन संघात इतिवादो वैभाषिकसौत्रान्तिकसंमतः । परिणामवादो नाम मृदादिकारणं वस्तुतो घटाद्याकारेण परिणमत इति वादस्तत्त्वतोऽन्यस्यान्यात्मतालक्षणः कपिलाद्यभिमतः । विवर्तवादो नाम—कारणवस्तु भ्रान्त्या कार्यात्मना प्रतीयत इतिवादोऽतत्त्वतोऽन्यस्यान्यात्मतालक्षणो वैदिकशिरोमणिश्रीमद्बादरायणसम्मतः ।

वादिजनता वादिजनानां समूहः तत्तद्वादीति यावत् । खलु प्रसिद्धौ । वावदीति भृशं व्यवहरति । तर्हि कथं विवर्त्तवादस्यैव सिद्धान्तत्वं तत्राह—आरम्भसंहतिमते इति । अद्वैतसमन्वयानुपयुक्तत्वादत्यन्तमनुपपन्नत्वाच्चेति शेषः । आरम्भवादसंघातवादौ परिहृत्य विहाय द्वौ वादावारम्भादिद्वयव्यतिरिक्तौ परिणामविवर्त्तलक्षणौ । अत्रारम्भणाद्यधिकरणे संग्रहपदं संग्रहणमाश्रयणं तत्पदं तद्विषयत्वं नयते प्रापितवान् । वादद्वयं संगृहीतवानित्यर्थः ॥ ५७ ॥

ननु परिणामवादस्याप्यङ्गीकृतत्वे विवर्तवाद एव सिद्धान्तत्वेनाङ्गीकृत इति कथमुक्तमित्याशङ्क्य प्रतिपत्त्राशयानुरोधेन परिणामवादस्याभ्युपगमवादत्वान्न दोष इत्यभिप्रेत्याह—

तत्रापि पूर्वमुपगम्य विकारवादं
भोक्त्रादिसूत्रमवतार्य विरोधनुत्त्यै ।
प्रावर्तत व्यवहृतेः परिरक्षणाय
कर्मादिगोचरविधावुपयोगहेतोः ॥ ५८ ॥

तत्रापीति । तयोः परिणामविवर्त्तवादयोर्मध्येऽपि पूर्वमादौ विकारवादं परिणामवादमुपगम्याभ्युपगम्य । नन्वारम्भणाद्यधिकरणे परिणामाभ्युपगमो न प्रतीयत इत्यत आह—भोक्त्रादीति । भोक्त्रापत्तेरविभागश्चेत्स्यात् लोकवदित्यादिसूत्रम् । नन्वभ्युपगमवादेन समाश्रिते परिणामवादे आरम्भादिवादस्यापि समाश्रयणं किं न स्यात्तत्राह—विरोधनुत्त्येति । अद्वैतसमन्वयस्य भेदावगाहिप्रत्यक्षादिविरोधपरिहाराय प्रावर्त्तत प्रवृत्तवान् । आरम्भवादे हि समाश्रिते तत्परिहारो न भवेत् कार्यकारणयोरत्यन्तं पृथक् सत्वात् परिणामवादे तु कार्यकारणयोरभेदस्यापि सम्भवात् तत्परिहारो भवतीति स एवाश्रित इत्यर्थः ।

प्रयोजनान्तरमाह—व्यवहृतेरिति । भोक्तृभोग्यादिव्यवस्थितव्यवहारस्य-परिरक्षणायाबाधनाय । ननु मा भूद्व्यवहारपरिरक्षणं प्रयोजनाभावादित्याशङ्क्याह—धर्मादीति । धर्मोऽग्निहोत्रादिः आदिपदेनोपासना गृह्यते । तद्गोचरस्तत्प्रतिपादको यो विधिः कर्मवाक्यमुपासनावाक्यं च तस्मिन्नुपयोगाद्धेतोर्व्यवहारपरिरक्षणं कर्त्तव्यमित्यर्थः । इदमत्र विवक्षितम् । गुणोपसंहारपादे हि क्रममुक्तिविषयाण्यभ्युदयफलानि चोपासनावाक्यानि विचार्यन्ते । उपासनायां च भोक्तृभोग्यादिव्यवस्थापेक्ष्यते । अन्यथोपासनाऽयोगात् । तदभावे च क्रममुक्त्याद्यभावप्रसङ्गात् । एवं कर्मविधावपि भोक्त्रादिविभागोऽपेक्ष्यते । अन्यथा तदननुष्ठानप्रसङ्गेन वेदान्तापेक्षितविशिष्टाधिकार्यलाभप्रसङ्गात् । तस्य कर्माधीनत्वात् । ततः कर्मोपासनाविध्यपेक्षितभोक्त्रादिविभागसिद्धौ सत्यपरिणामवादोभ्युपगतः विवर्त्तवादे च सर्वस्यापि मिथ्यात्वात् भोक्त्रादिव्यवस्था न सिद्ध्येदिति मन्दमतेर्भ्रान्तः स्यादिति तदाशयानुरोधेन सोऽङ्गीकृत इति ॥ ५८ ॥

ननु तर्हि परिणामवादेनैव विवर्त्तवादप्रयोजनस्यापि सिद्धत्वात किं विवर्त्तवादाश्रयणेनेत्यत आह—

साक्षादिहाभिमतमेव विवर्त्तवाद-
माहत्य सूचयति पूर्वमपेक्षमाणः ।
आरम्भणादिवचनेन विवर्त्तवादं
शङ्कोति वक्तुमुदिते परिणामवादे ॥ ५९ ॥

साक्षादिति । इह वेदान्ते आरम्भणाधिकरणे वा पूर्वविकारवादमपेक्षमाणः सन्साक्षान्मुख्यत्वेनाभिमतं विवर्त्तवादमेवाहत्यायमेव सिद्धान्त इति पिण्डीकृत्य सूचयतीति सम्बन्धः । यद्यपि परिणाम-

वादे कारणैक्यं सिध्यति तथाप्येकरसब्रह्मात्मैक्यं विवर्त्तवादं विना न सिद्ध्यति विकारवादे कारणस्य ब्रह्मणोऽनेकरसत्त्वापत्तेः कार्यस्यापि पृथक्सत्वेन प्रत्यक्षादिविरोधस्यापरिहार्यत्वाच्च । अतस्स एव मुख्यत्वेनाङ्गीकृत इत्यर्थः । तर्हि विवर्त्तवादस्यैव प्रथमसूचनं किं न स्यात्तत्राह—आम्भणादीति । परिणामवाद उदिते प्रतिपादिते सति अधिकार्यारम्भणादिवचनेन विवर्त्तवादं वक्तुमनायासेन गृहीतुं शक्नोतीति पूर्वमपेक्षमाण इति सम्बन्धः । परिणामवादाङ्गीकारेण ब्रह्मणः प्रपञ्चाकारत्वे वर्णिते तस्यावास्तवत्वमात्रमेव ज्ञातव्यमिति विवर्त्तवादो ग्रहीतुं सुकरो भवति । अतः परिणामवाद एव प्रथममाश्रित इत्यर्थः ॥ ५६ ॥

श्रुत्याप्येवमेवाध्यारोपापवादन्यायेन परिणामपुरस्सरमेव विवर्त्तवादस्य व्युत्पादितत्वादयं क्रमो न्याय्य इत्यभिप्रेत्याह—

आरुह्य भूमिमधरामितराधिरोढुं
शक्येति शास्त्रमपि कारणकार्यभावम् ।
उक्त्वा पुरा परिणातिप्रतिपादनेन
संप्रत्यपोहतिविकारमृषात्वसिद्ध्यै ॥ ६० ॥

आरुक्षेति । आश्रित्य भूमिवत् भूमिं सत्वव्यवस्थास्पदत्वाद धरामधस्तनामितरोर्ध्वां भूमिः अधिरोढुमाश्रयितुं शक्या शास्त्रं तदैक्षत बहु स्यां प्रजायेय इत्यादिवक्ष्यमाणश्रुतिः अपिशब्दः सूत्रापेक्षया यथा लोके सोपानपर्वारोहणेऽधस्तनपर्वाननारुह्योत्तरपर्वारोहणं दुष्करं तदारुह्य तु तदा तत्सुकरम् । एवमेव पूर्वभूमिस्थानीयपरिणामवादे आरूढे ऊर्ध्वभूमिस्थानीयविवर्त्तवादोऽधिरोढुं सुकर इति कृत्वा श्रुतिः पुरा आदौ-परिणतिप्रतिपादनेन परिणामव्युत्पादनेन कारणकार्यभावमुक्त्वेदानीं

सम्प्रति तदनन्तरं विकारमृषात्वसिद्धये कार्यस्यातात्विकत्वसिद्धये चैतदात्म्यमित्यादिनाऽपोहति निषेधति। तथा च श्रुत्याप्येवं व्युत्पादितत्वात् विवर्त्तहेतुत्वेनादौ परिणामवादाङ्गीकरणमुचितमिति भावः॥ ६०॥

ननु कथं विवर्त्तवादस्य हेतुः परिणामः यावता तत्त्वतोऽन्यथाभावः परिणाम इति परिणामलक्षणमाचक्षते स्वयं च वक्ष्यति न हि कार्यस्य तात्विकत्वं विवर्त्तवाद उपयुज्यते इत्यत आह—

विवर्त्तवादस्य हि पूर्वभूमि-
र्वेदान्तवादे परिणामवादः।
व्यवस्थितेऽस्मिन्परिणामवादे
स्वयं समायाति विवर्तवादः॥ ६१॥

विवर्त्तवादस्येति। हिशब्दः प्रसिद्धौ पूर्वभूमिः कारणमित्यर्थः। व्यवस्थिते-निश्चिते। स्वयम्-अनायासेन। यद्यपि तत्त्वतोऽन्यथाभावः परिणाम इति तल्लक्षणमन्ये संगिरन्ते तथापि वेदान्तवादे विवर्त्तात्मकप्रपञ्च एव व्यवहारदृष्ट्या सत्यतया प्रतिपन्नः परिणाम इत्युच्यते। तन्मते वस्तुतोऽन्यथाभावासंभवात्। तथा च परिणामज्ञानस्य निषेध्यज्ञानत्वेन विवर्त्तवादे उपयोगोऽस्तीति स एव प्रथममङ्गीकृत इति भावः॥ ६१॥

ननु हेतुत्वेपि किमर्थं प्रथमं तदङ्गीकरणमित्याशङ्क्य हेतोः प्रथमं निरूपणीयत्वे लोकप्रसिद्धिं वदन् प्रकृतमुपसंहरति—

उपायमातिष्ठति पूर्वमुच्चै-
रुपेयमाप्तुं जनता यथैव।

श्रुतिर्मुनीन्द्रश्च विवर्तसिद्ध्यै
विकारवादं वदतस्तथैव ॥ ६२ ॥

उपायमिति । हेतुमातिष्ठत्यनुतिष्ठति पूर्वमुपेयसिद्धेः पूर्वमुचैः स्पष्टमुपेयं साध्यं जनता जनसमूहः श्रुतिः सृष्टिश्रुतिः वदत इति द्विवचनं यथा लोकः साध्यप्रेप्सया साधनमेव पूर्वमनुतिष्ठति न तु साध्यं तथा विवर्त्तवादसिद्धये तद्धेतुः परिणामवादः प्रथममङ्गीकृत इत्यर्थः । तस्मादारम्भादिवादस्य लोकसिद्धत्वेपि विवर्तवाद एव सिद्धान्त इति भावः ॥ ६२ ॥

इदानीं विकारवादव्युत्पादनस्याभ्युपगमवादत्वं दर्शयितुं मतभेदं विविच्य दर्शयति-

आरम्भवादः कणभक्षपक्षः
संघातवादस्तु भदन्तपक्षः ।
सांख्यादिपक्षः परिणामवादो
वेदान्तपक्षस्तु विवर्तवादः ॥ ६३ ॥

आरम्भवाद इति । कणभक्षः कणादमुनिः इदं चाक्षपादादेरप्युपलक्षणम् । भदन्तः सुगतः । सांख्यादीत्यादिपदेन भट्टभास्करौ गृह्येते ॥ ६३ ॥

तस्माद्विकारवादस्य सांख्यादिपक्षत्वात्तदङ्गीकारो विवक्षितसिद्ध्यर्थमभ्युपगमवादत्वेनैव न तु सिद्धान्तत्वेनेत्याह—

विकारवादं कपिलादिपक्ष-
मुपेत्यवादेन तु सूत्रकारः ।

श्रुतिश्च संजल्पति पूर्वभूमौ
स्थित्वा विवर्त्तप्रतिपादनाय ॥ ६४ ॥

विकारवादमिति । कपिलो नाम सांख्यदर्शनकर्त्ता । आदिशब्देन भट्टादिरुच्यते । तुशब्दोऽवधारणे । उपेत्यवादेनैव संभाषते न तु सिद्धान्तत्वेनेत्यर्थः ॥ ६४ ॥

नन्वन्यथाभावस्योभयत्रापि तुल्यत्वात्कथं परिणामविवर्त्तयोर्भेद इत्याशङ्क्याद्यायां लक्षणभेदाद् भेद इत्यभिप्रेत्यादौ परिणामलक्षणमाह—

अभेदिनः सावयवस्य सत्य-
विचित्ररूपान्तरदर्शकत्वम् ।
वदन्ति धीराः परिणाममस्या-
वसुंधराया इव सस्यसृष्टिम् ॥ ६५ ॥

अभेदिन इति । उत्पद्यमानकार्याभिन्नस्यैकस्येति वा सावयवस्यावयवसहितवस्तुनः सत्यविचित्ररूपान्तरदर्शकत्वं पारमार्थिकविविधाकारान्तरापन्नत्वम् । अत्र वस्तुनः सत्यरूपान्तरापत्तिः परिणाम इति-लक्षणं विवक्षितम् । न चारम्भेऽतिव्याप्तिः रूपान्तरपदेनोत्पद्यमानकार्यं कारणस्याकारान्तरमात्रमेव न तु पृथगाकारीत्यर्थस्य प्रतिपादितत्वात् । अन्यथाऽभेदिन इत्युक्तिविरोधात् । आरम्भवादे च कार्यस्य कारणात् पृथगाकारित्वात् । नापि विवर्त्तेऽतिव्याप्तिः । सत्यपदादेव तन्निरासात् । संघाते च रूपान्तरापरयभावान्न तत्राप्यतिव्याप्तिः । अत इतरद्विशेषणं संभवाल्लक्षणोपपादनार्थं वाऽनूदितमिति द्रष्टव्यम् । तत्रोदाहरणमाह—अस्या वसुन्धराया इति । यथा वसुन्धराया भूमेः परिणामः सस्यसृष्टिः ओषध्युत्पादः । तद्वदोषधीनां पृथ्वीपरिणामत्वं यथा पृथिव्यामोषधयः संभवन्तीति श्रुतिसिद्धम् ॥ ६५ ॥

विवर्त्तस्य लक्षणमाह—

अभेदिनो निर्विकृतेरनेक-
मृषास्वरूपान्तरदर्शकत्वम् ।
विवर्तशब्दार्थ इह प्रसिद्ध-
स्तरङ्गभेदादिव चन्द्रभेदः ॥ ६६ ॥

अभेदिनो निर्विकृतेरिति । निर्विकृतेर्निर्विकारस्यानेकमृषास्वरूपान्तरदर्शकत्वं बहुविधमिथ्याभूताकारान्तरापन्नत्वमिह वेदान्ते अत्र निर्विकृते रूपान्तरापत्तिर्विवर्त्त इति लक्षणमभिमतं निर्विकारस्य वस्तुतः आकारान्तरापत्त्ययोगादर्थसिद्धं मृषात्वमाह—मृषेति । तथा च स्वरूपापरित्यागेन रूपान्तरप्राप्तिर्विवर्त्त इति लक्षणं सूचितं भवति । अथवा—मृषारूपान्तरापत्तिर्विवर्त्त इत्येव लक्षणमभिमम् । मृषात्वमुपपादयितुं निर्विकृतेरिति । आरोप्यस्याधिष्ठानव्यतिरेकेण सत्वं नास्तीति दर्शयितुम्—अभेदिन इति । तथा चातत्वतोऽन्यथाभावो विवर्त्त इतिलक्षणं सूचितं तत्रोदाहरणमाह—तरङ्गभेदादिवेति । यथैकस्मिन्नेवाविकारिणि चन्द्रे तरङ्गाद्युपाधिभेदेन प्रतीयमानचन्द्रनानात्वं मृषारूपं विवर्त्तः तद्वदित्यर्थः ॥ ६६ ॥

श्रुतिः परिणामवादाङ्गीकारेण कार्यकारणभावमुक्त्वा विकारमृषात्वसिद्धौ तन्निषेधतीत्युक्तं तत्र का वा श्रुतिरेतादृशीत्याकाङ्क्षायामाह-

अहं प्रजायेय बहु स्वयं स्या-
मित्यादिनाऽऽदौ परिणाममुक्त्वा ।
विकारमिथ्यात्वमथ ब्रुवाणा
विवर्त्तवादं श्रुतिरानिनाय ॥ ६७ ॥

अहमिति । तदैक्षत बहु स्यां प्रजायेयेत्यादेरनुकरणमहं प्रजायेयेत्यादिद्विविधप्रपञ्चसृष्टिरनया प्रतिपाद्यते । आदिपदेन द्वे वावेत्यादि गृह्यते । अथ परिणामकीर्त्तनानन्तरं विकारमिथ्यात्वं ब्रुवती श्रुतिः स यश्चायं पुरुषे ऐतादात्म्यमिदं सर्वं स एष नेति नेत्यादिः । तदैक्षत बहु स्यां प्रजायेयेत्याद्या श्रुतिरात्मन एव प्रपञ्चाकारेण बहुभवनं दर्शयन्तो व्यवहारसत्यरूपं परिणाममुक्त्वा तत उपदर्शितविकारमिथ्यात्वं वक्तुं विवर्तवादमानीतवती । तथा च विवर्त्तवाद एव सिद्धान्त इति भावः ॥ ६७ ॥

विवर्त्तवादेऽनन्यथासिद्धं श्रुत्यन्तरं तादृशस्मृतिं च प्रमाणत्वेनोपन्यस्यति—

मायाश्रुतिस्मृतिवचः सकलं तथा च
वस्तुत्वमर्दनपरं घटते विवर्त्ते ।
सर्वस्य कारणविकारविभागभाजः
प्रागादृतस्य परमार्थतया प्रतीतेः ॥ ६८ ॥

मायेति । मायाया जगत्कारणत्वबोधकश्रुतिस्मृतिवाक्यं मायाश्रुतिवचः तच्च इन्द्रो मायाभिः पुरुरूप ईयते । मायां तु प्रकृतिं विद्यादित्यादिकम् । चशब्दोऽप्यर्थः । तथा च यथा नेह नानेत्यादिकं विवर्ते घटते तथेदमपि वाक्यं तत्र प्रमाणं घटत इत्यर्थः । तद्वाक्यस्य तत्प्रमाणत्वे हेतुमाह—सर्वस्य कारणविकारविभागभाजो वस्तुत्वमर्दनपरमिति । कार्यकारणविभागवतः प्रपञ्चस्य वास्तवत्वनिराकरणपरम् । निषेध्यस्य वास्तवत्वस्य प्रसक्तिमाह-प्रतीतेः परमार्थतया प्रागादृतस्येति । प्रतीत्यनुरोधेन परमार्थत्वेन प्रागभ्युपगतस्येन्द्रो मायाभिरित्यादिश्रुतिस्मृतिवचनं परमार्थतया प्रतिपन्नस्य विकारजातस्य भाविकत्वं निराकुर्वन्विवर्तवाद एव संगच्छते । अन्यथा मायिकत्वप्रदर्शनानु

पपत्तेः । नच मायायाः सत्यत्वात् तत्प्रदर्शनं विकार एवोपपन्नमिति वाच्यम् । तत्सत्यत्वस्य निराकरिष्यमाणत्वात् तस्मान्मायाश्रुतिस्मृतिबलादपि विवर्त्तवाद एव सिद्धान्तः न परिणामवादः । तथा च तदङ्गीकरणं सिद्धान्तोपयोगित्वेनेत्यर्थः ॥ ६८ ॥

ननु तर्हि संघातादिवादस्यापि परिणामवादवत् कथञ्चित्सिद्धान्तोपयोगित्वेनाङ्गीकरणसंभवात्सूत्रकारेण स कथं त्यक्त इत्याशङ्क्य संघातादिवादस्यैवानुपपन्नत्वादित्यभिप्रेत्य संघातानुपपत्तिं सूत्रोक्तां तावदाह—

संघातवादमुपगम्य तु तत्र पक्षे
संहन्त्रभाव इति सूत्रकृदाह दोषम् ।
स्थायी भदन्तसमये न हि कश्चिदत्र
संघातसंजननशक्तिसमन्वितोऽस्ति ॥ ६९ ॥

संघातवादमिति । उपगम्येति—पूर्वपक्षत्वेनेत्यर्थः । संहन्त्रभाव इति दोषमिति सम्बन्धः । संघातवादे संहननहेतोः कस्यचिदसंभवात्सोऽनुपपन्न एवेत्यर्थः । ननु किमिति संघातहेत्वभाव इति चेत्तत्र वक्तव्यम् । किं संहन्यमानपदार्थ एव तद्धेतुः किं वा चित्तं किं वा तदतिरिक्तः स्थाय्यात्मा । नाद्यः । संघताधिष्ठातुः कस्यचिदभावेऽचेतनानां पदार्थानां स्वतःसंघातानुपपत्तेः । न हि जातु संभवति दण्डचक्रादिकं स्वतएवाधिष्ठातारं किञ्चिद्विना घटादिसंघातहेतुरिति । अत एव न द्वितीयः । चित्तस्याप्यचेतनत्वात् । ननु चित्तं तत्तद्विषयसन्निधाने सत्यभिज्वलद्दण्डादिकारणचक्रं यथा कार्याय पर्याप्तं तथा व्यापारयतीति । चित्ताभिज्वलनमेव तद्धेतुर्भविष्यतीति चेन्न । अन्योऽन्याश्रयात् । तत्तद्भूतभौतिकसंघातरूपविषयेन्द्रिय-

सन्निधाने सति चित्ताभिज्वलनं सति च तस्मिन् तत्संघात इत्यभिप्रेत्य तृतीयं दूषयति—स्थायीति। हि यस्मात्संघातसंजननशक्तिसमन्वितः संघातोत्पादनसामर्थ्ययुक्तः यदि संघाताधिष्ठाता कश्चित्स्थायी स्यात् स्यात्तन्निमित्तः संघातः स एव नास्ति। तन्मते सर्वस्यापि क्षणिकत्वात्। ननु कार्योत्पत्तेःपूर्वक्षणवृतित्वमेव कारणस्यापेक्ष्यते न तु कार्यकाले सत्वमपि पूर्वक्षणवृतित्वं च क्षणिकस्यापि संभवति अतस्तादृशाधिष्ठातृनिमित्तः संघातः स्यादिति चेन्न। सव्यापारस्यैव संघातयितृत्वाद्व्यापारस्य च क्षणमात्रापवर्गिण्यसंभवात् तन्निमित्तसंघातानुपपत्तेः। किं च न कारणमात्रस्य पूर्वक्षणस्थायित्वमात्रेणानुमनुयायिकारणस्य कार्यकालावस्थायित्वावश्यंभावात्। अन्यथा-कार्यस्य स्वतन्त्रतापत्तेः। न च निर्हेतुक एव संघात इति वाच्यम्। सर्वदापि संघातप्रसङ्गात्। तस्मात्संघातवादस्यानुपपन्नत्वादेव सूत्रकारेण स त्यक्त इति भावः॥ ६६॥

ननु संघातवादस्यानुपपन्नत्वेन त्यागेप्यारम्भवादस्य सोपपत्तिकत्वात् तत्त्यागोऽनुपपन्न इति चेन्न। तस्यापि निराकृतत्वात्। किञ्चारम्भवादे हि कारणगुणाः स्वपृथक्भूतानेव कार्ये गुणानारभन्त इति पटादिकार्ये तन्त्वादिकारणानामप्यनुस्यूतत्वेन गुणानां द्विगुणीकृत्य वृत्तिर्वक्तव्या। तथा च तुलिततन्तुभिरारब्धे पटादौ गुरुत्वद्वयोपलम्भप्रसङ्गः। पटसंयोगिनि भूतलादौ पटसमवायितन्तुतत्समवाय्यंशुकादेरपि संयुक्ततया मूर्त्तद्रव्यस्यैकत्र युगपदवस्थानविरोधभङ्गप्रसङ्गश्चेत्येवमादिदोषस्य सत्त्वेनारम्भवादस्यानुपपन्नत्वात्। ननु विवर्त्तवादोप्यनुपपन्नः। कार्यस्योपादानकारणसमानधर्मत्वनियमेन चेतनब्रह्मकार्यस्य जगतोऽपि चेतनत्वापत्तेरिति चेत् न हि मायावादेऽयन्नियमः। अघटितघटनापटीयस्त्वान्मायायाः तथा च वक्ष्यति। "खमपि खादति खण्डितमीक्षते निजशिरोनयनेन करार्पितम्। किमपि दुर्घटमस्य न विद्यते यदि विमूढमतिर्भवति स्वयम्" इति स्वद्रीत्यापि

नायं नियमः । परिमण्डलपरमाणुजन्यद्वणुके अणुपरिमाणवत् द्वयणुकजन्यत्र्यणुके च पारिमाण्डल्याणुत्वयोरदर्शनादिति वैशेषिकमतानुसारेण तदुद्भावितदोषपरिहारं सूत्रकृतोक्तमाह—

आरम्भवादमुपगम्य तदीययुक्ते-
स्तत्प्रक्रियामनुसरन्व्यभिचारमाह ।
वैशेषिकं प्रति महद्वदिदं हि योज्यं
यद्वापि दीर्घवदिदं जडमित्यनेन ॥ ७० ॥

आरम्भवादमुपगम्येति । तदीययुक्तेः कार्यस्य कारणसमानधर्मकत्वमितिवैशेषिकोक्तन्यायस्य तत्प्रक्रियां वैशेषिकप्रक्रियां वैशेषिकं प्रति केन सूत्रेण तदीयन्यायस्य व्यभिचारमाहेत्याकाङ्क्षायां तत्सूत्रमर्थतोऽनुक्रामति—महद्वदित्यादिना । महद्वदणुद्रव्यादुत्पद्यमानमहत्परिमाणद्रव्यवदिदं चेतनादुत्पद्यमानं जडं योज्यम् । यद्वा दीर्घवत् ह्रस्वद्रव्यात् परमाणुत्रयाद्योत्पद्यमानदीर्घपरिमाणद्रव्यवदिदं जडं योज्यमिति । अनेन महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्यामित्यनेन सूत्रेणेत्यर्थः ॥ ७० ॥

उदाहृतसूत्रं व्याचक्षाणस्तत्तत्प्रक्रियाव्यभिचारमेव विशदयति—

ह्रस्वारब्धं त्र्यणुकमणुभिस्तद्वदारब्धमेत-
दूह्यस्वं नो तन्न च तदणुवत्संमतं तद्वदेतत् ।
सर्वं कार्यं गगनधरणीमध्यगं चेतनोत्थं
निश्चित्कं नो जडिमघटितं युक्तमित्याचचक्षे ॥ ७१ ॥

ह्रस्वारब्धमिति । ह्रस्वपरिमाणस्य द्वयणुकैकपरिमाणत्वात्तदन्यत्र तद्व्यवहारस्य भाक्तत्वात् । ह्रस्वशब्देन द्वयणुकान्युच्यन्ते । तैरारब्धं

त्र्यणुकमतीन्द्रियावयवसमवेतदीर्घमहद्द्रव्यं तद्वद्यथा द्व्यणुकैरारभ्यते तद्वदणुभिस्त्रिभिः परमाणुभिः एतत्र्यणुकमारब्धमिति केचित् । तत् त्र्यणुकं नो ह्रस्वं न ह्रस्वपरिमाणवत् । तत्र्यणुकं न चाणुवश्चाणुपरिमाणवत् । एतच्चोदाहरणं द्व्यणुकस्याप्युपलक्षणम् । द्व्यणुकं हि परिमण्डलाभ्यां परिमाणुभ्यामारभ्यते । न च तत्परिमण्डलमिति । तथा च यथा पारिमाण्डल्यादिकारणगुणस्य कार्ये स्वसमानजातीयगुणारम्भकत्वनियमो नास्ति । तद्वच्चेतनजन्यप्रपञ्चेऽपि न चैतन्यनियम इति । दार्ष्टान्तिकमाह—तद्वदित्यादिना । अत्रःयद्वदित्यध्याहार्यम् । एतत् परिदृश्यमानं गगनधरणीमध्यगं गगनं च धरणी च तन्मध्यगतं वाय्वादि चेत्यर्थः । चेतनोत्थं चेतनादात्मनः सभूतं सर्वं कार्यं निश्चित्कं चेतनशून्यमत एव जडिमघटितं जाड्ययुतं नश्चेतनकारणवादिनामस्माकं युक्तमुपपन्नमित्याचचक्षे सूत्रकार इतिशेषः ॥७१॥

एवं कारणगुणानां कार्ये स्वसमानजातीयगुणारम्भकत्वनियमो नास्तीत्युक्त्वेदानीं द्व्यणुकादिनिष्ठ ह्रस्वादिपरिमाणस्य- कारणगतपरिमाणजन्यत्वाभावे तत्कारणं किमिति वीक्षायां कारणं प्रदर्शयन् कार्यगुणानामपि स्वसमानजातीयकारणगुणारब्धत्वनियमो नास्तीत्याह—

ह्रस्वाणुत्वे कारणद्वित्वहेतो-
र्जाते नैते पारिमाण्डल्यहेतोः ।
दीर्घत्वं यद्वच्च दीर्घे महत्वं
द्रव्ये ते द्वे कारणत्रित्वहेतोः॥ ७२ ॥

ह्रस्वाणुत्वे इति । ह्रस्वत्वाणुत्वे द्व्यणुकगते, इति शेषः । कारणद्वित्वहेतोः कारणपरिमाणद्वयसमवेतद्वित्वाख्यसंख्यालक्षणहेतोः एते ह्रस्वाणुत्वे परिमाण्डल्यहेतोर्द्व्यणुककारणीभूतपरमाणुगतपारिमाण्ड-

व्यलक्षणपरिमाणाद्धेतोर्न जाते कार्यपरिमाणं हि कारणगतद्वित्वादि-संख्याप्रयुक्तसंयोगमहत्त्वान्यतमेनारभ्यते । तत्र द्व्यणुकपरिमाणे ह्रस्वत्वादौ कार्यसमवेततया कार्यत्वेन निश्चिते तदारम्भकं परिमाणु-द्वित्वमेव वक्तव्यम् । परिमाणुपरिमाणस्य नित्यपरिमाणत्वेनानारम्भ-कत्वात् । प्रशिथिलावयवसमवायिप्रचयसंयोगस्य च परिमाणाव-संभवात् । ततः कार्यगुणानां स्वसमानजातीयकारणगुणारभ्यत्व-नियमस्तत्रैव व्यभिचरतीत्यर्थः । व्यभिचारस्थलान्तरमाह —दीर्घत्वमिति । द्रव्ये त्र्यणुकलक्षणे यद्दीर्घत्वं यच्च दीर्घे तस्मिन्महत्त्वं ते द्वे दीर्घत्व-महत्त्वे कारणत्रित्वहेतोः त्र्यणुककारणीभूतद्व्यणुकादिनिष्ठत्रित्वसंख्या-लक्षणहेतोः जाते कार्यगतमहत्त्वादिकं हि कारणगतबहुत्वमहत्त्वप्रचय-संयोगान्यतमेनैव भवति । त्र्यणुककारणद्व्यणुके च महत्त्वप्रचययो-रभावात्तत्त्रित्वाख्यं बहुत्वमेव त्र्यणुकगतमहत्त्वाद्यारम्भकमिति वक्त-व्यम् । अतस्तत्रापि पूर्वोक्तनियमो व्यभिचरित इत्यर्थः ॥ ७२ ॥

इदानीं कार्यकारणगुणानां स्वसमानजातीयगुणारभ्यारम्भकत्व नियमाभावस्य वैशेषिकप्रक्रियानुसारित्वं दर्शयितुं तस्याप्येवमेवा-भिप्रेतमित्याह—

द्व्यणुकस्य जन्म परमाणुयुगात्
परिमण्डलादिति कणादमतम् ।
द्व्यणुकत्रयात्त्र्यणुकजन्म पुन-
र्नियमं न कश्यपसुतो वदति ॥ ७३ ॥

द्व्यणुकस्येति । परमाणुयुगात् परमाणुद्व्यात् परिमण्डलात् परि-माण्डल्यपरिमाणयुक्ताद् द्व्यणुकस्याणुपरिमाणयुक्तद्व्यणुकद्रव्यस्य जन्म द्व्यणुकत्रयादणुपरिमाणयुक्तद्व्यणुकत्रयात् त्र्यणुकजन्म महत्परि-

माणयुक्तद्व्यणुकद्रव्यजन्म च कणादमतमिति यतः अतः कश्यपसुतः कणादः नियमं न वदतीति योजना ॥ ७३ ॥

ननु परमाणुद्वयात् द्व्यणुकत्रयाच्च द्व्यणुकत्र्यणुकजन्म तन्मतमित्येतावन्मात्रेण कथं तस्योक्तनियमानभिमतिरितिगम्यत इत्याशङ्क्य परमाणुद्वयादित्यादिना सूचितां नियमानभिमतिमेव विशदयति—

द्व्यणुकत्र्यणुकव्यपाश्रयं
परिमाणं प्रति कारणाश्रयः ।
न तु कारणमिष्यते गुण-
स्तदवष्टभ्य वयं जिगीषवः ॥ ७४ ॥

द्व्यणुकेति । द्व्यणुकत्र्यणुकाश्रितं परिमाणं ह्रस्वमहत्त्वादि प्रति कारणाश्रयः परमाणुद्व्यणुकाश्रितः गुणः परमाणुगुणः कारणं नेष्यते । फलितमाह—तदिति । नियमस्य व्यभिचारदर्शनमवष्टभ्याश्रित्य वयं ब्रह्मकारणतावादिनः जिगीषवः जेतुमिच्छवः त्वदुक्तनियमस्य त्वद्भीत्या प्रदर्शिते व्यभिचारेऽस्माकं विजयः स्यादित्यर्थः ॥ ७४ ॥

न केवलं नियमाभावे तदङ्गीकारमात्रमपि त्ववश्यमेव वक्तव्यमन्यथा पारिमाण्डल्यादिपरिमाणादेव ह्रस्वादिगुणोत्पत्त्यङ्गीकारे कार्यपरिमाणातिशयो न स्यात् । परिमाणस्य स्वसमानजातीयपरिमाणारम्भकत्वादिति विपक्षे बाधकमाह—

यदि कारणसंश्रयाद् गुणाद्-
द्व्यणुकादेः परिमाणमिच्छति ।
द्व्यणुकादिसमाश्रये तदा
परिमाणेऽतिशयो विरुध्यते ॥ ७५ ॥

यदि कारणेति । द्व्यणुकत्र्यणुककारणीभूतपरमाणुद्व्यणुकाश्रिताद्गुणात् पारिमाण्डल्यह्रस्वादेर्द्व्यणुकादेः द्व्यणुकत्र्यणुकयोः परिमाणमिच्छति यदि तदा द्व्यणुकादिसमाश्रिते द्व्यणुकत्र्यणुकाश्रिते परिमाणेऽतिशयः ह्रस्वमहत्वादिरूपेण प्रतीयमानोतिशयो विरुध्येतेत्यर्थः । कारणगुणस्य स्वसमानजातीयारम्भकत्वनियमे पारिमाण्डल्यात् द्व्यणुके पारिमाण्डल्यमेव स्यात् । ततश्च द्व्यणककार्यत्र्यणुकेपि तदेव स्यादेवमुत्तरोत्तरत्रापीति सर्वं परिमाणुमात्रमेवेत्यदृश्यं स्यादित्यर्थः । अतः स नियमो नास्तीति भावः । ननु सामान्यगुणानां स्वसमानजातीयगुणारभ्यत्वारम्भकत्वनियमाभावेपि विशेषगुणानां सोऽस्त्येव रूपादौ तथैव दर्शनात् । चैतन्यादिश्च विशेषगुण इति चेन्न : चित्रावयव्यारम्भकरूपादौ व्यभिचारात् । चैतन्यादेश्च स्वरूपत्वेनागुणत्वाद्घटः स्फुरति अस्ति प्रिय इति चैतन्याद्यात्मधर्मस्य घटादौ दर्शनाच्च । तदुक्तम् "अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम् । आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम्"इति तात्पर्यम् ॥ ७५ ॥

इदानीमारम्भादिवादवत्परिणामवादस्य सूत्रकारेण दूषितत्वादभ्युपगम्यवाद एवायमित्याह—

परिणामवादमुपगम्य तथा
रचनाद्यसंभवमुवाच मुनिः ।
परमेश्वरं न हि विना घटते
जडरूपवस्तुपरिणाम इति ॥७६॥

परिणामवादमिति । तथारम्भादिवादवद्रचनाद्यसम्भवं रचना वियदादिप्रपञ्चनिर्माणमादिपदेन तत्परिपालनादिकं गृह्यते । तदसम्भवमुवाच रचनानुपपत्तेश्च नानुमानमिति सूत्रेणेत्यर्थः । परिणामवादे रचनाद्यसम्भवोपपत्तिमाह—परमेश्वरमिति । अधिष्ठातारं विना जडरूप-

वस्तुपरिणामः जडरूपप्रधानवस्तुनः सकाशात्परिणामो न घटते। हि यतः अतस्तदसम्भव इत्यर्थः। अयम्भावः—परिणामवादे हि जड-प्रधानादेव जगत्परिणाम इति वक्तव्यम्। चेतनपरिणामस्य कृत्स्न-प्रसक्तिरित्यादिना निरस्तत्वादनुपपन्नत्वाच्च। एतच्च न सम्भवति। चेतनाधिष्ठितस्य जडस्य परिणामित्वानुपपत्तेः। लोके कुलालादि-चेतनाधिष्ठितादेव मृत्पिण्डादेर्घटादिपरिणामदर्शनात्। न चाचेतन-मात्रस्यापि क्षीरादेर्वत्सवृद्ध्यादिपरिणामहेतुत्वं दृष्टमिति वाच्यम्। तत्रापि चेतनेन वत्सेन वा परमेश्वरेण वाधिष्ठितस्यैतस्य तद्धेतुत्वात्। तर्हि चेतनाधिष्ठितादेव प्रधानात् जगत्परिणामोऽस्त्विति चेन्न। गुण-त्रयसाम्यावस्था हि प्रधानं नाम न च तदा तस्मात्परिणामः संभ-वति गुणवैषम्यप्रयुक्तत्वात्परिणामस्य गुणवैषम्यकाले च प्रधानत्वा-भावादिति भावः॥ ७६॥

ननु परिणामवादस्यापीतरवादवत् दूष्यत्वे कथं तस्य विवर्त्त-वादहेतुत्वमित्याशङ्क्य यद्यपि तस्यापि दूष्यत्वमविशिष्टं तथापि तयोरनुवादापेक्षया एतदनुवादस्य विशेषोऽस्तीति तद्धेतुत्वं संभवती-त्यभिप्रेत्येतरयोरनुवादेपि परस्परं विशेषोऽस्तीत्याह—

क्वचिदभ्युपेत्य कथनं कुरुते
परपक्षदूषणकथावसरे।
निजपक्षदोषपरिहारपरः
क्वचिदभ्युपेत्य वदतीह मुनिः॥७७॥

क्वचिदभ्युपेत्येति। अभ्युपेत्य कथनं संघातवादस्येति शेषः। पर-पक्षो बुद्धपक्षः निजपक्षदोषपरिहारपरः वैशेषिकैः स्वपक्षोद्भावितदूषण-परिहारतत्परः अभ्युपेत्यारम्भवादमिति शेषः॥ ७७॥

विशेषमेव स्पष्टयति—

परपक्षनिषेधमाचरन्
क्वचिदङ्गीकरणं करोति सः ।
परदर्शितदोषनुत्तये
क्वचिदित्येष विशेष ईरितः ॥ ७८ ॥

परपक्षेति । परशब्दो बुद्धपरः आचरन्कुर्वन्नङ्गीकरणं संघातवादस्येति शेषः । परदर्शितदोषनुत्तये वैशेषिकोद्भावितस्य चेतनकार्यस्य जगतोपि चेतनत्वापत्तिलक्षणदोषस्य निरासाय क्वचिदङ्गीकरणं करोतीत्यनुषज्यते—आरम्भवादस्येति शेषः । संघातवादङ्गीकारस्तद् दूषणार्थ एव नान्यार्थः । आरम्भवादानुवादस्तु ब्रह्मकारणतावादे वैशेषिकोद्भावितदूषणपरिहारमुखेन तद्दूषणार्थ इत्यनयोर्विशेष इत्यर्थः ॥ ७८ ॥

परिणामवादानुवादस्तु न केवलं तद्दूषणार्थ एव । अपि तु अद्वैतवादे परवाद्युद्भावितभोक्त्रादिसाङ्कर्यदोषसमाधानार्थश्चेत्याह—

भोक्त्रादिसूत्रे परिणामवाद-
माश्रित्य तद्वादिभिरुक्तदोषम् ।
समादधानो मुनिराह तस्मा-
त्सिद्धान्तसिद्धिः पुनरुत्तरत्र ॥ ७९ ॥

भोक्त्रादीति । तद्वादिभिः परिणामवादिभिस्तत्तद्वादिभिर्वोक्तदोषं भोक्तृभोग्यादीनामेकत्वलक्षणम् । ननु परिणामवादेनापि भोक्तृभोग्यादीनामेकत्वलक्षणदोषपरिहारे तस्यैव सिद्धान्तत्वमस्त्वत्या-

शङ्कयाह—तस्मादिति । तस्मात्परिणामवादप्रतिपादकभोक्त्रादिसूत्रादुत्तरसूत्रे तदनन्यत्वमित्यादौ सिद्धान्तसिद्धिं विवर्त्तवादसिद्धिमाहेति सम्बन्धः । परोद्भावितदोषपरिहारेपि परिणामवादे वस्तुसद्भेदस्यापि विद्यमानत्वान्न तस्य सिद्धान्तत्वमित्यर्थः ॥ ८० ॥

नहिं कथं तस्य विवर्त्तवादहेतुत्वमितरयोर्वा कथं तन्नेत्याशङ्क्य पूर्वोक्तं स्मारयति—

प्रत्यासन्ना परिणतिरियं विप्रकृष्टस्तु पूर्वः
संघातादिः सकल उदितो वेदसिद्धान्तसिद्धेः ।
एतावत्त्वादियमभिमता सूत्रकारस्य भाति
भ्रान्तिभ्रष्टस्फुटनिजमनः कौशलानां नराणाम् ॥८०॥

प्रत्यासन्नेति । वेदसिद्धान्तसिद्धेः वेदो वेदान्तः विवर्त्तवादसिद्धेरित्यर्थः । इयं परिणतिः परिणामवाद इत्यर्थः । प्रत्यासन्ना सन्निकृष्टा संघातादिस्तु विप्रकृष्टः परिणामवादे कारणैक्यस्य विद्यमाननया विवर्त्तानुकूलत्वेन तत्सन्निकृष्टता इतरयोस्तु कार्यकारणयोरत्यन्तभेदस्य विद्यमानतया तदननुकूलत्वाद्विप्रकृष्टत्वमित्यर्थः । अतो विवर्त्तहेतुत्वं परिणामस्यैवेति भावः । स्वसिद्धान्तप्रत्यासत्तिवशादेव सूत्रकारस्य परिणामवाद एव सिद्धान्त इति परेषां भ्रान्तिर्भवतीत्याह—एतावत्वादिति । वेदसिद्धान्तसिद्धेः प्रत्यासन्नत्वादित्यर्थः । इयं परिणतिः सूत्रकारस्याभिमतेति भातीत्यर्थः । केषां भ्रान्तिभ्रष्टस्फुटनिजमनः कौशलं विवेको येषां ते तथा अविवेकिनामिति यावत् ॥ ८० ॥

इदानीं परिणामवादस्य वेदसिद्धान्तसिद्धिं प्रति प्रत्यासन्नत्वमेव प्रपञ्चयितुमधिकार्याशयानुरोधेन दृष्टित्रैविध्यमाह—

आरोपदृष्टिरपवादकदृष्टिरेवं
व्यामिश्रदृष्टिरिति दृष्टिविभागमेनम् ।
संगृह्य सूत्रकृदयं पुरुषं मुमुक्षुं
सम्यक्प्रबोधयितुमुत्सहते क्रमेण ॥ ८१ ॥

आरोपदृष्टिरिति । आरोपदृष्टिर्नाम ब्रह्मैव जगदाकारेण वर्त्तत इति ब्रह्मणि सप्रपञ्चत्वबुद्धिः वस्तुतत्त्वाभिप्रायेणारोपशब्दप्रयोगः । अपवाददृष्टिर्नाम ब्रह्म निष्प्रपञ्चमिति ब्रह्मणि निष्प्रपञ्चत्वबुद्धिर्व्यामिश्रदृष्टिर्नाम ब्रह्म वस्तुतो निष्प्रपञ्चमविद्यया सप्रपञ्चमिति सप्रपञ्चत्व निष्प्रपञ्चत्वोभयविषयणी बुद्धिरिति । अनेन प्रकारेण दृष्टिविभागं दृष्टिभेदं संगृह्य प्रतिपत्त्युपायत्वेनाश्रित्य क्रमेण मुमुक्षुं साधनचतुष्टयसम्पन्नं सम्यक्प्रबोधयितुमुत्सहते । त्वं ब्रह्मासीति सम्यग्बोधयितुं प्रवर्त्तते । तथा च मुमुक्षुरपि तथैव प्रतिपत्तुं शक्नोतीत्यर्थः ॥ ८१ ॥

अस्त्वेवं दृष्टिवैविध्यं परिणामस्य विवर्त्तोपायत्वे किमायातं कीदृग्भूताश्चैताः दृष्टयः किं क्रमविशिष्टाश्चेत्याकाङ्क्षायामाह—

आरोपदृष्टिरुदिता परिणामदृष्टि-
र्द्वैतोपशान्तिरपवादकदृष्टिरन्त्या ।
मध्ये विवर्त्तविषया द्वयमिश्रदृष्टि-
र्व्यामिश्रदृष्टिरधरोत्तरभूमिभावात् ॥ ८२ ॥

आरोपदृष्टिरुदितेति । परिणामदृष्टिरित्यारोपदृष्टेर्लक्षणं परिणामदृष्टिश्च ब्रह्मैव प्रपञ्चाकारेण वर्तत इति पूर्वोक्ता दृष्टिर्द्वैत्योपशान्तिरित्यपवादकदृष्टेर्लक्षणं द्वैताभावविषयिणी निष्प्रपञ्चं ब्रह्मेति दृष्टिरित्यर्थः । अन्त्या तृतीया मध्ये आरोपापवाददृष्ट्योर्मध्ये द्वयमिश्रदृष्टिरितिव्या-

मिश्रदृष्टेर्लक्षणं सप्रपञ्चनिष्प्रपञ्चत्वलक्षणारोपापवाददृष्टिद्वयमिश्रता दृष्टिरित्यर्थः। तदेवाह— विवर्त्तविषयेति। अनृतत्वतोऽन्यथाभावो विवर्त्तः। तथा च वस्तुतो निष्प्रपञ्चं भ्रान्त्या सप्रपञ्चमिति बुद्धिरित्यर्थः। ननु व्यामिश्रदृष्टेः कथं विवर्त्तविषयत्वं तत्राह— अधरेति। अधरोत्तरभूम्योः सप्रपञ्चनिष्प्रपञ्चत्वदृष्ट्योस्तत्र भावात्सप्रपञ्चत्वनिष्प्रपञ्चत्वदृष्टिद्वयं यदि तत्त्वाद् व्यामिश्रदृष्टेर्विवर्त्तस्यापि तादृक्रूपत्वादित्यर्थः। अत्र चापवादविवर्त्तदृष्ट्योरन्त्यमध्यगतत्वोक्त्या परिणामदृष्टेर्विवर्त्तनियतपूर्वभावित्वमर्थात्सूचितम्। तथा च परिणामस्य विवर्त्तोपायत्वं युक्तमित्यर्थः। ननु विवर्त्तदृष्टेः सप्रपञ्चत्वदृष्टिघटिततया तज्जन्यत्ववन्निष्प्रपञ्चत्वदृष्टिघटिततयाऽपवाददृष्टिजन्यत्वं च वक्तव्यम् तथा च तस्या अपवाददृष्टिपश्चाद्भावित्वेन कथं मध्यगतत्वमिति चेन्न। निष्प्रपञ्चब्रह्मदृष्टिर्हि द्विधा साक्षात्काररूपा परोक्षरूपा चेति। तत्र यद्यपि परोक्षरूपनिष्प्रपञ्चब्रह्मदृष्टिर्विवर्त्तदृष्टौ कारणं तां विना वस्तुतो निष्प्रपञ्चं मायया सप्रपञ्चमिति विवर्त्तदृष्टेरनुदयात्तथाप्यपरोक्षरूपा निष्प्रपञ्चब्रह्मदृष्टिर्विवर्त्तदृष्टौ कारणम्। तां विना वस्तुतो निष्प्रपञ्चं मायया सप्रपञ्चमिति विवर्त्तदृष्टेरनुदयात्तथाप्यपरोक्षरूपा निष्प्रपञ्चदृष्टिविवर्त्तदृष्टिसाध्यैव भेददृष्टेर्मिथ्यात्वनिश्चयं विना निष्प्रपञ्चब्रह्माहमिति साक्षात्कारायोगात्। तथा च तादृश्या एवापवाददृष्टेरत्र विवक्षितत्वान्न विवर्त्तदृष्टेर्मध्यगतत्वानुपपत्तिरिति भावः ॥ ८२ ॥

ननु दृष्टित्रयाश्रयणेन किमर्थं मुमुक्षुबोधनम् अन्त्ययैकयैव दृष्ट्या तद्बोधनसंभवादित्याशङ्क्य मुमुक्षूणां मन्दमध्यमोत्तमभावेनानेकविधत्वान्मन्दं प्रति हठात्तद्बोधनासंभवात् क्रमेणैव संबोधनीय इति तदाशयानुसारेण दृष्टित्रयाश्रयणमित्यभिप्रेत्य दृष्टीनां मन्दादिभावमाह—

तत्त्वावेदकमानदृष्टिरधमा तत्त्वच्छतिर्मध्यमा
तत्त्वप्रच्युतिविभ्रमक्षयकरी तत्रान्त्यदृष्टिर्मता।

जीवैकत्वमुमुक्षुभेदगतितो व्याप्तिश्रदृष्टिर्द्विधा
भिन्ना तत्र च पूर्वपूर्वविलयादूर्ध्वोर्ध्वलब्धिर्भवेत् ॥८३॥

तत्त्वावेदकेति । तत्त्वावेदकमानविषया इदमिति दृष्टिः प्रपञ्चस्य तात्त्विकदृष्टिरिति यावत् । अनेन परिणामदृष्टिरुक्ता । अधमा निकृष्टा अविवेकिनिकृष्टमतिपरिकल्पितत्वान्निकृष्टतिर्यगादेरपि सत्त्वादुत्कृष्ट-ब्रह्मावगतिदूरत्वाच्चेत्यर्थः । तत्त्वक्षतिः प्रपञ्चस्य वस्तुत्वासत्त्वबुद्धि-रित्यर्थः । अनेन विवर्त्तदृष्टिरुक्ता मध्यमा परिणामदृष्टेः सकाशादी-षदुत्कृष्टापरोक्षविवेकिपुरुषाश्रितत्वादुत्कृष्टब्रह्मावगतिं प्रति साधनत्वा-च्चेत्यर्थः । तत्त्वप्रच्युतिविभ्रमक्षयकरी प्रपञ्चस्य तात्त्विकत्व-बुद्धिप्रच्युतिं विभ्रमक्षतिं च करोतीति तथोक्ता । अनेनापवाद-दृष्टिरभिहिता । सा हि न विवर्तदृष्टिवत्प्रपञ्चस्य तात्त्विकत्वमात्रं निषेधति किन्तु प्रपञ्चो नासीदस्ति भविष्यति तुच्छ एवेति अता-त्त्विकप्रपञ्चबुद्धिं च निराकरोति । अधिष्ठानसाक्षात्कारस्य श्रौतस्य भ्रान्तिविरुद्धत्वादित्यर्थः । तत्र दृष्टिषु मध्ये इदं चादौ योजनीयम् । अन्त्यदृष्टिरुत्तमदृष्टिरित्यर्थः । परमपुरुषार्थसाधनत्वादितः परमपेक्ष्य-माणाभावाच्चेत्यर्थः । आविद्यकप्रपञ्चविषयदृष्टित्रैविध्यमाचार्यैरप्युक्तं "तुच्छानिर्वचनीया च वास्तवी चेत्यसौ त्रिधा। ज्ञेया माया त्रिभिर्बोधैः श्रौतयौक्तिकलौकिकैः" इति। एवं पुरुषबुद्ध्यनुरोधेन परिणामविवर्त्तनि-ष्प्रपञ्चविषयभेदेन दृष्टित्रैविध्यमुक्त्वा विवर्त्तदृष्टावपि पुरुषबुद्ध्यनु-रोधेनावान्तरभेदमाह—जीवकैत्वेति । जीवैकत्वमतिनो मुमुक्षुभेदमति-तश्चेत्यर्थः । अस्मिन्संसारमण्डलेऽहमेक एव जीवो नित्यशुद्धबुद्ध-मुक्तसत्यपरमानन्दस्वभावो मदाश्रयमद्विषयानाद्यनिर्वचनीयावि-द्यातत्कल्पितनिखिलभूतभौतिकनामरूपात्मकप्रपञ्चसत्तास्फूर्तिप्रदतया तदधिष्ठानं परिदृश्यमानचेतनास्तु स्वप्नकल्पितचेतनवच्चेतनाभासाः मत्स्वाभाविकस्वरूपपरिज्ञानादेव निखिलानर्थभाजनानाद्यविद्यानिवृ-

त्तिरिति पुरुषधौरेयनिष्ठा जीवैकत्वविषया काचिद्विवर्त्तदृष्टिः अन्या तु अहमिवानेकेऽविद्योपाधिका जीवाः केचिन्मुक्ताः केचिन्मुमुक्षवः केचिच्च रागिणः प्रपञ्चश्च ईश्वरविषयाज्ञानात् परिकल्पित इति जीवानेकत्वविषया विवर्त्तदृष्टिरिति विवर्त्तदृष्टिद्वैविध्यमित्यर्थः । एवं मन्दमतेः प्रपञ्चः सत्य इत्येव प्रतिभाति मध्यमस्यासत्य इत्युत्तमस्य निष्प्रपञ्चं ब्रह्मैव भातीति तदाशयानुरोधेन दृष्टित्रैविध्यमुक्त्वा मन्दमध्ययोरुत्तरोत्तरदृष्टिप्राप्तावुपायमाह—पूर्वेति । पूर्वपूर्वदृष्टिबिलयादुत्तरोत्तरदृष्टिप्राप्तिर्भवेदित्यर्थः ॥ ८३ ॥

तदेव प्रपञ्चयति—

परिणामबुद्धिमपमृज्य पुमान्
विनिवर्त्तयत्यथ विवर्त्तमतिम् ।
उपमृज्य तामपि पदार्थधिया
परिपूर्णदृष्टिमुपसर्पति सः ॥ ८४ ॥

परिणामेति । उपमृज्य बाधित्वा अर्थविवेकानन्तरं विवर्त्तमतिं विनिवर्त्तयति सम्पादयतीत्यर्थः । तामपि विवर्त्तदृष्टिमपि पदार्थधिया तत्त्वंपदलक्ष्यार्थज्ञानेनोपमृज्य परिपूर्णदृष्टिमुपसर्पति परमपुरुषार्थकाष्ठां परिपूर्णब्रह्मसाक्षात्कारलक्षणापवादृष्टिं प्राप्नोति । पुरुषो हि प्रथममहरहरधीयमानसर्वकर्मेत्यादिवेदान्तवाक्यात्स्वाभाविकदृष्ट्यनुरोधेन सत्यं ब्रह्मैव जगदाकारेण वर्त्तते । जगच्च सत्यमिति जानाति । ततो जन्मान्तरपुण्यपुञ्जपरिपाकवशात् सद्गुरुं प्राप्योपजातविवेकः सन् असङ्गाद्वयस्य ब्रह्मणो वस्तुतस्तत्त्वान्तरानुपपत्तेरिति परिणाममुपमृज्य माययैव तत्त्वान्तरत्वप्रतीतिरिति विवर्त्तं प्रतिपद्यते । ततो दृढविवेकनिराकृतासंभावनादिराचार्यैश्वरानुगृहीतस्तत्त्वंपदलक्ष्यपरिज्ञानेन तामप्युपमृज्य परमपुरुषार्थकाष्ठामन्त्यां दृष्टिं प्रतिपद्यत इत्यर्थः ॥८४॥

नन्वेतादृशदृष्टिक्रमः कस्यापि न दृश्यते कस्य चिद्यावज्जीवविकारसत्यतावुद्धेरेव दर्शनात्। कस्यचित्परिणामबुद्धिं विनैव विवर्त्तबुद्धिदर्शनादित्याशङ्क्य सत्यमेकदेशशास्त्रश्राविणां व्युत्क्रमेण शास्त्रश्राविणां वैतादृशी बुद्धिः क्रमेण चतुर्लक्षणीशास्त्रश्राविणः साधनचतुष्टयसम्पन्नस्य तु क्रमेणैव दृष्टिर्भवतीत्यभिप्रेत्याह—

अथ शब्दसूचितमुमुक्षुरिमं
खलु दृष्टिभेदमुदितक्रमतः।
उपढौकते विगलिताखिलधी-
रवतिष्ठते निजमहिम्नि ततः ॥ ८५ ॥

अथशब्देति। नित्यानित्यविवेकादिसाधनचतुष्टयसम्पन्नस्य अथशब्दसूचितेत्यनेन क्रमेण चतुर्लक्षणीश्राविणः क्रमेण दृष्टित्रयं भवतीति सूचितम्। खल्विति प्रसिद्धौ उदितक्रमतः पूर्वोक्तक्रमतः उपढौकते प्राप्नोति। साधनचतुष्टयसम्पन्नो ह्यधिकारी श्रोतव्यादिविधिवलाच्छ्रवणादिकमनुतिष्ठासुः क्रमेण चतुर्लक्षणीं मीमांसां शृणोति। तत्र तस्य जगत्कारणे ब्रह्मणि समन्वयप्रतिपादकसमन्वयाध्यायश्रवणेन जगतः परिणामत्वबुद्धिर्भवति अविरोधाध्यायश्रवणेन विवर्त्तताबुद्धिर्भवति तृतीयाध्यायश्रवणेन वैराग्यादिदार्ढ्येन तत्त्वंपदलक्ष्यार्थपरिज्ञानितया चतुर्थाध्यायश्रवणेन तत्त्वमसिवाक्यार्थविगलतनिखिलभेदब्रह्मसाक्षात्कारलक्षणापवाददृष्टिर्भवतीत्यर्थः। तत्साक्षात्कारफलमाह—विगलितेति। ततो वाक्यार्थबोधात् विगलिताखिलधीः निरस्तनिखिलविश्वभ्रमः अनेनानर्थनिवृत्तिः फलमिति दर्शितम्। निजमहिम्नावतिष्ठत इत्यनेनानन्दावाप्तिर्दर्शिता ॥ ८५ ॥

इदानीमुक्ताधिकारिणः परिणामादिदृष्टिवत्क्रमेण जीवनानात्वतदेकत्वबुद्धिरपि भवतीति सदृष्टान्तमाह—

परिणाम इत्यथ विवर्त्त इति
बहवोऽहमेव च मुमुक्षुरिति।
परिपुष्कलं च परमं पदमि-
त्यवगत्य तिष्ठति महिम्नि निजे ॥ ८६ ॥

परिणाम इति। बहव इत्यत्र मुमुक्षव इतिविभक्तिपरिणामो द्रष्टव्यः परिपुष्कलं परिपूर्णं यथाधिकारी परिणाम इत्यवगम्य तदनन्तरं विवर्त्त इत्यवगम्य तदनन्तरं परिपूर्णं ब्रह्मावगम्य स्वमहिम्नि तिष्ठति। एवं विवर्त्तदृष्टिकाले स एव मुमुक्षवो बहवः अहमेव मुमुक्षुरित्यवगच्छतीत्यर्थः। परिणाम इत्यादिकं दृष्टान्तार्थं द्वितीयाध्यायाभ्यासादशायां स्वाभाविकदृष्ट्यनुरोधेन यथाप्रतीत्यर्थसद्भावमपि पश्यन् प्रतीयमानाविद्यकजीवनानात्वं पश्यति। तृतीयाध्यायाभ्यासेन तु स्वप्नदृष्टान्तेन प्रतीतिव्यतिरेकेणार्थाभावं प्रतीयमानचेतनानामाभासत्वं च पश्यन् जीवैकत्वं पश्यतीति भेदः ॥ ८६ ॥

नन्वध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यत इत्यादौ विवर्त्तदृष्टेरारोपत्वव्यवहारात् कथं परिणामदृष्टेरेवारोपदृष्टित्वमुदितमित्याशङ्क्याह—

परिणामधियो विवर्त्तधी-
रपवादात्मतया व्यवस्थिता।
सकलद्वयमर्दिनीं धियं
प्रति साऽऽरोपगिराभिधीयते ॥८७॥

परिणामेति। अपवादात्मतया व्यवस्थिताऽपवादत्वेन स्थिता तथा च विवर्त्तबुद्धा परिणामबुद्धेस्तात्त्विकत्वापवादेन तदपेक्षयाप्यस्या-

ऽऽरोपितरूपत्वेनारोपैकरूपत्वात् परिणामदृष्टेरेवारोपत्वमुक्तमित्यर्थः। तर्हि कथं विवर्त्तदृष्ट्यामारोपत्वव्यवहारः । तत्राह — सकलद्वयमर्दिनीं धियमिति । आविद्यकप्रपञ्चनिषेधकनिष्प्रपञ्चब्रह्मात्मधियं प्रति सा विवर्त्तदृष्टिः आरोपगिराभिधीयते । आरोपत्वेनोच्यत इत्यर्थः । निष्प्रपञ्चब्रह्मदृष्टेर्विवर्त्तदृष्टिबाधकत्वात् तदपेक्षया साप्यारोपो भवतीत्यर्थः ॥ ८७ ॥

अत एव विवर्त्तदृष्टेरारोपापवादरूपत्वेनापि व्यामिश्रदृष्टित्वं नेतरयोस्तदभावादित्याह—

उभयव्यतिमिश्ररूपतां
भजते तेन विवर्त्तधीरियम् ।
प्रथमोत्तमयोर्द्वयोः पुन-
र्व्यतिमिश्रीभवनं न विद्यते ॥ ८८ ॥

उभयेति । तेन येनापवादरूपेणारोपरूपेण च स्थिता तेनोभयव्यतिमिश्ररूपतामारोपापवादलक्षणोभयमिश्ररूपतां प्रथमोत्तमयोः परिणामोपवाददृष्ट्योर्व्यतिमिश्रीभवनमुभयमिश्ररूपत्वम् ॥ ८८ ॥

एवमेकस्यैवाधिकारिणः क्रमेण दृष्टित्रयं जीवानेकत्वतदेकत्वदृष्टिश्च भवतीत्युक्तमिदानीं पुरुषभेदेन एता दृष्ट्यो भवन्तीति मतान्तरमाह—

कृपणधीः परिणाममुदीक्षते
क्षपितकल्मषधीस्तु विवर्त्तताम्।
स्थिरमतिः पुरुषः पुनरीक्षते
व्यपगतद्वितयं परमं पदम् ॥ ८९ ॥

कृपणधीरिति । स्वर्गादिभोगलोलुपो मन्दमतिः परिणामं जगतः परिणामत्वमुदीक्षते पश्यति । क्षपितकलमषधीः शुद्धाशयः विवर्त्ततामुदीक्षत इत्यनुषज्यते । स्थिरमतिः अतिशुद्धाशयतयाऽसम्भावनादिचलनरहितः व्यपगतद्वितयं निराकृतद्वैतप्रपञ्चं परमं पदं ब्रह्मात्मस्वरूपमीक्षते ॥ ८९ ॥

मुमुक्षुश्चैकत्वानेकत्वबुद्धिरपि पुरुषभेदेनेत्याह—

पुरुषभेदवशाद् विविधा भवे-
त्क्षपितकल्मषधीरपि मध्यमा ।
जगदनेकमुमुक्षुकमीक्षते
पुरुष एकतरो न तथेतरः ॥ ९० ॥

पुरुषभेदेति । क्षपितकलमषधीः शुद्धाशयनिष्ठा धीः मध्यमा आरोपापवाददृष्ट्योर्मध्यगता विवर्त्तदृष्टिरिति यावत् । द्वैविध्यमेवाह—जगदिति । एकतरः द्वयोर्मध्ये अन्यः जगदनेकमुमुक्षुकमेवेत्यर्थः । अनेके मुमुक्षवो जीवा यस्मिन् तत्तथोक्तमितरः न तथा जगदनेकमुमुक्षुकं नेक्षते किन्त्वेकमुमुक्षुकमेवेत्यर्थः । अत्र च शुद्धितारतम्यं हेतुः ॥ ९० ॥

अस्य पक्षस्य स्वमतत्वं व्यावर्त्तयति—

इति तु केचिदुशन्ति महाधिय-
स्तदपि संभवतीति न दुष्यति ।
इह तु सूत्रकृताऽधिगिरोदितः
पुरुष एकविधस्त्रिविधो न तु ॥ ९१ ॥

इति तु केचिदिति । अनेन प्रकारेण तु खलु । उशन्ति इच्छन्ति ।

अस्यापिं पक्षस्याङ्गीकार्यत्वं दर्शयति—तदपीति । तन्मतमपि । अथवा—अस्य पक्षस्यानङ्गीकार्यत्वं दर्शयति । तदपीति । सम्भवतीति न यतो दुष्यतीत्यर्थः । अयम्भावः-यदि पुरुषभेदेनैव दृष्टित्रयं भवतीति नियमः तत्तु नास्त्येव । एकस्यापि पुरुषस्य कालभेदेन दृष्टित्रयाश्रयत्वोपपत्तेस्तथैवोपलब्धेः पूर्वपूर्वस्योत्तरोत्तरदृष्टिहेतुत्वेन चरमदृष्ट्याश्रये पूर्वपूर्वदृष्टिसत्वभावाच्च । यदि पुरुषभेदेनापि भवतीति संभवमात्रं नत्विष्टमेवेति । अस्मदुक्त एव पक्षः सूत्रकृतोप्यभिमत इत्याह—इहेति । इह वेदान्तेऽथ गिरा अथशब्देनैकविधः एकप्रकारः एक एवेत्यर्थः । दृष्टित्रयाश्रय इतिशेषः । त्रिविधो न तु त्रिप्रकारः पुरुषो दृष्टित्रयाश्रयो नोदित इत्यर्थः । सूत्रकृता हि सकलशास्त्रश्रवणाधिकारित्वेन एक एव साधनचतुष्टयसम्पन्नः पुरुषोऽथशब्देन सूचितः । न तु प्रत्यध्यायमन्योऽन्यः । अतः प्रत्याध्यायनिर्वर्त्यदृष्टयोपि क्रमेणैकस्यैव भवन्ति न तु पुरुषभेदेनेत्यर्थः ॥ ९१ ॥

ननु प्रत्यध्यायमधिकारिभेद एव सूत्रकृद्विवक्षितः किमिति न भवेत्तत्राह—

तिसृषु भूमिषु तस्य च तिष्ठतः
क्रमवशात्स्वयमुत्तमभूमिका ।
समुपसर्पति तत्र च तिष्ठतः
समुपशाम्यति कारणकार्यधीः ॥ ९२ ॥

तिसृष्विति । आरोपविवर्त्तापवादलक्षणासु भूमिषु दृष्टिषु तिष्ठत दृष्टित्रयं भजमानस्येत्यर्थः । तस्याधिकारिणः क्रमवशात् क्रमेण स्वयमनायासेनोत्तमभूमिकाऽखण्डसाक्षात्कारलक्षणापवाददृष्टिः । समुपसर्पति आयाति । तत्र च तिष्ठतः अखण्डसाक्षात्कारलक्षण

दृष्टौ वर्त्तमानस्याखण्डसाक्षात्कारवत इत्यर्थः। कारणकार्यधीः सविलासाविद्याभ्रमः हिरण्यगर्भादिभेदविभ्रमो वा प्रत्यध्यायमधिकारिभेदविवक्षायामेकस्याप्यनवच्छिन्नब्रह्मसाक्षात्कारानुदयप्रसङ्गान्नर्थनिवृत्तिर्न भवेत् समन्वयाविरोधादिपरिज्ञानस्य तत्र कारणत्वात्। तदिदमुक्तं – क्रमवशादिति। शास्त्रादावपि प्रत्यध्यायमधिकारिभेदासूचनाच्च न स सूत्रकृद्विवक्षितः। तथा चाथशब्दोपात्तनिखिलशास्त्रोपयुक्ताधिकारिविशेषणमुमुक्षोत्पादनमहिम्नैक एव दृष्टित्रयभागिति सूत्रकृत्संमत इत्यर्थः॥ ६२॥

न केवलं प्रथमसूत्रपर्यालोचनयैकस्य दृष्टित्रयवत्त्वं किन्तु निखिलसूत्रतन्मूलश्रुतितदुभयार्थदर्शिभाष्यकारादिवचनपर्यालोचनयापि तथैव वक्तव्यमित्यभिप्रेत्याह –

श्रुतिवचांसि मुनिस्मरणानि च
द्वयविशारदगीरपि सर्वशः।
त्रयमपेक्ष्य दशात्रितयं विना
न हि घटामुपयाति कदाचन॥ ६३॥

श्रुतिवचांसीति। तदैक्षत बहु स्यां प्रजायेयेति वाचारम्भणं विकारो नामधेयं तत्त्वमसीत्यादिवेदान्तवाक्यानि मुनिस्मरणानि मुनिप्रणीतान्यखिलसूत्राणि द्वयविशारदगीः श्रुतिसूत्रद्वयनिपुणानां भाष्यकाराणां गीः सर्वशः सर्वप्रकारेणेत्यर्थः। त्रयमपेक्ष्यैकनिष्ठदृष्टित्रयमपेक्ष्य घटामुपयान्तीत्यत्राप्यनुषज्यते। श्रुत्यादीनामुक्तदृष्टित्रयापेक्षायां को हेतुस्तत्राह-दशात्रितयमिति। एकस्य दृष्टिभेदेनावस्थात्रयं घटां घटनां सामञ्जस्येन प्रत्तिपत्तिजनकतामिति यावत्। उपयातीति गीरित्येकवचनापेक्षया श्रुत्याद्यपेक्षया तूपयान्तीत्यपि द्रष्टव्यम्। उत्तरोत्तर-

दृष्टेः पूर्वपूर्वापेक्षत्वाद्दृष्टित्रयमपेक्ष्यैव ब्रह्मात्मप्रतिपत्तिं श्रुत्यादयो जनयन्ति। अन्यथा—तेषां तज्जनकत्वमेव न स्यादित्यर्थः ॥ ९३ ॥

तस्मादभ्युपगमवादेनैव परिणामवादमङ्गीकृत्य स्वाभाविक-दृष्ट्यनुरोधेन प्रत्यक्षादिमानस्य च तत्त्ववेदकत्वमभ्युपेत्यादौ सूत्र-कारैः समन्वयविरोधः परिहृत इत्याह—

अतोऽनपोद्यैव च तत्त्वसंवि-
दुत्पादनेऽध्यक्षमितेः पुरस्तात् ।
सामर्थ्यमक्षादिविरोधमस्य
निवारयामास समन्वयस्य ॥ ९४ ॥

अतोऽनपोद्येति । यतो दृष्टित्रयापेक्षाऽतः पुरस्तादादावध्यक्षमितेः प्रत्यक्षादिमानस्य तत्त्वसंविदुत्पादने तत्त्ववेदने सामर्थ्यमनपोद्यै-वाभ्युपगम्येति यावत् । अस्य समन्वयस्याद्वैतसमन्वयस्याक्षादिवि-रोधं प्रत्यक्षादिविरोधं निवारयामासेत्यर्थः ॥ ९४ ॥

आरम्भणाधिकरणे त्वभ्युपगमं परित्यज्य विवर्त्तवादमेवाश्रित्य समन्वयविरोधं परिहृतवानित्याह—

इहाधुनाऽऽरम्भणशब्दशक्तिं
संश्रित्य तत्त्वावगतिक्षमत्वम् ।
अक्षादिमानस्य निराकरोति
समन्वयस्यापनयन्विरोधम् ॥ ९५ ॥

इहेति । आरम्भणाधिकरणेऽधुना परिणामेऽनुपपत्तिस्फूर्त्यनन्तर-मित्यर्थः। आरम्भणशब्दशक्तिं वाचारम्भणं विकार इत्यादि शब्दसामर्थ्यं

संश्रित्य वाचारम्भणमित्यादिशब्दसामर्थ्याद्विवर्त्तमाश्रित्येत्यर्थः । अक्षादिमानस्य तत्त्वावगतिक्षमत्वं तत्त्ववेदनसामर्थ्यं निराकरोति। किमर्थमिति तदाह—समन्वयस्येति । ब्रह्मात्मविषयसमन्वयस्य विरोधं प्रत्यक्षादिविरोधमपनयन् निराकुर्वन् अद्वैतब्रह्मसमन्वयविरोधपरिहारार्थमेव तन्निराकारणमित्यर्थः ॥ ६५ ॥

ननु परिणामाश्रयणेनाप्यद्वैतब्रह्मसमन्वयविरोधस्य परिहृतत्वात् किं विवर्त्ताश्रयणेन तन्निराकरणमित्याशङ्क्याह—

अखण्डवाक्यार्थमनुव्रजन्ती
समन्वयोत्थापितबुद्धिवृत्तिः ।
अक्षादिभिस्तत्त्वनिवेदने हि
सद्यः परिम्लायति निर्विशङ्कम् ॥ ६६ ॥

अखण्डेति । अनुव्रजन्ती अनुगच्छन्ती विषयीकुर्वन्तीति यावत् । समन्वयोत्थापितबुद्धिवृत्तिः समन्वयनिरूपणसहकृततत्त्वमादिवाक्योत्पादितःहंब्रह्मास्मीत्येवमाकारान्तःकरणवृत्तिरित्यर्थः । हि यतः परिम्लायति बाधिता भवतीत्यर्थः । निर्विशङ्कं निःसंदेहं न ह्यद्वैतमात्रसमन्वयो वेदान्तैः प्रतिपाद्यते येन परिणामवादाङ्गीकारेण प्रत्यक्षादेस्तत्त्वावेदकत्वेपि कार्यकारणयोस्तादात्म्यात् तद्विरोधः परिहृतो भवेत् किन्त्वखण्डसच्चिदानन्दैकरसैकब्रह्मसमन्वयः । न हि तादृशसमन्वयः प्रत्यक्षादेस्तत्त्ववेदनाङ्गीकारे सम्भवति । एकरसत्वासम्भवात् । प्रत्युत बाधित एव भवति । तथा च सूत्रकृतो वरघाताय कन्योद्वहनन्यायापातः । अतो निर्विशेषब्रह्मसमन्वयसिद्ध्यर्थं विवर्त्तवादाश्रयणेन तन्निराकरणं युक्तमित्यर्थः ॥ ६६ ॥

ननु मा भूत्तर्हि वेदान्तादखण्डवाक्यार्थप्रतिपत्तिः प्रत्यक्षानुरोधेन

संसर्गबुद्धिरेव तस्मादस्त्वित्याशङ्क्य पूर्वोक्तं स्मारयति—

अखण्डमेवाद्वयमात्मतत्त्वं
त्रयीशिरोवाक्यमनुप्रविष्टाः ।
वदन्ति शब्दा इति शब्दशक्ति-
निरूपणे पूर्वमुदीरितं हि ॥ ६७ ॥

अखण्डमेवेति । त्रयीशिरो वाक्यमनुप्रविष्टाः त्रयीशिरस्यन्तर्भूता इति यावत् । शब्दः तत्त्वमादयः अखण्डमेव निर्विशेषमेवाद्वयमात्मतत्त्वं वदन्ति लक्षयन्ति न तु तादात्म्यवाद इव सविशेषात्मतत्त्वं पूर्वमुदीरितं कुत्रेत्याकाङ्क्षायामाह—शब्दशक्तिनिरूपण इति । प्रथमाध्याये शब्दशक्तिनिरूपणावसर इत्यर्थः । हि यतः अतोऽखण्डमात्रबोधनसमर्थतत्त्वमादेर्न पदार्थमात्रविषयप्रत्यक्षाद्यनुरोधेन संसर्गनिष्ठत्वसंभव इत्यर्थः ॥ ६७ ॥

तस्माद्विवर्त्तवादाश्रयणेन वेदान्तैरेव तादृक्प्रत्यक्षादेस्तत्त्वावेदकप्रामाण्यनिराकारणमुपपन्नमित्युपसंहरति—

अतो विरोधस्य निराससिद्धौ
निरस्यतेऽज्ञादिषु तत्त्वभागः ।
संरक्ष्यतेऽसंव्यवहारशक्ति-
भागः पुनः सर्वमतोऽनवद्यम् ॥ ६८ ॥

अत इति । यतस्तत्त्वमादिवाक्यमखण्डार्थनिष्ठं यतश्च प्रत्यक्षादेर्नानधिगतार्थविषयत्वमतः अखण्डसमन्वये प्रत्यक्षादिविरोधस्य तत्त्वभागः तत्त्वावेदनप्रामाण्यांशः । ननु प्रत्यक्षप्रामाण्यस्य वेदान्तो-

पजीव्यत्वात् कथं तदुपजीविना वेदान्तेन तद्बाध्यते न्यायविरोधादित्याशङ्क्याह—संरक्ष्यत इति । न बाध्यते संव्यवहारशक्तिभागः व्यावहारिकप्रामाण्यांशः वेदान्तैर्हि स्वप्रतीतौ स्ववाच्यसम्बन्धपरिज्ञाने च प्रत्यक्षादिगतव्यावहारिकप्रामाण्यमात्रमेवापेक्ष्यते न तु तत्त्वावेदनांशोऽपि अनुपयोगादननुकूलत्वाच्च । व्यावहारिकप्रामाण्यं विवर्त्तविषयेऽपि तेषां संभवति अत उपजीव्यांशस्य बाधान्न न्यायविरोध इत्यर्थः । विरोधनिरासमुपसंहरति—सर्वमिति । अतः—यतो व्यावहारिकप्रामाण्यांशो न बाध्यते तत्त्वावेदनांशश्च बाध्यते अतः ॥ ६८ ॥

ननु प्रत्यक्षादेरतत्त्वावेदनप्रामाण्यमनुपपन्नम् तद्विषयस्य प्रपञ्चस्य प्रमाणदोषजन्यत्वेनातात्त्विकत्वाभावात् लोके च दोषजन्यस्यैवातात्त्विकत्वदर्शनात् । न चाविद्यालक्षणात्मदोषजन्यत्वेनातात्त्विकत्वम्, अधिष्ठानविषयप्रमितिकरणाश्रयदोषजन्यत्वाभावात् । तस्यैव दोषत्वात् । न चाविद्याप्रपञ्चाधिष्ठानपूर्णात्मविषयप्रमाकरणनिष्ठा तस्य स्वप्रकाशत्वेन तद्विषयप्रमाकरणाभावादित्याशङ्क्याविद्याया दोषत्व मुपपादयति—

चितिवस्तु नः स्वमहिमस्फुरणे
स्वयमेव कारणमिति प्रगतम् ।
प्रतिबध्य तच्चितिगताग्रहणं
विपरीतबुद्धिमुपढौकयति ॥ ६९ ॥

चितिवस्तु न इति । नः अस्माकं स्वमहिमस्फुरणे स्वस्वरूपानवच्छिन्नानन्दस्फुरणे स्वयमेव कारणं न स्वव्यतिरिक्तकारणान्तरापेक्षेत्यर्थः । इति प्रगतं प्रसिद्धं चितिगताग्रहणं चैतन्यनिष्ठाज्ञानं तत्स्वमहिमस्फुरणं प्रतिबध्यविपरीतबुद्धिमधिष्ठानविपरीतप्रपञ्चाकारबुद्धिमुप-

ढौकयति प्रापयति। अधिष्ठानविशेषज्ञानप्रतिबन्धकत्वे सत्यधिष्ठानविपरीतकार्यजनकस्य दोषस्याधिष्ठानतत्प्रमाणाश्रयत्वमेव वक्तव्यं न त्वधिष्ठानप्रमितिकरणाश्रयत्वमपि गौरवात्। अधिष्ठानप्रमाणं चात्र स्वयं प्रकाशात्मस्वरूपमेवेति। तदाश्रिततद्विशेषज्ञानप्रतिबन्धकतद्विपरीतकार्यजनकाविद्याया अपि प्रमाणदोषत्वात्। तज्जन्यस्य प्रपञ्चस्यातात्त्विकत्वमुपपन्नमिति तद्विषयप्रत्यक्षादेरतत्त्वावेदनत्वमुपपन्नमिति भावः। ननु ज्ञानोत्पादकस्यैव काचादेर्दोषत्वं प्रसिद्धं नत्वर्थोत्पादकस्य दण्डादौ तदप्रसिद्धेः अविद्या चार्थोत्पादिकेति कथं तस्याः दोषत्वमिति चेन्न—ज्ञानजनकत्वस्य दोषत्वेऽप्रयोजकत्वात्। अन्यथा—चतुष्टयसन्निकर्षस्यापि दोषत्वप्रसङ्गात्। ननु भ्रान्तिज्ञानजनकत्वं तत्र प्रयोजकमिति चेत्तर्हि सत्यं घटादिजनकस्य दण्डादेरदोषत्वेपि मिथ्याभूतपदार्थजनकस्याप्यज्ञानस्य दोषत्वोपपत्तिः। काचादेरपि भ्रान्तिरजतादिजनकत्वाङ्गीकारात् ज्ञानमात्रजनकत्वमसिद्धमेव अतोऽविद्यादोष एवेति तात्पर्यम्॥ ६६॥

नन्वेवं प्रत्यक्षादेर्न व्यावहारिकप्रामाण्यमपि दोषजन्यविषयस्य शुक्तिरूप्यज्ञानवद्व्यावहारिकप्रमाण्यस्यैव युक्तत्वात्। यदि च सकललोकव्यवहारोच्छेदभीत्या तन्नाङ्गीकुरुषे तदा तत्त्वावेदनत्वमेव स्वीकर्त्तव्यम्। तथा च कथन्नोपजीव्यविरोध इत्याशङ्क्य न दोषजन्यविषयत्वं व्यावहारिकत्वं विरुणद्धि दोषस्य ह्यधिष्ठानविपरीतकार्योत्पादकत्वमेव स्वभावः न तु प्रातीतिककार्योत्पादकत्वमेवेति नियमः। भस्मकादिदोषे व्यभिचारात्तथा च प्रपञ्चस्य व्यावहारिकत्वेप्यद्वितीयात्मविपरीतरूपतयाऽविद्यालक्षणदोषजन्यत्वं सम्भवत्येवेति नोपजीव्यविरोधः इत्याभिप्रेत्याह—

व्यवहारनिर्वहणशक्तिमसौ
न चिदग्रहोऽस्य विनिवारयति।

परमार्थवेदनविधिक्षमता-
मवखण्डयन्नपि मनः प्रभृतेः ॥ १०० ॥

व्यवहारेति। अस्य प्रत्यक्षादेर्व्यवहारनिर्वहणशक्तिमुचितव्यवहार-सम्पादनसामर्थ्यं चिदग्रहः चैतन्याश्रिताज्ञानं न विनिवारयति। एवं प्रत्यक्षादिगततत्त्वावेदनसामर्थ्यनिर्वाहकत्वमपि न स्यादिति नेत्याह— परमार्थेति। मनः प्रभृतेर्मनआदिप्रत्यक्षस्य परमार्थवेदनविधि-क्षमतां तत्त्वावेदनकरणसामर्थ्यमवखण्डयन्नपि निराकुर्वन्नपि व्यवहा-रनिवर्हणशक्तिं न निवारयतीत्यर्थः। प्रत्यक्षादेरविद्योपदर्शितार्थविषय-त्वादेव तद्गततत्त्वावेदकत्वनिवारकत्वं तस्या इत्यर्थः ॥ १०० ॥

ननु वेदान्तानामपि प्रमाणत्वाविशेषात्तद्गततत्त्वावेदकत्वनिवार-कत्वमपि तस्याः किं न स्यादित्याशङ्क्य प्रमाणत्वाविशेषेऽप्यविद्योपद-र्शितार्थविषयत्वाभावान्नैवमित्यभिप्रेत्याह—

चितिवस्तुबुद्धिजनकस्य पुन-
र्वचसो न खण्डयति शक्तिमसौ।
स्वनिबन्धनस्फुरणमेव चितेः
प्रतिबध्य तिष्ठति न वाचनिकम् ॥ १०१ ॥

चितिवस्त्विति। अखण्डचैतन्यवस्तुविषयबुद्धिजनकस्य वचसस्त-त्त्वमादिवाक्यस्य शक्तिं तत्त्वावेदनसामर्थ्यमसौ चिदग्रहः न खण्ड-यति न निवारयति। नन्वेवमपि वेदान्तानामखण्डात्मतत्त्वप्रमिति-जनकत्वमनुपपन्नमविद्यादोषप्रतिबद्धत्वात्। लोके प्रतिबन्धक-दोषनिरासे सत्येव प्रमाणानां स्वविषयप्रमितिजनकत्वदर्शनात्। न चात्रापि निवृत्त एव तस्मिन् ते स्वविषयाखण्डात्मतत्त्वप्रमितिं जन-यन्तीति वाच्यम्। वैयर्थ्यादन्योऽन्याश्रयाच्चेत्याशङ्क्याह—स्वनिबन्धनेति।

असौ चितेः स्वप्रकाशचैतन्यस्य स्वनिबन्धनस्फुरणं स्वरूपप्रकाशप्रयुक्तस्फुरणमेव प्रतिबध्य तिष्ठति प्रतिबध्नाति। न वाचनिकं तत्त्वमादिवाक्यनिबन्धनस्फुरणन्न प्रतिबध्नातीत्यर्थः। प्रमाणदोषो हि स्वाश्रयप्रयुक्तप्रकाशमेव प्रतिबध्नाति। काचादौ तथैव दर्शनात् अविद्यादोषाश्रयश्च स्वरूपचैतन्यमेव। न वेदान्त इति। स्वप्रकाशचैतन्यनिबन्धनप्रकाश एव प्रतिबध्यते न वेदान्तजन्यः। तथा च तस्य प्रतिबन्धनिवृत्त्यपेक्षा नास्तीति भावः॥ १०१॥

तर्ह्यविद्या चक्षुरादेरपि तत्त्वावेदनसामर्थ्यं न विहन्यात्। तदाश्रयत्वाभावादित्याशङ्क्य पूर्वोक्तयुक्त्यैव दूषयन्नुपसंहरति—

प्रत्यक्षादेरेष दोषस्ततोऽयं
वेदान्तानां नैव दोषानुबन्धः।
सत्यं वस्तु च्छादयन्नद्वितीयं
द्वैतं यस्मादानयत्येष दोषः॥१०२॥

प्रत्यक्षादेरिति। अयं चिदग्रहः प्रत्यक्षादेरेव दोषः। तत्त्वावेदनसामर्थ्यप्रतिबन्धक इत्यत्र हेतुमाह—सत्यमित्यादिना। एष अविद्याख्यो दोषः सत्यमबाधितं परमार्थमद्वितीयमखण्डैकरसं वस्तु छादयन्नाच्छादयन् द्वैतमद्वैतविपरीतरूपं सत्यविपरीतरूपमपरमार्थं चेति द्रष्टव्यम्। आनयति चक्षुरादिविषयत्वेन सम्पादयति। तत इति सम्बन्धः। तथा च प्रत्यक्षादेरविद्योपदर्शितापरमार्थवस्तुविषयत्वादेव प्रत्यक्षादिकं प्रत्यविद्या तदाश्रितत्वाभावेपि दोष इत्युच्यते। वेदान्तानां च तादृत्त्वाभावान्नैव दोषानुबन्धः दोषसम्बन्धगन्धोपि नास्तीत्यर्थः॥ १०२॥

एवं प्रत्यक्षादेस्तत्त्वावेदनप्रामाण्यस्यानुपजीव्यत्वात् व्यावहारिकत्वेन सावकाशत्वाच्च। न तेन तत्त्वंपदार्थविषयवेदान्तबाध

इत्युक्तमिदानीं त्वंपदार्थस्यासङ्गत्वाद्यावेदकवेदान्तवाक्यस्य कर्तृत्वाद्यावेदकप्रत्यक्षेण भिन्नविषयत्वादपि न बाध इत्याह—

किं च प्रतीचि सकलोपनिषत्प्रवृत्ता
मानान्तरं सकलमेव तु तत्पराचि ।
प्रत्यक्पराग्विषयगोचरयोस्तु बुद्ध्योः
स्पर्धा न संभवति मेयविभागसिद्धेः॥१०३॥

किंचेति । प्रतीचि प्रत्यगात्मनि । उपनिषत्—असङ्गोऽयं पुरुष इत्यादिका प्रवृत्ता असङ्गत्वादिप्रतिपादकत्वेन प्रवृत्ता मानान्तरं कर्तृत्वाद्यावेदकं प्रमाणान्तरं पराचीत्युक्तेऽहंकारस्य देहाद्यपेक्षयान्तरत्वेन प्रतीयमानत्वादसंभवशङ्का स्यात् तदर्थं तत्पराचीत्युक्तम् । यद्यपि देहाद्यपेक्षयाऽहंकरणमान्तरं तथापि तं प्रत्यगात्मानमपेक्ष्य पराग् बाह्यमेवेत्यर्थः । अत्र च प्रवृत्तमितिविभक्तिविपरिणामो द्रष्टव्यः । फलितमाह—प्रत्यगिति । प्रत्यग्रूपः पराग्रूपश्च यो विषयावात्मानात्मलक्षणौ तद्गोचरयोः आत्मानात्मविषयिण्योरित्यर्थः । बुद्ध्योरसङ्गत्वादिकर्तृत्वाद्यावेदकयोः स्पर्धा विरोधो न संभवति । तत्र हेतुः—मेयविभागसिद्धेरिति । विभिन्नविषयत्वादित्यर्थः । लोके हि समानविषययोरेव तमःप्रकाशयोर्विरोधो दृष्टः न भिन्नविषययोः न हि जातु रामनाथसन्निधिनिविष्टप्रदीपप्रभया हिमगिरिगुहान्तरवर्तिसंतमसनिरासो दृष्टपूर्वः भिन्नविषयं चासङ्गत्वावेदकवेदान्तात् कर्तृत्वाद्यावेदकप्रत्यक्षादि मानं वेदान्तस्यात्मविषयत्वात्प्रत्यक्षादेरनात्मविषयत्वात् । अतो न तयोर्विरोध इत्यर्थः । ननु भिन्नविषयत्वमसिद्धमहं करोमि जानामीति कर्तृत्वादेश्चैतन्यसामानाधिकरण्येन प्रतीयमानस्यानात्मधर्मत्वे चैतन्यसमानाधिकरण्यानुपपत्त्यात्मधर्मत्वमेव तं विषयीकुर्वता प्रत्यक्षेणाप्यात्मनो विषयीकरणादिति चेदुच्यते—

आत्मा तावत्स्वयंप्रकाश इति सर्वैरभ्युपगन्तव्यः। अन्यथा जगदवभासानुपपत्तेः। नन्वात्मा स्वसमवेतज्ञानेनैव जगदवभासयिष्यतीति चेत्तत् किं ज्ञानं जडप्रकाशः उत चैतन्यप्रकाशः। आद्येपि किं प्रकाशमानं सदर्थमवभासयति। उताप्रकाशमानम्। नाद्यः। अनवस्थाप्रसङ्गात्। न द्वितीयः। स्वयमप्रकाशमानस्य विषयप्रकाशत्वानुपपतेः। प्रदीपादेः स्वयं प्रकाशमानस्य विषयप्रकाशत्वदर्शनात्कल्पनाया दृष्टानुरोधित्वस्यैव न्याय्यत्वात्। स्वयमप्रकाशमानस्य घटादितुल्यत्वेनान्यप्रकाशत्वानुपपत्तेश्च। न च चक्षुरादिवदप्रकाशमानस्यापि ज्ञानस्यार्थप्रकाशत्वमिति वाच्यम्। चक्षुर्हि प्रकाशजनकतयार्थप्रकाशकमेव न तु तत्प्रकाशः। ज्ञानन्तु प्रकाश एव न तु प्रकाशकं प्रकाशान्तराजननात्।

किं च—घटप्रतीत्यनन्तरमेव प्रतीयते घट इति प्रतीतिविशेषणकतया घटप्रतीतिर्दृश्यते। विशिष्टप्रतीतिश्च विशेषणप्रतीतिपूर्विकैवेति नियमः। तत्र कथं ज्ञानस्यास्वप्रकाशत्वे विशेषणीभूतप्रतीति—प्रतीतिं विना तद्विशिष्टप्रतीतिः स्यात्। ननु तत्रापि प्रतीत्यन्तरेण विशेषणप्रतीत्युपस्थितौ सत्यामेव तद्विशिष्टप्रतीतिरिति चेन्न। प्रतीतिविषयप्रतीतेरननुभवपराहतत्वात् न हि घट इति प्रतीत्य घटः प्रतीयत इति विशिष्टप्रतीतेः पूर्वं नियमेन प्रतीतिविषयप्रतीत्यन्तरं कश्चिदनुभवति। किञ्चास्ति तावत्सर्वेषां नियमेन स्वसमवेतज्ञानविषयसंशयविपर्यासविरहः। स च ज्ञानस्य जडप्रकाशत्वपक्षे किंनिमित्त इति वक्तव्यं संशयादिसामग्रीविरहप्रयुक्त इति चेत्स वा किंनिमित्तः। किं विशेषादर्शनविरहप्रयुक्तः। उत कोटिस्मरणादिविरहप्रयुक्तः। न चरमः। नियमेन तद्विरहस्य वक्तुमशक्यत्वात्। प्रथमे विशेषादर्शनविरहो नाम विशेषदर्शनं तच्च ज्ञाने ज्ञानत्वेन तद्दर्शनमेव तच्च यद्युत्पन्नमात्रज्ञाने नियमेनाङ्गीक्रियते तदा ज्ञानस्य नियमेन ज्ञानान्तरवेद्यत्वाभावादन्यथा सुषुप्त्याद्यभावप्रसङ्गात् व्यवसाय एव तादृग्रूप इति वक्तव्यम्। तथा च कथं तस्य परप्रकाश्यत्वम्।

एतेन विशिष्टवैशिष्ट्यज्ञानस्य विशेषणतावच्छेदकप्रकारकज्ञानजन्यतया प्रतीतिविषयज्ञानान्तरं मध्ये त्वयापि वाच्यम् घटज्ञानस्यैव ज्ञानत्वप्रकारत्वाभावादिति निरस्तम्। किंचा जिज्ञासितस्य ज्ञानस्यानुव्यवसायवेद्यत्वे सुषुप्त्यादिविरामप्रसङ्गः। न च सामग्रयन्तरप्रतिबद्धत्वादजिज्ञासितमपि सर्वदा न ज्ञायत इति न सुषुप्त्यादिविरामप्रसङ्ग इति वाच्यम् इमं घटं जानामीति सन्निकृष्टानुव्यवसायस्थले घटज्ञानसामग्रयां विद्यमानायामेवानुव्यवसायदर्शनेन सामग्र्यन्तरस्य तदप्रतिबन्धकत्वात्। जिज्ञासितस्य च तस्य ग्राह्यत्वेऽन्योऽन्याश्रयः। अज्ञाते जिज्ञासाऽयोगात्। ज्ञानज्ञाने सति जिज्ञासा तस्यां च सत्यां तज्ज्ञानमिति। किंच ज्ञानभेदे तत्क्रमे च तत्कारणमनःसंयोगभेदक्रमावेव प्रयोजकौ वक्तव्यौ। अन्यथा धारावहनस्थले ज्ञानभेदतत्क्रमयोरनुपपत्तेः। न च तत्र प्रागभावभेदाद्भेदः। सजातीयप्रत्यक्षविभुविशेषगुणानां पर्यायेणोत्पत्तिस्वभावाच्च क्रम इति वाच्यम्। प्रागभावस्य प्रतियोगिभेदाधीनभेदकत्वेन प्रतियोगिभेदस्य तद्भेदाधीनत्वेऽन्योऽन्याश्रयात्। कारणक्रमाधीनकार्यक्रमोपपत्तौ निर्बीजस्वभावकल्पनानुपपत्तेश्च। तथा च व्यवसायानुव्यवसाययोर्भिन्नसंयोगजन्यतयाऽनुव्यवसायक्षणे व्यवसायस्य नष्टत्वात् तस्य प्रत्यक्षत्वानुपपत्तिः। ननु सामग्रीभेदतत्क्रमयोरेव कार्यगततत्प्रयोजकत्वं सर्वत्रैवं दर्शनात् तौ चात्र सुलभावनुव्यवसायसामग्रयां व्यवसायस्यानुप्रवेशादिति चेत्तथापि ज्ञानविषयसविकल्पकनिर्विकल्पकाद्यनेककक्षणव्यवहितत्वात् व्यवसायस्य प्रतीयत इति वर्त्तमानत्वप्रतीत्यनुपपत्तिः। ननु स्वप्रकाशत्वं नाम स्वविषयत्वं तच्च न संभवति ज्ञानजनकेन्द्रियप्रत्यासत्याश्रयत्वस्यैव ज्ञानविषयत्वे प्रयोजकत्वात् ज्ञानस्य च तादृशप्रत्यासत्त्याश्रयत्वाभावात् ततः स्वप्रकाशत्वानुपपत्त्यैव परप्रकाश्यत्वमिति चेत्। न हि स्वप्रकाशत्वं स्वविषयत्वमङ्गीक्रियते विरोधात्। किन्तु प्रकाशान्तरसम्बन्धं विना

प्रकाशमानत्वं, स्वव्यवहारे स्वातिरिक्तज्ञानान्तरानपेक्षत्वं वा। ततश्च न तादृशप्रत्यासत्याश्रयत्वापेक्षा। न च तदपि ज्ञानविषयत्वेऽनुगतं प्रयोजकं घटादीनामीश्वरज्ञानविषयत्वाभावप्रसङ्गात्। जन्यज्ञानेऽयं नियम इति चेन्न। आत्मादेरपि घटादिज्ञानविषयत्वप्रसङ्गात्। प्रमेयमिति ज्ञानस्याविषयत्वेन स्वयंप्रकाशत्वप्रसङ्गाच्च। ननु तस्यापि प्रमेयत्वलक्षणप्रत्यासत्याश्रयत्वमस्तीति चेत्। न ह्येतावता स्वयमस्वयं भवति। न वा स्वविषयप्रकाशोऽप्रकाशः। किं च ज्ञानस्यास्वयंप्रकाशत्वे धारावहनबुद्धिर्न सिध्यति। सा किं प्रत्यक्षेण किं प्रकारान्तरेण। नाद्यः। धाराविरामप्रसङ्गात्। चरमक्षणे च पूर्वसविदां विनष्टत्वेन तदनुपपत्तेः। अस्तु तर्हि व्यवहारलिङ्गेन तज्ज्ञानमिति चेन्न। तत्तद्बुद्धिजन्यव्यवहारस्य तदा तदा ज्ञाने घटबुद्धिधाराविरामप्रसङ्गात्। चरमक्षणे च पूर्वपूर्वबुद्धिजन्यव्यवहाराभावात्। ननु तत्तद्बुद्धिजन्यस्मृत्या तदनुमानमिति चेत्। सापि न तावत्पूर्वोत्तरबुद्ध्योर्मध्ये भवति दत्तदोषात्। नापि चरमबुद्ध्यनन्तरं तत्रापि प्रतिज्ञानं स्मृतिभेदे तावद् घटानुभवमात्रसिद्धावपि नाविरतधारा तत्सिद्धिः। स्मृत्यभेदे तु नतराम्। नन्वेका स्मृतिस्तावत्कालावच्छिन्नं घटं विषयीकरोतीति तावत्कालावच्छिन्नधारानुभवोपि सिद्धयतीति चेन्न। अनुभवस्य कालाविषयकत्वेन स्मृतेरपि तदविषयत्वात्। घटमात्रविषयिण्या च स्मृत्या तदसिद्धेः। एकविषयानेकसंस्कारस्यैकस्मृतिजनकत्वाच्च। स्वयंप्रकाशत्वपक्षे तु तत्तद्घटादिज्ञानेन वा तज्जन्यतत्तदज्ञानविषयतत्तत्संस्कारेण वैकस्मृत्यानेकवर्णावगाह्येकस्मृत्या वर्णानामिव तत्सिद्धा तस्माज्ज्ञानस्य जडप्रकाशत्वमनुपपन्नम्। अस्तु तर्हि ज्ञानं स्वप्रकाशमात्मा च तेनैव विषयान् कर्मतया पश्यन् स्वयं च तदाश्रयतया सिद्धयति। तस्यापि स्वप्रकाशत्वे उभयस्वप्रकाशत्वकल्पनागौरवात् ज्ञानकर्मत्वे च जडत्वप्रसङ्गादिति चेत्तर्हि तादृशी संविदात्मैव स्यात्। तथा ह्यात्मा संविदभिन्नः संवित्कर्मतामन्तरेणा-

परोक्षत्वात्संविद्वत् । न चाप्रयोजको हेतुः विपक्षे बाधकाभावादिति वाच्यम् । संविद्विषयत्वानात्मत्वापत्त्योरेव बाधकत्वात् संविदतिरिक्तस्य संविदधीनप्रकाशस्य तदुभयसद्भावनियमात्संविद आत्मातिरिक्तत्वे कल्पनागौरवापाताच्च । तथा हि—यदि स्वप्रकाशसंविद आत्मातिरिक्ता इति कल्प्येरन् प्रतिविषयमन्यदन्यदेव ज्ञानं कल्पनीयम् । तथाभिन्नेष्वेकरूपानुभवसिद्ध्यर्थं ज्ञानत्वं चापरं कल्पनीयम् । संविद आत्मत्वे तु नैवमिति । ननु ज्ञानभेदो नास्माभिः कल्पनीयः घटज्ञानं पटज्ञानमित्यनुभवसिद्धत्वात्तस्येति चेन्न । संवित्स्वसजातीयप्रतियोगिकभेदशून्या निष्प्रतियोगिकत्वे सत्युपाधिपरामर्शमन्तरेणाविभाव्यमान भेदत्वाद्गगनवदिति । तदैक्यस्य प्रमाणसिद्धत्वेन भेदप्रत्ययस्य घटादिभेदेनेवाकाशस्य विषयभेदेनान्यथासिद्धत्वात् । ननूत्पादविनाशाभ्यां भेदोऽनुभूयत इति चेन्न । संविदुत्पादाद्यसिद्धेः । ननु घटज्ञानमुत्पन्नं पटज्ञानं नष्टमिति तावनुभूयेते इति चेत् न तयोरपि घटादिसम्बन्धविषयत्वेन संविद्विषयत्वाभावात् । तस्मात्स्वयंप्रकाशज्ञानाभिन्नतया आत्मा स्वप्रकाश इत्येव सर्वैरुपगन्तव्यम् । अत्रायं पुरुषः स्वयं ज्योतिरितिश्रुतिरपि साक्षात्स्वरूपप्रकाशत्वमेव दर्शयति । नन्वहं जानामीति ज्ञानाश्रयतया प्रतीयमान आत्मा कथं तदभिन्नः स्यादिति चेत् न ह्यत्रात्मा ज्ञानाश्रयत्वेन प्रतियते किन्त्वहंकार एव । स एवात्मेति चेत् किमेष प्राभाकरः उतान्यः नाद्यः । मामहं जानामीति ज्ञानकर्मतया प्रतीयमानस्यैव ज्ञानाश्रयत्वानुभवात् । ज्ञानकर्मत्वेनानुभूयमानतया ऽहंकारस्य घटादिवदनात्मत्वानुमानस्य निरङ्कुशत्वात् । न च ज्ञानानाश्रयत्वमुपाधिः सुषुप्त्यादावात्मनोपि ज्ञानानाश्रयत्वेन तस्य साधनव्यापकत्वात् पक्षेतरत्वाच्च । न च ज्ञानासमवायिकारणानाश्रयत्वमुपाधिः । मनसि साध्याव्यापकत्वात् । संयोगस्याप्यव्याप्यवृत्तित्वेनात्मनोपि तादृशसंयोगानाश्रयतया साधनव्यापकत्वाच्च । तस्माज्ज्ञानवेद्यस्यानात्मत्वनियमात्तस्यैव तदाश्रयतया प्रतीयमानत्वात् ।

नात्मनो ज्ञानाश्रयत्वं कथं तर्हि चैतन्यस्य ज्ञानस्यानात्माश्रयत्वमिति चेद् न कथञ्चित्का तर्हि जानामीति प्रत्ययस्य गतिः। तस्यान्तःकरणवृत्त्याश्रयत्वविषयत्वेनोपपत्तेः । न चान्तः करणस्य ज्ञानाश्रयत्वे प्रमाणाभावः। ह्रीर्धीरित्येतत्सर्वं मन एवेत्यादिश्रुतेरेव प्रमाणत्वात्। तथाचाहंकारस्य ज्ञानकर्मतया घटादिवदनात्मत्वात् तत्साधन स्वप्रकाशसाक्षिस्वरूपत्वादात्मनस्तयोर्भेद एवोचितः। किंचाहमिति पराग्व्यावृत्तो ज्ञानाश्रयोहंकारोऽनुभूयते । चैतन्यं तु घटः स्फुरति पटः स्फुरति अहं स्फुरामीति चाहंकारे पराच्यपि सर्वत्रानुवृत्ततया प्रतीयते । स्फुरणस्यैव चैतन्यत्वात्। चैतन्यं चात्मेति साधितं तत्र कथमनुवृत्तचैतन्यात्मरूपत्वं व्यावृत्ताहंकारस्य स्यात्। व्यावृत्तानुवृत्तयोरेकत्वायोगात्। किं चात्मा यद्यहंकारतावन्मात्रः स्यात्तदा सुषुप्त्यादावात्मनि प्रतीयमानेऽहंकारोपि प्रतीयेत। ननु तदा विषयानुभवाभावान्नाहंकारः प्रतीयत इति चेत्तर्हि तदभिन्नात्मापि न प्रतीयेत स च प्रतीयत एव उत्थितस्य परामर्शात्। नन्वहंकारोपि स्वापादौ प्रतीयत एव तस्य स्वप्रकाशचैतन्यात्मत्वादिति चेत्तर्हि कदाचिदहमित्यभिमन्यमानोऽस्वाप्समिति स्मृतिरापद्येत नतु सुखमहमस्वाप्समिति। स्वापकालीनसुखानुभवितृत्वेनाहंकारोपि स्मर्यत इति चेन्न। तस्य प्रत्ययस्य स्थविरोहं बाल्ये पितरावन्वभूवमित्यत्र स्थाविर्यवदहंकारस्य तदानीं स्मर्त्रवच्छेदकत्वविषयत्वेनोपपत्तेः। अन्यथा ह्यस्तनाहंकार इव पूर्वोक्तानुसंधानापत्तिप्रसङ्गात । श्रुतिरप्यथात आत्मादेश इति प्रकृतादहंकारात् पृथगेवात्मानं दर्शयति। भगवत्स्मृतिरप्यहंकारविमूढात्मा कर्त्ताहमिति मन्यत इत्यात्मनः कर्तृत्वादिप्रयोजकमहंकारं दर्शयन्ती तद्भिन्नमेवात्मानमुपदिशति। तस्मादहंकारस्य चैतन्यकर्मत्वात् चैतन्याद्व्यावृत्तत्वात् चैतन्ये प्रतीयमानेप्यप्रतीयमानत्वादित्यादिन्यायात् श्रुतिस्मृतिभ्यां चात्मान्यत्वमेव। तर्हि कथं भिन्नयोरात्माहंकारयोरेकत्वानुभवः घटादिवत् तद्गतरूपादिवच्चा-

हंकारतद्धर्मावात्मनः सकाशात् किमिति पृथक् नानुभूयेते इति चेच्छरीरैक्याभिमानवन्मिथ्यातदात्म्याध्यासादेकत्वावगम इत्यवेहि। ननु शरीरेऽहमित्यहंकारैक्यावभासो न मिथ्या किन्तु गौण एव। अहमिति शरीराद्विविक्तस्यैवात्मनः प्रतीतेर्भिन्नत्वेन प्रतीयमानयोश्च सामानाधिकरण्यप्रत्ययस्य गौणत्वादिति चेत। न तावदत्राविवेकिनामात्मनः शरीरात्पृथगवभासोऽस्ति तथात्वे परलोकसम्बन्धिनि आत्मनि चार्वाकादीनामपि विवादाभावप्रसङ्गात्। न च विवेकिनां शरीरेऽहमिति प्रत्ययो गौणः अध्यासहेत्वविवेकाभावादिति वाच्यम्। अपरोक्षाध्यासस्य ह्यपरोक्षविवेकाभावो हेतुः। स च विवेकिनामप्यस्त्येव न च विविक्ततया प्रतीतिमात्रं गौणत्वे प्रयोजकमध्यासविरोधिविविक्तप्रत्ययस्यैव गौणत्वप्रयोजकत्वदर्शनात्। तस्मादहंकारात्मनोर्भिन्नत्वात्तदभेदावगमस्य च तादात्म्याध्यासनिमित्तत्वात् सिद्धमहंकारधर्मकर्तृत्वाद्यवगाहिप्रत्यक्षादेरात्मनोऽसङ्गताद्यावेदकवेदान्ताद् भिन्नविषयत्वमित्यलमतिविस्तरेण ॥ १०३ ॥

इदानीमारोपितभेदविषयत्वादपि न तेनाद्वैततत्त्वावेदकवेदान्तानां बाध इति वक्तुमादौ प्रत्यक्षादेस्तत्तद्वस्तुमात्रविषयत्वमेव न भेदविषयत्वमित्याह—

अभिन्न एवैष पटः समीक्ष्यते
न भेदगन्धोऽपि पटे समीक्ष्यते।
पटेऽपि भेदो यदि कल्प्यते तदा
पटो विदीर्येत कुतस्तदा पटः ॥ १०४ ॥

अभिन्न इति। भेदरहित एव पटो गृह्यते। पटस्वरूपमात्रमेव गृह्यत इति यावत्। एवकारव्यावर्त्यमाह—न भेदगन्ध इति। अल्पोपि

भेदो न प्रतीयत इत्यर्थः। ननु घटो भिन्नः पटो भिन्न इति भेदोपि प्रत्यक्षेण प्रतीयत इति चेत्सत्यम्। सा प्रतीतिर्भ्रान्तिरेव। न च बाधकाभावः। यौक्तिकबाधस्य सत्त्वात्। तथा हि किं वस्तुस्वरूपं भेदः उत तद्धर्मः। नाद्यः इत्याह—पटेऽपीति। भेदः स्वरूपभूतभेदः कल्प्यतेऽङ्गीक्रियते। विदीर्येत द्विधा भवेदित्यर्थः। ततः किं तत्राह—कुत इति। पट एव न स्यादित्यर्थः भेदो हि विदारणात्मा यदि पटादिस्वरूपं स्यात्। तदा पटो द्विधा भवेत्। एवं तत्तद्भेदस्वरूपतया तत्तद्वस्तुनो विदीर्णत्वेन न किञ्चिदप्येकं स्यादित्यर्थः॥ १०४॥

ननु यदपेक्षया यस्य स्वरूपं भेदः तत्स्वरूपं तदपेक्षया विदारणात्मकं भवति पटादिस्वरूपं च घटाद्यपेक्षया भेदरूपं तदपेक्षया विदीर्णं भवति न स्वरूपापेक्षयापि तत्स्वरूपस्य स्वापेक्षया भेदत्वाभावादित्याशङ्क्याह—

घटात्पटो भिन्न इतीष्यते यदि
स्फुटं प्रसज्येत विकल्पिता भिदा।
न सत्यमापेक्षिकमीक्षितं क्वचि-
त्तथा च यत्नेन निवेदयिष्यते॥ १०५॥

घटादिति। घटात्पटो भिन्न इति प्रतीतेरितरापेक्षितस्वरूपमेव भेदोऽङ्गीक्रियते यदीत्यर्थः। विकल्पिता आरोपिता भिदा भेदः यदि घटापेक्षपटस्वरूपमेव भेद इत्युच्येत तदा भेदस्यारोपितत्वमेव स्यात्। सापेक्षस्वरूपस्य कल्पितत्वदर्शनादित्यर्थः। ननु सापेक्षत्वेपि वास्तवत्वं किं न स्यात्तत्राह—न सत्यमिति। निरपेक्षस्वरूपस्यैव रज्ज्वादेः सत्यत्वदर्शनादित्यर्थः। आपेक्षिकस्य सत्यत्वं नेत्येतत्तृतीयाध्याये वक्ष्यत इत्याह—तथा चेति। निरूपयिष्यते पदार्थनिरूपणप्रकरण इत्यर्थः। किं

च यदि स्वरूपं भेदः स्यात् तदा तस्य सापेक्षत्वमपि न स्यात्। स्वरूपस्य निरपेक्षत्वात्। नचैकस्य स्वरूपद्वयमस्ति अन्यतरस्य स्वरूपाद् भिन्नत्वेनास्वरूपत्वात्। किंच स्वरूपस्यैव भेदत्वे दूरे वृक्षादिस्वरूपे ज्ञायमाने तद्भेदविषयः संशयो न स्यात् तस्यापि ज्ञातत्वात्। नन्वसाधारणधर्मवत् स्वरूपज्ञानं भेदज्ञानं तच्च न दूरतोऽनुभूयमानवृक्षादावस्तीति संशयः स्यादिति चेत्किं वस्तुगत्या साधारणधर्मवज्ज्ञानं भेदज्ञानम्। अथवा असाधारणधर्मवानयमित्यसाधारणधर्मवत्त्वप्रकारकं ज्ञानमाहोस्विदसाधारणधर्मवृक्षत्वादिप्रकारकं ज्ञानम्। नाद्यः। प्रमेयत्वेन ज्ञातेषु दूरस्थतरुषु भेदसंशयाभावप्रसङ्गात्। तदा-तस्यापि वस्तुगत्याऽसाधारणधर्मवृक्षत्वादिमज्ज्ञानत्वात्। द्वितीयेपि धर्मस्य किमिदमसाधारणत्वं किमेतद्वृत्तित्वमात्रम्। किं वाऽन्यावृत्तित्वे सत्येतद्वृत्तित्वम्। नाद्यः। तेष्वेव तरुषु संशयानुपपत्तेः। तत्रापि प्रमेयत्वस्य वृक्षवृत्तित्वज्ञानसंभवात्। द्वितीयेऽपि किं यत्किंचिदन्यावृत्तित्वमन्यावृत्तित्वपदार्थः उत सकलान्यावृत्तित्वम् अथवा प्रकृतान्यसकलावृत्तित्वम्। नाद्यः। वृक्षत्वेन ज्ञायमानेषु दूरस्थतरुषु तत्संशयानुपपत्तेः। तत्रापि वृक्षान्यघटाद्यवृत्तित्वेन वृक्षवृत्तित्वेन च वृक्षत्वाद्यनुभवसंभवात्। न द्वितीयः। असंभवात्। सर्वस्यापि सर्वापेक्षयान्यत्वेन तदवृत्तिधर्मस्याभावात्। व्याघाताच्च सकलान्यावृत्तेरेतद्वृत्तित्वानुपपत्तेः। न तृतीयः। परस्परा-श्रयादिपातात्। घटादेः सकलस्य वृक्षान्यत्वपरिज्ञाने सति वृक्षवृत्तिधर्मस्य वृक्षान्यसकलावृत्तित्वज्ञानं भवति। घटादेश्च सकलस्यान्यत्वपरिज्ञानं नाम भिन्नत्वज्ञानं तच्च घटाद्यन्यावृत्तित्वेन घटादिवृत्तिधर्मज्ञानं तच्च वृक्षस्य घटाद्यन्यत्वपरिज्ञानं विना न संभवतीति। असम्भवि चैतादृशं ज्ञानं नहि वृक्षव्यतिरिक्तं सर्वं केनचिदसर्वज्ञेन ज्ञातुं शक्यम् न च सर्वज्ञानं विना सर्वसर्वस्य वृक्षान्यत्व-परिज्ञानं सम्भवति। न च तद्विना धर्मस्य तदवृत्तित्वज्ञानं सम्भवतीति।

नापि तृतीयः। अयं घट इत्येतद्घटत्वेन ज्ञातेपि सोऽयं न वेति भेदसंश-दर्शनात्। किं च व्यावृत्तेषु घटेष्वनुवृत्तभेदप्रत्ययो दृश्यते भिन्नोऽयं भिन्नोऽयमिति। न च सोऽनुगतभेदं विना सम्भवति। न च वस्तुस्व-रूपमनुगतमेकं दृश्यते। ननु व्यावृत्तवस्तुस्वरूपत्वेपि भेदस्यानुगतैक-धर्मावच्छेदेनानुगतः प्रत्ययो भविष्यतीति चेतर्ह्यावश्यकस्य तस्यैव भेदत्वेन स्वरूपस्य तदसिद्धिप्रसङ्गः। ननु वस्तुस्वरूपस्य भेदत्वव्य-तिरेकेण स एव धर्मो न सिद्धति तस्य भिन्नाभिन्नवृत्तिविकल्पास-हत्वादिति चेन्न। अनिर्वचनीयभेदस्यानुपपत्त्यभावात्। तस्यानुपप-त्त्येकशरीरत्वात्। किञ्च घटो भिन्नः पटो भिन्नः घटस्य भेदः पटस्य भेद इति वस्तुविशेषणतया वस्तुविशेष्यतया च भेदग्रहणं दृश्यते। न च तत्तस्य वस्तुस्वरूपत्वे युज्यते। एकस्य स्वं प्रति विशेषणविशेष्य-भावानुपपत्तेः। किं चास्मिन्स्वरूपभेदपक्षे भिन्नो घट इति सह प्रयोगानुपपत्तिः। पर्यायतापातात्। ननु प्रवृत्तिनिमित्तभेदात् न पर्यायतापत्तिरिति चेत्। न तदनिरूपणात्। ननु किमिति तदनिरूपणं भिन्नतया प्रकाशमानत्वस्यैव भेदशब्दप्रवृत्तिनिमित्तत्वादिति चेत् किमिदं भिन्नतया प्रकाशमानत्वं किं भिन्न इति प्रतीतिविषयत्वं किं वा भिन्न इतिप्रतीतिरूपत्वम्। नाद्यः। ज्ञानं भिन्नमिति प्रयोगानुपपत्तेः। ज्ञानस्य तादृशप्रतीतिविषयत्वाभावात्। न द्वितीयः। घटो भिन्न इति प्रयोगानुपपत्तेः। घटस्य तादृशप्रतीतिरूपत्वाभावात्। एकस्मिन्नेव भेदभ्रमेणायमस्माद्भिन्न इति प्रयोगस्य साधुत्वप्रसङ्गश्च। प्रवृत्ति-निमित्तवैशिष्ट्यस्य सत्त्वात्। ननु तथा प्रमीयमाणत्वं तदिति चेन्न। तादृशधर्मपरिज्ञानदशायामपि भेदशब्दप्रयोगात्। भिन्नो घटो भिन्नतया प्रमीयत इत्यनयोरर्थभेदाभावप्रसङ्गाच्च। नन्वऽन्योन्याभावो भेदपदस्य प्रवृत्तिनिमित्तमिति चेत्तर्हि स एव भेदोऽस्तु किमनेन। न च घटादि-पदस्य घटत्वादिकं प्रवृत्तिनिमित्तं भेदपदस्य तु तत्स्वरूपमिति प्रवृत्तिनिमित्तभेद इति वाच्यम्। तत्तद्वस्तुस्वरूपाणामनन्तत्वेन

तदनुपपत्तेः । तस्मात्स्वरूपभेदपक्षोऽनुपपन्न इति भावः । अत्र कश्चिज्जल्पति—यथा भवन्मतेऽभेदस्य वस्तुस्वरूपत्वेपि देवदत्तादिस्वरूपग्रहणेपि तदभेदविषयः संशयोऽनुगतप्रत्ययः सहप्रयोगादिश्चोपपद्यते । एवं स्वरूपभेदपक्षेपि किं न स्यादिति तत्र न तावदभेदस्य स्वरूपत्वपक्षे संशयानुपपत्तिः ज्ञातेपि देवदत्तस्वरूपेऽभेदाज्ञानात् तत्संशयोपपत्तेः । ननु कथं ज्ञातेपि देवदत्तस्वरूपे तावन्मात्राभेदविषयाज्ञानं तिष्ठतीति चेन्न । अन्वयव्यतिरेकाभ्यां कालद्वयसम्बन्धप्रकारकदेवदत्तस्वरूपविषयैन्द्रियकज्ञानस्य कालद्वयसम्बन्धानुपपत्तिज्ञानजन्यशाब्दज्ञानस्य वा तदज्ञाननिवर्त्तकत्वेन तदभावे तदनिवृत्तेरुपपत्तेः । ननु यथानियतान्वयव्यतिरेकाभ्यां कालद्वयसम्बन्धप्रकारकस्वरूपज्ञानस्यैवाभेदज्ञानादिनिवर्तकत्वम् । एवं भिन्नत्वेन ज्ञानमेव भेदसंशयादिविरोधी तया तन्निवर्त्तकं तथा च स्वरूपज्ञाने सत्यपि तादृशज्ञानाभावात्संशयादिरिति चेत् । तत्र यदि भिन्नत्वं नाम भेदवत्त्वं तदसंभवि स्वरूपस्यैव भेदत्वेन धर्मधर्मिभावायोगात् । यदि च घटत्वादिवदखण्डो धर्मस्तदा तेनैव भेदव्यवहारोपपत्तौ न स्वरूपभेदकल्पनया कृत्यमस्ति । नाप्यनुगतव्यवहारानुपपत्तिः । अनिर्वचनीयभेदाभावमादाय तदुपपत्तेः । न चैवं स एवाभेदोऽस्त्विति वाच्यम् । तदाश्रयवस्तुस्वरूपस्य भिन्नत्वानुपपत्तेरभेदात्मकत्वस्याप्यभावे वस्तुन एवासिद्धिप्रसङ्गाद्भेदाभेदात्मकव्यतिरेकेण वस्तुनो रूपान्तराभावात् कल्पितभेदाभावस्य शास्त्रप्रतिपाद्यत्वानुपपत्तेश्च स्वरूपाभेदोऽङ्गीकरणीयः । अनिर्वचनीयभेदाभावमादायैव च सहप्रयोगादेरप्युपपत्तिरित्यलम् ॥ १०५ ॥

ननु मा भूत्स्वरूपं भेदः धर्मस्तु भविष्यति । स च वस्तुस्वरूपे ज्ञातेपि धर्मिप्रतियोगिज्ञानसापेक्षज्ञानस्तदभावे न ज्ञायत इति नोक्तसंशयाद्यनुपपत्तिरिति चेत् स किं धर्मोऽन्योऽन्याभावः । किं वाऽन्य एव पृथक्त्वलक्षणः । नाद्यः सम्भवतीत्याह—

न भेदबुद्धिर्घटते प्रमाणतो
विनाऽपि धर्मिप्रतियोगिसंविदा ।
न भेदबुद्धिं विरहय्य कल्प्यते
तथैव धर्मिप्रतियोगिधीरपि ॥ १०६ ॥

न भेदबुद्धिरिति—अन्योन्याभावलक्षणभेदबुद्धिरपि धर्मिप्रतियोगिसंविदा विना धर्मिज्ञानेन विना प्रतियोगिज्ञानेन च विनेत्यर्थः । इदमस्माद्भिन्नमिति धर्म्यादिघटितस्यैव भेदस्यानुभवात् । धर्म्यादिज्ञानं विना भेदज्ञानं न सिद्ध्यतीत्यर्थः । अस्तु धर्म्यादिज्ञानं तत्राह—न भेदेति । तथैव यथैव धर्मिप्रतियोगिज्ञानं विना भेदज्ञानं न संभवति । तथैव भेदबुद्धिमिदमिदं न भवतीत्यन्योन्याभावलक्षणभेदबुद्धिं विरहय्य विना धर्म्यादिज्ञानमपि न संभवति । अन्यथा एकस्मिन्नपि वस्तुनि धर्मिप्रतियोगित्वज्ञानं स्यात् । तथा चान्योऽन्याश्रयादिदोषाद्भेदज्ञानं न सम्भवतीत्यर्थः । यद्यपि भेदोऽनुभूयते तथाप्युक्तरीत्या प्रमाणसिद्धत्वाभावान्न वास्तवत्वमित्यभिप्रेत्योक्तम् । प्रमाणत इति ॥ १०६ ॥

पृथक्त्वलक्षणो भेद इति द्वितीयपक्षन्निरस्यति—

परस्परभावधिया न भेदधी-
र्विनोपपन्ना न तया विनेतरा ।
इतीदमन्योन्यसमाश्रयं यतो
मतिद्वयं तेन तदस्तु कल्पितम् ॥ १०७ ॥

परस्परेति । अन्योन्याभावज्ञानेन विना पृथक्त्वधीर्नोपपन्ना तया पृथक्त्वधिया विनेतराऽन्योन्याभावधीर्नोपपन्ना । इदमस्मात्पृथगिति

धर्मप्रतियोगिघटितमेव पृथक्त्वमनुभूयते। तत्र च धर्मिप्रतियोगिज्ञानस्यान्योन्याभावज्ञानपूर्वकत्वेऽऽत्माश्रयाद्यापातात् पृथक्त्वज्ञानपूर्वकत्वमेव वक्तव्यम्। तथा चान्योऽन्याभावज्ञाने सति धर्मिप्रतियोगिज्ञानसंभवात् पृथक्त्वज्ञानं पृथक्त्वज्ञाने सति धर्म्यादिज्ञानसंभवादन्योऽन्याभावज्ञानमित्यनेन प्रकारेण मतिद्वयमन्योऽन्याभावज्ञानं पृथक्त्वज्ञानं चान्योन्यसमाश्रयं यत इति सम्बन्धः। ननु भेदज्ञानस्य धर्मिप्रतियोगिज्ञानजन्यस्य तत्सापेक्षत्वेपि न धर्म्यादिज्ञानस्य भेदज्ञानापेक्षा। अनुपयोगात्। नचैवं सत्येकस्मिन्नपि वस्तुनि धर्मिप्रतियोगिज्ञानसंभवेन तन्निष्ठभेदप्रतियोगित्वबुद्धिः किं न स्यादिति वाच्यम्। न हि धर्मिप्रतियोगित्वज्ञानं भेदज्ञाने कारणम्। येन भेदज्ञानाभावेन धर्मिप्रतियोगित्वज्ञानं न सम्भवति। सम्भवति चेदेकस्मिन्नपि तज्ज्ञानं स्यादित्यापद्येत। किन्तु वस्तुतो यौ धर्मप्रतियोगिनौ तज्ज्ञानमेव अस्तु वा धर्मिप्रतियोगित्वज्ञानमपि तत्र कारणं तथापि न भेदज्ञानापेक्षा नवैकस्मिन्नपि तत्त्वज्ञानप्रसङ्गः विद्यमानभेदयोः स्वरूपेण ज्ञायमानयोरेव हि धर्मित्वं प्रतियोगित्वं वा गृह्यते न गृह्यमाणभेदयोः। अतो नान्योऽन्याभावपक्षे ऽन्योऽन्याश्रय इत्याशङ्कामुपसंहारव्याजेनापाकरोति—तेनेति। तस्मादन्योन्यसमाश्रितत्वात् तदन्योन्याभावलक्षणभेदज्ञानं पृथक्त्वलक्षणभेदज्ञानं चेति मतिद्वयमपीत्यर्थः। कल्पितमारोपितविषयम्। एतदुक्तं भवति। इदमस्माद्भिन्नमिति प्रतियोगित्वप्रकारकं हि भेदज्ञानं भवति। पञ्चम्या अवध्यर्थत्वादवधेश्च प्रतियोगित्वात्पूर्वोपस्थितस्यैव च प्रकारत्वं दण्डादौ तथैव दर्शनात्। तथैव भवद्भीकृतेश्च। ननु गत्यन्तराभावात्प्रतियोगित्वं पूर्वानुपस्थितमपि प्रकार इति चेन्न। खाण्डनिकं प्रत्येवमुपन्यासस्यानर्हत्वात्। नन्वस्तु पूर्वं प्रतियोगित्वज्ञानं तच्च भेदज्ञानं विनापि विद्यमानभेदस्य स्वरूपेण गृह्यमाणस्य भवतीति नान्योन्याश्रय इति चेन्न। भेदज्ञानं विनापि विद्यमानभेदमात्रेण प्रतियोगित्वज्ञाने मिलितयोः नीरक्षीरयोरपि

परस्परभेदप्रतियोगित्वज्ञानं किं न स्यात् । ननु प्रतियोगितावच्छेदकधर्मप्रकारेण ज्ञायमानयोर्विद्यमानभेदयोरेव परस्परभेदप्रतियोगित्वज्ञानं नीरक्षीरयोश्च भेदसत्वेपि न प्रतियोगितावच्छेदकधर्मप्रकारेण ज्ञानमिति न प्रतियोगित्वज्ञानमिति चेत्किं प्रतियोगितावच्छेदकधर्मवानयमितिज्ञानं प्रतियोगित्वज्ञाने कारणमुच्यते । किं वा वस्तुगत्या यः प्रतियोगितावच्छेदको धर्मः तत्प्रकारकं ज्ञानम् । नाद्यः । प्रतियोगित्वज्ञानं विना तदवच्छेदकधर्मवानयमिति ज्ञानानुपपत्तेरन्योऽन्याश्रयात् । न द्वितीयः । अहमित्यात्मत्वाकारेणात्मनि ज्ञायमाने शरीरत्वप्रकारेण च शरीरे ज्ञायमानेपि शरीरात्मनोः परस्परभेदप्रतियोगित्वज्ञानादर्शनात् प्रतियोगित्वज्ञाने वा सर्वेषामपि शरीराद्भिन्नत्वेनात्मनः साक्षात्कृतत्वात् तद्विषयसंशयविपर्ययाद्यनुपपत्तिप्रसङ्गः । किं च शुक्लः पट इति प्रतियोगितावच्छेदकधर्मप्रकारेण ज्ञायमानेपि शौक्ल्येन पटनिष्ठभेदप्रतियोगित्वं गृह्यते । शौक्ल्यपटयोरभेदेनानुभवात् । ननु समवायलक्षणदोषात्तद्ग्रहणमिति चेत्तर्ह्यक्षचरणचरणपरिचरणप्राप्तगुणगुणिविवेकज्ञानदशायामपि तद्ग्रहणं न स्यात् । समवायलक्षणदोषस्य तदापि भावात् तथा चाक्षचरणपरिचरणं व्यर्थमेव स्यात् । किञ्च घटस्य पटभिन्नत्वसंशयदशायां तद्व्यतिरेकनिश्चयदशायां च पटनिष्ठभेदप्रतियोगित्वनिश्चयविरह इति प्रतियोगित्वज्ञानं भेदनिश्चयसाध्यमेव । तथा च भेदज्ञानमन्योन्याऽश्रयाद्यजगरग्रस्तमेवेति । तस्मात्प्रत्यक्षादेरनिर्वचनीयभेदविषयत्वान्न तेनाद्वैतप्रतिपादकवेदान्तबाध इति भावः । अथवा अस्तु प्रत्यक्षादेरपि तत्त्वावेदकत्वं तथापि नाद्वैतसमन्वयस्य तेन बाधः स हि स्वविषयाद्वैतविरुद्धभेदावगाहिमानेनैव बाध्यते न तु मानमात्रेण । प्रत्यक्षादिकं च न तथा वस्तुमात्रविषयत्वादित्यभिप्रेत्य वास्तवमाह किंच प्रतीचीति । अद्वैतवस्तुनि पराचि बाह्यवस्तुस्वरूपे मेयविभागसिद्धेः । अविरुद्धमेयविभागसिद्धेः । ननु कथं प्रत्यक्षादीनां स्वरूपमात्रविषयत्वं

प्रपञ्चनिष्ठस्यात्मप्रतियोगिकभेदस्य परस्परप्रतियोगिकभेदस्य च विषयीकरणादिति चेत्। न तावदात्मप्रतियोगिको भेदो ग्रहीतुं शक्यः। आत्मनः स्वप्रकाशतया प्रमाणविषयत्वासंभवेन तत्प्रतियोगिकभेदस्यापिप्रमाणतो ग्रहीतुमशक्यत्वात्। नापि प्रपञ्चभेदो ग्रहीतुं शक्यः। वस्तुविदारणादन्योन्याश्रयादिदोषग्रस्तत्वात्। क्वचित्प्रतीतेश्चानिर्वनीयभेदविषयत्वेनाप्युपपत्तेरित्यभिप्रेत्याह—आभव्र एवत्यादिना। तदस्तु कल्पितमित्यन्तेनार्थस्तु पूर्ववत्॥ १०७॥

किं च सफलस्यैव प्रमाणस्य प्रामाण्यं न तु निष्फलस्य जडप्रपञ्चविषयप्रत्यक्षादेश्च न किञ्चित्फलं सम्भवति तदनिरूपणात्। तथा च प्रत्यक्षादेर्निष्फलत्वेनाप्रमाणत्वादपि न तेन वेदान्तबाध इति वक्तुं किं प्रत्यक्षादेरज्ञाननिवृत्तिः फलम् उत प्राकट्यमिति विकल्प्याद्यमिरस्यति—

असन्निवृत्तिर्न च सन्निवृत्ति-
र्न चोपपन्ना सदसन्निवृत्तिः।
जडप्रमाणस्य फलं ततोऽपि
न तेन वेदान्तजबुद्धि बाधः॥ १०८॥

असदिति। किन्निवर्त्यमज्ञानमसत् उत सत् किं वोभयरूपमुतानिर्वचनीयम्। नाद्य इत्याह—असन्निवृत्तिरिति। असतो निवृत्तिर्नोपपन्ना। तस्य तुच्छत्वात्। तथा च प्रत्यक्षादिनिवर्त्याज्ञानस्यासत्त्वे तन्निवृत्तेरेवानुपपत्तेः। साफल्यं न भवतीत्यर्थः। न द्वितीय इत्याह—नच सन्निवृत्तिरिति। सतोपि निवृत्तिर्नोपपन्ना सत आत्मवत्सर्वदा सत्त्वनियमात्तथा च तस्य सत्त्वे तन्निवृत्त्यनुपपत्तेः सफलन्न भवतीत्यर्थः। न तृतीय इत्याह—न चोपपन्नासदिति। सदसद्रूपस्यापि वस्तुनो निवृत्तिर्न संभवति। विरोधेन

सदसद्रूपवस्तुन एवाभावादित्यर्थः। न चतुर्थ इत्याह—जडप्रमाणस्येति। प्रमाणानां हि स्वविषयाज्ञाननिवृत्तिरेव फलम्। अनिर्वचनीयाज्ञानस्य जडविषयत्वाभावात् भवद्भिरनङ्गीकाराच्च न तत्प्रमाणस्य तन्निवृत्तिः फलमुपपन्ना न फलत्वेनोपपन्नेत्यर्थः। फलितमाह—ततोऽपीति। यस्मात्सदादिनिवृत्तिर्न फलं ततो हेतोः अपिशब्दात् पूर्वोक्तहेतोरपि तेन प्रत्यक्षादिज्ञानेन वेदान्तजबुद्धिबाधः वेदान्तजन्याद्वयादिबोधबाधो नेत्यर्थः॥ १०८॥

द्वितीयेपि किं प्राकट्यं परप्रकाश्यं ज्ञानफलमुत स्वप्रकाशरूपं नाद्य इत्याह—

असत्प्रसूतिर्न च सत्प्रसूति—
र्न चोपपन्ना सदसत्प्रसूतिः।
जडप्रमाणस्य फलं ततोऽपि
न तेन वेदान्तजबुद्धिबाधः॥ १०९॥

असदिति। ज्ञानजन्यं प्राकट्यमसत्। उत सत्। उतोभयरूपं नाद्य इत्याह—असत्प्रसूतिरिति। असतः प्रसूतिरुत्पत्तिर्न सम्भवति। न हि शशविषाणं कदाचिदुपपन्नं दृष्टं तथा च प्राकट्यस्यासत्वे ज्ञानजन्यत्वानुपपत्तेर्न तदुत्पत्तिर्जडप्रमाणस्य फलमुपपन्नेत्यर्थः। न द्वितीय इत्याह—न च सत्प्रसूतिरिति। सतोपि प्रसूतिरनुपपन्ना। सत्त्वादेव न हि सतो घटादेः कदाचिदुत्पत्तिर्दृष्टा। तथाच प्राकट्यस्य सत्वेप्युत्पत्त्यनुपपत्तेः। न तत्प्रसूतिस्तत्फलमित्यर्थः। न तृतीय इत्याह—नचोपपन्ना सदसत्प्रसूतिरिति। विरोधेन सदसद्रूपवस्तुन एवाभावादित्यर्थः। ततः यतः प्राकट्यस्य सदादिरूपत्वे तत्प्रसूतिः फलन्न सम्भवति॥ १०९॥

अस्तु—तर्हि स्वप्रकाशं प्राकट्यं प्रमाणस्य फलमिति चेन्न—प्रमाणफलस्य विषयनिष्ठत्वनियमेन स्वप्रकाशसंविदो जडाश्रितत्वेनोत्पत्त्यनुपपत्तेः । किं च तत्प्राकट्यं व्यापारवतः फलमुत व्यापारशून्यस्य नाद्य इत्याह—

जडार्थसंवित्र च कुर्वतः फलं
तदा हि कुर्वत्त्वमपीदृशं भवेत् ।
अकुर्वतस्तत्फलमित्यदीरय-
न्विहस्यते दुर्मतिरर्भकैरपि ॥ ११० ॥

जडार्थसंविदिति । जडपदार्थनिष्ठस्वप्रकाशप्राकट्यलक्षणा संवित्कुर्वतः व्यापारवतो न फलं तत्रोपपत्तिमाह—तदा हीति । तदा कुर्वतः फलमङ्गीकारे कुर्वत्त्वं व्यापारवत्त्वं व्यापार इति यावत् । ईदृशं प्राकट्यवत्कुर्वत एव फलं स्यादित्यर्थः । प्राकट्यस्य व्यापारवत्फलत्वे व्यापारस्यापि कार्यत्वाद्व्यापारवज्जन्यत्वं वक्तव्यम् । एवं तस्य तस्यापीति व्यापारानवस्थानात् जागराद्यकालप्रमाणफलानुपपत्तिरित्यर्थः । न द्वितीय इत्याह—अकुर्वत इति । व्यापारशून्यस्य तत्प्राकट्यं व्यापारवत एव कारकत्वात्कारकस्यैव फलजनकत्वात् । अकुर्वतस्तत्फलमितिवदन् बालानामप्युपहास्यो भवतीत्यर्थः । अथवा तादृशसंवित्स्वात्मजनकस्य फलमुत स्वात्माजनकस्य । नाद्यः । स्वात्मजनकत्वं हि स्वजननानुकूलव्यापारवत्त्वं तथा च तत्तद्व्यापारानुकूलतत्तद्व्यापारवत्त्वेनानवस्थाप्रसङ्गः । द्वितीये तदजनकस्य तत्फलमिति वदन् मूढधीरर्भकाणामप्युपहास्य इत्याह—जडेति । कुर्वतः स्वजनकस्य ईदृशं स्वजनकफलमितरत्समानम् । एतच्च प्राकट्यस्य स्वप्रकाशत्वपक्षोक्तदूषणं परप्रकाशत्वपक्षेपि द्रष्टव्यम् ॥ ११० ॥

इदानीं स्वप्रकाशत्वपक्षं परप्रकाश्यत्वपक्षवत्सदादिविकल्पेनापि

दूषयति—

सती न संवित्क्रियते हि सत्त्वा-
न्न चासती तद्वदसत्त्वहेतोः ।
न चोपपन्नं सदसत्त्वमस्या-
स्ततो न कार्यत्वमुपैति संवित् ॥ १११ ॥

सतीति । संविद्विषयनिष्ठस्वप्रकाशप्राकट्यं क्रियते जन्यते । इतरत्स्पष्टम् ॥ १११ ॥

किं चोत्पत्त्यनुकूलशक्तिविशिष्टं प्राकट्यमुत्पाद्यते । उत तदुपलक्षितम् । नाद्यः । शक्तेरपि जन्यत्वप्रसङ्गात् । न द्वितीयः । नभसोपि चूर्णीकरणप्रसङ्गादिति प्राकट्यपक्षे दोषान्तरमाह—

न शक्यमुत्पाद्यमिति प्रशस्यते
तदा हि शक्तेरपि जन्यताऽऽपतेत् ।
अशक्यमुत्पाद्यमितीष्यते यदि
द्रुतं नभश्चूर्णय मुद्गरादिना ॥ ११२ ॥

न शक्यमिति । शक्यमुत्पादनशक्तिविशिष्टं न प्रशस्यते सम्यङ् न भवति । तत्र हेतुमाह—तदा हीति । तदा शक्यस्य जन्यत्वे शक्तेरपि जन्यताऽऽपतेत् । हि यतः शक्तिविशिष्टस्यैव शक्यत्वात् शक्तेश्च जन्यत्वे शक्तिविशिष्टाया एव तस्या जन्यत्वमिति शक्त्यानन्त्यप्रसङ्ग इत्यर्थः । अशक्यमुत्पादनशक्तिशून्यं द्रुतं शीघ्रं चूर्णय घटवत् चूर्णं कुरु अतस्तन्न सम्भवतीत्यर्थः । ननु न कार्यानुकूलव्यापारवदेव कारणं येनानवस्था भवेत् नापि शक्यमेव कार्यं येन शक्तेरपि

जन्यतापत्तेत् किन्तु नियतपूर्ववर्त्तिकारणं नियतपश्चाद्भावि कार्यं तथा च न कुर्वन्वशक्यत्वादिविकल्पदोष इति चेन्न—पूर्ववर्तित्वं हि प्रागभावावच्छिन्नकालवृत्तित्वं पश्चाद्भावित्वं च कार्यसत्तावच्छिन्नकालवृत्तित्वं स्वतः कालस्य पूर्वापरभागशून्यत्वात् तथा च प्रागभावकालयोरकारणत्वप्रसङ्गः कार्यस्य चाकार्यत्वप्रसङ्गः प्रागभावस्य स्वावच्छिन्नकालवृत्तित्वासम्भवात् कालस्य चावृत्तित्वात् स्ववृत्तित्वासम्भवाच्च। कार्यस्य च स्वावच्छिन्नकालवृत्तित्वानुपपत्तेः। पूर्वभावित्वपश्चाद्भावित्वयोः कार्यकारणस्वरूपापेक्षायामन्योन्याश्रयत्वाच्च। तथा च व्यापारवत एव कारणत्वं शक्यस्यैव कार्यत्वमिति कुर्वत्वादिविकल्पदोषस्तदवस्थ एवेति न प्राकट्यं प्रत्यक्षादिज्ञानफलमिति भावः ॥ ११२ ॥

ननु व्यवहारस्तत्फलमिति चेत्तस्य प्रमाणफलस्फुरणजन्यत्वात् हानादिरूपेणाननुगतत्वादसार्वत्रिकत्वाच्चेत्यभिप्रेत्य जडप्रमाणानामद्वैतप्रमाणबाधकत्वनिरसनमुपसंहरति—

जडप्रमाणस्य फलानिरूपणा-
ज्जडस्य तत्त्वं न निरूपणक्षमम् ।
अतो न मानान्तरमर्थतोऽपि न
स्त्रयीशिरोवस्तु निराकरिष्यति ॥ ११३ ॥

जडप्रमाणस्येति । जडविषयप्रमाणस्य फलानिरूपणात् न तस्य स्वतो वेदान्तबाधकत्वमित्यर्थः। किं च प्रत्यक्षादिप्रमेयघटादितत्त्वमपि दुर्निरूपं तथा हि-तत्सत्। उतासत्। उतोभयरूपम्। तत् त्रेधापि जन्यत्वविनाशत्वदृश्यत्वाद्यानुपपत्तेर्विरोधाच्चातो विषयतोपि प्रत्यक्षादेर्न वेदान्तबाधकत्वमित्याह—जडस्य तत्त्वमिति । न निरूपणक्षमं सदादिरूपेणेत्यर्थः। अतः यतो जडवस्तुनः स्वरूपमपि सदादिरूपेण न

निरूपणक्षममतः अर्थतो विषयतोपि नः अस्माकं त्रयीशिरोवस्तु वेदान्तप्रतिपद्यवस्तु ॥ ११३ ॥

एवमान्तरबाह्यप्रत्यक्षादीनामात्मविषयत्वाभावेन भिन्नवस्तुविषयत्वासम्भवेन प्रपञ्चस्वरूपमात्रविषयतया च वेदान्ताविरुद्धमेयकत्वात् फलवन्वस्य च दुर्निरूपत्वात् प्रत्यक्षादिविषयस्य च दुर्निरूपत्वान्न तैर्वेदान्तबाध इत्युक्तम् । इदानीमस्तु वा कर्तृत्वाद्यवगाहिप्रत्यक्षादेरात्मविषयत्वं बाह्यप्रत्यक्षादेश्च भिन्नप्रपञ्चविषयत्वमस्तु च तादृशप्रत्यक्षेणासङ्गाद्वितीयब्रह्मावेदकवेदान्तानां विरोधः । तथापि न प्रत्यक्षादिना वेदान्तबाधः किन्तु वैदान्तैरेव तद्बाध इत्याह—

आत्मन्येव समस्तमस्तु यदि वा मानान्तरं तेन च
स्पष्टं वेदशिरोविरुद्धमिति च स्वीकुर्महे कामतः ।
एवं सत्यपि पूर्वभाविसकलं मानान्तरं बाधते
पश्चात्कस्यचिदेव वेदशिरसो जाता परब्रह्मधीः ॥११४॥

आत्मन्येवेति । यदि वा यद्वा मानान्तरं कर्तृत्वाद्यवगाहिप्रत्यक्षादिकं समस्तमात्मन्येवास्तु आत्मविषयमेवास्त्वित्यर्थः । तेन मानान्तरेण वेदशिरः असङ्गताद्यावेदकवाक्यं विरुद्धमिति स्वीकुर्महे। चकाराद्बाह्यप्रत्यक्षादिकं च भिन्नप्रपञ्चविषयमेवास्तु तेन चाद्वितीयावेदकवेदान्तवाक्यं विरुद्धमिति स्वीकुर्महे । किं च प्रत्यक्षादिकमप्यात्मविषयमेवं घटः सन् पटः सन्निति प्रपञ्चानुगततत्कारणपरमात्मसत्ताया विषयीकरणात्तथा च सप्रपञ्चब्रह्मणः प्रत्यक्षादिना विषयीकरणात् तेन ब्रह्मणो निष्प्रपञ्चत्वावेदकवेदान्तवाक्यं च विरुद्धमिति स्वकुर्मह इति योज्यते । तर्हि कथमसङ्गाद्वैतनिष्प्रपञ्चब्रह्मसिद्धिः वेदान्तानां तद्विरुद्ध प्रत्यक्षादिभिर्दूषितत्वादित्यत आह-एवं सत्यपीति । विरोधे सत्यपीत्यर्थः ।

पूर्वभावि वेदान्तापेक्षया पूर्वप्रवृत्तं प्रत्यक्षादेश्च पूर्वप्रवृत्तत्वमज्ञान-सिद्धत्वात् वेदान्तजन्यधियश्च पश्चाद्भावित्वं श्रवणादिसापेक्षत्वा-द्वेदशिरसो निमित्तात् पश्चाज्जाता पश्चात्वं च प्रत्यक्षाद्यपेक्षया पर-ब्रह्मधीः असङ्गाद्वैतनिष्प्रपञ्चब्रह्मसाक्षात्कारः साध्यतिशुद्धाशय-स्यैवेत्याह—कस्यचिदिति ॥ ११४ ॥

ननु कथंवेदान्तजन्यज्ञानस्य परत्वेन प्रत्यक्षादिबाधकत्वमुच्यते। प्रत्यक्षादेरेवासंजातविरोधित्वेनोत्पन्नतया बलवत्त्वेन तद्बाधकत्वस्य युक्तत्वादित्याशङ्क्य सोपपत्तिकं दृष्टान्तमाह—

पूर्वोत्पन्नमृगाम्बुविभ्रमधियो बाधं विना नोत्तरं
विज्ञानं समुदेतुमूषरभुवो याथात्म्यमावेदयत्।
शक्नोतीति यथा मृगाम्बुधिषणामुन्मृद्य दुत्पद्यते
तद्वद्भेदशिरोवचोजनितधीर्भेदभ्रमं ब्रह्मणि ॥ ११५ ॥

पूर्वोत्पन्नेति। मृगाम्बुविभ्रमो मृगतृष्णिकायामुदकभ्रान्तिः। ऊषर-भुवो याथात्म्ये ऊषरभूमित्वमावेदयत् प्रकाशयत्। धिषणा धीः उन्मृ-द्य बाधमानं यथापूर्वोत्पन्नसंजातविरोधिनमपि भ्रान्तिप्रत्ययं निरा-कुर्वदेवोत्तरम् ऊषरत्वावगाहिज्ञानमुत्पद्यते। तत्कस्य हेतोः तद्बाधं विना अस्योत्पत्त्यनुपपत्तेः पूर्वं तु न तथा तत्काले उत्तरस्यानुत्पन्न-त्वादित्यर्थः। दार्ष्टान्तिकमाह—तद्वदिति। ब्रह्मणीति विषयसप्तमी। तथा तत्त्वमादिवेदान्तवाक्यजन्यब्रह्मविषयधीः पूर्वोत्पन्नमसंजातविरोधिन-मपि प्रत्यक्षादिजन्यप्रपञ्चभेदभ्रममुन्मृद्यदेवोत्पद्यते। ततः पूर्वोत्पन्न-तयाऽसंजातविरोधित्वमकिञ्चित्करमित्यर्थः ॥ ११५ ॥

उत्तरस्य पूर्वबाधकत्वं मीमांसान्यायेनापि दर्शयितु-माह—

पौर्वापर्ये पूर्वदौर्बल्यमाह

षष्ठेऽध्यायेऽवस्थितो जैमिनिर्यत् ।
वक्ष्यामस्तत्सर्वमानीय तुभ्यं
बुद्धिं स्वीयां सम्यगत्रावधत्स्व ॥ ११६ ॥

पौर्वापर्य इति । निमित्तयोः पूर्वापरभावे सति पूर्वस्य दौर्बल्यमिति षष्ठाध्यायप्रमेयविचारे स्थितो जैमिनिराचार्यो यदाह तत्सर्वमानीय तुभ्यं वक्ष्यामः । बुद्धिं सम्यगवधत्स्व । अवहितां कुरु समाहितमना भवेत्यर्थः ॥ ११६ ॥

तदुक्तमेवार्थमधिकरणरचनारूपेण दर्शयति—

उद्गातृप्रतिहर्तृकर्तृकतया जातौ वियोगौ क्रमा-
द्यस्मिन्कर्मविधिप्रयोगसमये तत्रैष नः संशयः ।
किं सर्वद्रविणव्ययो भवतु वा संस्थापनं दक्षिणा-
हीनस्येति तदा परं बलवदित्यूचे मुनिर्जैमिनिः ॥११७॥

उद्गातृति । उद्गातृप्रतिहर्त्तारौ ऋत्विग्विशेषौ कर्त्तारौ ययोर्वियोग-योस्तयोर्भावस्तत्ता तयेत्यर्थः । वियोगौ हस्तविश्लेषौ यस्मिन् ज्योति-ष्टोमादौ कर्मणि कर्मविधिप्रयोगसमये विधीयत इति विधिः अन्योन्य हस्तादानेन हविर्धानतो बहिर्निष्क्रमणलक्षणं तस्य प्रयोगोऽनुष्ठानं तत्समये यस्मिन्कर्मणि प्रसर्पणकाले उद्गातृविच्छेदः प्रतिहर्तृविच्छे-दश्च क्रमाज्जात इत्यर्थः । तत्र तस्मिन्कर्मणि । अनेन विषयो दर्शितः संशयमाह—एष इति । नः एष संशयो जायत इत्यर्थः । संशयप्रकार-मेवाह—किमिति । सर्वद्रविणव्ययः सर्वस्वत्यागः । किं वा दक्षिणा-हीनस्य प्रकृतयागस्य संस्थापनं समाप्तिः किं प्रतिहर्तृविच्छेदनिमि-

स्तेन यं यागः सर्वस्वदक्षिणः कर्त्तव्यः किं वोद्गातृविच्छेदनिमित्तेनायमदक्षिण एव समापनीय इति संशयो भवतीत्यर्थः। पूर्वपक्षस्तदेत्यनेन सूचितः। यो विच्छेदः पूर्वं संजातः तत्प्रयोज्यमेव कर्त्तव्यमिति पूर्वपक्षे प्राप्त इत्यर्थः। सिद्धान्तमाह—परामर्शात। पश्चाद्भाविनिमित्तमेव पूर्वापेक्षया बलवत्स्वकार्यं प्रयोजयतीत्यर्थः। अत्रेदं विवक्षितम्। ज्योतिष्टोमे तावदध्वर्व्वादृत्विजामन्योन्यहस्तादानेन यज्ञशालातो बहिर्निष्क्रमणं श्रूयते। अध्वर्यु निष्कामन्तं प्रस्तोता संतनुयात् तमुद्गाता तं प्रतिहर्ता तं ब्रह्मेति तत्र प्रतिहर्तृविच्छेदे सर्वस्वदक्षिणया यागसमाप्तिः श्रूयते सर्ववेदसं दद्यादिति। उद्गातृविच्छेदे च दक्षिणाराहित्येन यागसमाप्तिः श्रूयते। अदक्षिणः स यज्ञः संस्थाप्य इति। तत्रोभयोर्युगपद्विच्छेदे च ऐच्छिकविकल्पः तुल्यबलत्वादिति निर्णयः। यत्र च पूर्वापरभावेन विच्छेदः तत्र संशयः किं पूर्वविच्छेदः स्वकार्यं प्रयोजयति। उतोत्तरविच्छेद इति। तत्रासंजातविरोधित्वात्प्रबलः पूर्व एव स्वकार्यं प्रयोजयतीति प्राप्ते सिद्धान्तः पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवदिति निमित्तयोः पूर्वापरभावे सति पूर्वस्य दौर्बल्यं पूर्वोपमर्दमन्तरेणोत्तरस्यानुपपत्तेः। तथा चोत्तर एव स्वकार्यं प्रयोजयति। तदुक्तं—भट्टपादैः। पूर्वात्परबलीयस्त्वं तत्र नाम प्रतीयताम्। अन्योन्यनिरपेक्षाणां यत्र जन्मधियां भवेदिति ॥ ११७ ॥

एवं पौर्वापर्ये पूर्वदौर्बल्यमित्यस्य भागस्यार्थमुक्त्वा प्रकृतिवदितिभागस्यार्थमाह—

यद्वत्प्राकृतवैकृतावतितरामन्योन्यसंस्पर्धिनौ
धर्मौ बाध्यनिवर्तकावभिमतौ बुद्धौ क्रमेणान्वयात्।
पाठव्यत्ययसम्भवेऽपि हि तयोर्बुद्धिक्रमो विद्यते
पूर्वा प्राकृतधर्मधीरितरधीरन्त्या तथैवोत्थितेः ॥ ११८ ॥

यद्वादिति । प्राकृतवैकृतौ प्रकृत्युपदिष्टो धर्मः प्राकृतः विकृत्युपदिष्टो धर्मो वैकृतः तावतितरामत्यन्तमन्योन्यसंस्पर्धिनावन्योन्यविरोधिनौ । इदं च बाध्यबाधकत्वे हेतुत्वेनोक्तं धर्मौ बर्हिषः कुशमयत्वशरमयत्वलक्षणौ बाध्यनिवर्त्तकाभिमतौ प्राकृतकुशमयत्वं बाध्यम् । वैकृतशरमयत्वं बाधकमित्यभिमतौ । तत्र हेतुमाह—बुद्धिक्रमेणान्वयादिति । पूर्वप्रतीतं हि पूर्वमन्वययोग्यं चरमप्रतीतं तु पश्चात् प्राकृतं च कुशमयत्वादिकं पूर्वप्रतीतमिति पूर्वमन्वीयते । वैकृतं तु शरमयत्वादिकं तद्वैपरीत्येन पूर्वमन्वीयमानं च कुशमयत्वादिकं चरमभावि शरमयत्वादिकमनुपमृद्यैवान्वयाय कल्पते । पूर्वप्रतीतिकाले चरमभाविनोऽनुपस्थितेः उपस्थितयोरेव बाध्यबाधकत्वात् । पश्चादन्वीयमानं च शरमयत्वादिकं पूर्वप्रतीतकुशमयत्वादिकमुपमर्दयदेवान्वेति । पूर्वप्रतीतबाधं विनोत्तरस्य प्रत्येतुमशक्यत्वात्तथा च यथा प्राकृतं विकृतावतिदेशेन प्राप्तं पूर्वप्रतीतं कुशमयबर्हिः विकृत्युपदिष्टेन पश्चादुपस्थितेन शरमयबर्हिषा बाध्यते । तद्वत्पूर्वविच्छेदनिमित्तयागोप्युत्तरविच्छेदनिमित्तयागेन बाध्यत इत्यर्थः । ननु यदि प्रथमोपस्थिततया कुशमयबर्हिषो बाध्यत्वं तर्हि प्रथमं केनचिद्विकृतिप्रकरणे पठ्यमाने तत्रोपदिष्टशरमयबर्हिषः प्रथममुपस्थिततया कुशमयबर्हिषा बाधः स्यादिति चेत्तत्राह—पाठव्यत्ययसंभवेपीति । व्यत्ययो व्यतिक्रमः तयोः प्राकृतवैकृतयोः बुद्धिक्रमो ज्ञानक्रमः तमेव दर्शयति—पूर्वेति । प्राकृतधर्मधीः कुशमयत्वधीः पूर्वा इतरधीः शरमयत्वधीः अन्त्या पश्चाद्भाविनी बुद्धिक्रमो विद्यत इति सम्बन्धः । तत्र हेतुः—तथैवोत्थितेरिति । कुशमयत्वादेः पूर्वत्वेन शरमयत्वादेश्चान्त्यत्वेनोपस्थितेरित्यर्थः । यद्यपि विकृतिप्रकरणस्य कदाचित्प्रथमपाठोस्ति तथापि विकृतिरिति कर्त्तव्यमाकाङ्क्षमाणा स्वसन्निधावुपदिष्टमपि धर्ममसम्पूर्णत्वात् नादौ स्वीकरोति किन्तु प्रकृतावुपदिष्टान् धर्मान् चोदकतः प्राप्तानादौ स्वीकरोति । तदनन्तरमेव स्वसन्निधावुपदिष्टधर्मं स्वीकरोतीति

तद्बुद्धेर्नियतपूर्वापरभावस्य सत्त्वात् बाध्यबाधकभावोपि व्यवस्थित एवेति भावः ॥ ११८ ॥

ननु यदि पौर्वापर्ये पूर्वस्य दौर्बल्यं न्यायसिद्धमिति व्युत्पाद्यते तर्हि परदौर्बल्यमपि न्यायसिद्धमङ्गीकर्त्तव्यम् । अस्ति हि पूर्वोत्तरमीमांसयोः प्रथमावगत्यनुरोधेन चरमावगतं नेयमिति न्यायः ततः किमत्र विनिगमनकारणं तत्राह—

सापेक्षावुदितौ यदा तु भवतः पूर्वापरौ प्रत्ययौ
पूर्वस्तत्र निवर्त्तको भवति तत्रान्त्यो निवर्त्यो यथा ।
वेदोपक्रमजा मतिर्बलवती नर्गादिसंहारजा
वेदोपक्रममुख्यभाग्भवति तत्रर्गादिवाणी गुणात् ॥ ११९

सापेक्षाविति । अन्योन्यसापेक्षावुदितावुत्पन्नौ तत्र तयोर्मध्ये यदा ह्यन्योन्यनिरपेक्षयोः पूर्वापरीभूतप्रत्यययोर्विरोधः तदा तयोर्मध्ये चरमप्रत्यय एव प्रबलः पूर्वस्य निवर्त्तकः तस्य पूर्वोपमर्दनं विनानुत्पत्तेः यदा पुनरन्योन्यसापेक्षयोस्तयोर्विरोधस्तदा प्रथमप्रत्यय एव प्रबलउत्तरबाधकः चरमप्रत्ययो हि पूर्वप्रत्ययमुपजीव्य जायमानस्तदविरोधे सत्येवोत्पत्तुमर्हति । अन्यथोपजीव्यविरोधेन तदुत्पत्त्यनुपपत्तेः । प्रथमप्रत्ययस्तु न स्वोत्पत्तौ चरमप्रत्ययमपेक्षते पूर्वमेवोत्पत्तेः । किन्तु क्वचिदुत्पन्नस्य स्वस्य विषयविशेषपर्यवसानायैव तथा चोत्तरनिरपेक्षतया पूर्वस्योत्पन्नत्वात् उत्तरस्य च पूर्वसापेक्षत्वेनोत्पन्नत्वेनोपजीव्यबाधकत्वानुपपत्तेस्तत्र पूर्वमेव बलवदिति न विनिगमनाभाव इत्यर्थः । अत्र पूर्वतन्त्रोदाहरणमाह—यथा वेदोपक्रमेति । वेदशब्देनोपक्रमो वेदोपक्रमस्तस्माज्जाता तथा उपक्रमस्थवेदशब्दजनितेति यावत् । ऋगादिसंहारजा ऋगादिशब्देन यः संहारः उपसंहारः तस्माज्जाता उपसंहारस्थर्गादिशब्दजनितेति यावत् न बलवतीत्यनुषज्यते । एवं प्राबल्या-

दिव्यवस्थायां फलितमाह—वेदेति । तत्रैवं प्राबल्यादिव्यवस्थायां वेदोपक्रममुख्यता उपक्रमस्थवेदशब्दस्य मुख्यार्थप्रतिपादकत्वमित्यर्थः । ऋगादिवाणी उपसंहारस्थ ऋगादिशब्दः गुणात् लक्षणावृत्त्या स्वार्थं बोधयतीति शेषः । उच्चैर्ऋचा क्रियते उपांशु यजुषेत्यादिविधिवाक्ये मन्त्रवाचिनामृगादिशब्दानां प्रयोगात् । यजुर्वेदोत्पन्ना अध्वर्युणा प्रयुज्यमाना अपि ऋच उच्चैः पठितव्या इत्युच्चैष्ट्वादिकं मन्त्रधर्म एवेत्याशङ्कायामसंजातविरोधित्वात्प्रबलमुपक्रममनुसृत्य तदनुसारेणोपक्रमापेक्षोपसंहारस्य नेतव्यत्वात् । उपक्रमे च त्रयो वेदाः असृज्यन्तेत्यादौ वेदशब्दसमावेशात् मुख्यार्थवेदशब्दाऽनुसारेण विध्युद्देशगतानामपि ऋगादिशब्दानां लक्षणया वेदपरत्वमेवेति ऋग्वेदोत्पन्ना एव ऋच उच्चैः पठनीयाः ऋचोपि यजुर्वेदोत्पन्ना उपांश्वेवेत्युच्चैष्ट्वादिकं वेदधर्म एवेति स्थितमिति भावः ॥ ११९ ॥

उत्तरमीमांसायामपि प्रथमश्रुतानुसारेण चरमश्रुतन्नेतव्यमित्यत्रोदाहरणमाह—

ब्रह्मपुच्छमिति वाक्यगामिनो-
र्ब्रह्मपुच्छमितिशब्दयोर्ब्रुवोः ।
ब्रह्मशब्दबलवत्तरत्वतः
पुच्छशब्दपरिपीडनं मतम् ॥ १२० ॥

ब्रह्मपुच्छमिति । ब्रह्मपुच्छमिति ब्रह्मपुच्छं प्रतिष्ठेति वाक्यस्थयोश्चरमश्रुतपुच्छशब्दस्य मुख्यार्थमादाय ब्रह्मपदस्य स्वप्रधानब्रह्मपरत्वविरोधे सति प्रथमश्रुतब्रह्मश्रुत्यनुरोधेन चरमश्रुतं पुच्छशब्दं मुख्यार्थात्प्रच्याव्य पुच्छवत् पुच्छमितिलक्षणयाधारमात्रपर इति सर्वाधिष्ठानस्वप्रधानब्रह्मैव तत्प्रतिपाद्यमिति संमतमित्यर्थः । तथा च पारमर्षं सूत्रं "मान्त्रवर्णिकमेव च गीयते" इति ॥ १२० ॥

नन्वेमुपक्रमानुरोधेनोपसंहारस्य नेतव्यत्वे बहूनामधिकरणानां बाधः स्यात् तथा ह्याकाशस्तल्लिङादित्यधिकरणेऽस्य लोकस्य कागतिरित्याकाश इति होवाचेत्यत्राकाशशब्दस्य भूताकाशरूढस्यापि प्रथमश्रुतस्यापि सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्त्याकाशो ह्येवैभ्यो ज्यायानाकाशः परायणमिति वाक्यशेषस्थसर्वभूतकारणत्वबलयाधारत्वज्यायस्त्वादिलिङ्गैरेवकारश्रुत्या च ब्रह्मपरत्वं निर्णीतम्। तथा "अत एव प्राण" इत्यत्र प्राण इति होवाचेत्युपक्रमस्थः प्राणशब्दः पञ्चवृत्तिवायुविकारे प्राणे रूढतरोपि सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहत इति वाक्यशेषस्थसर्वभूतसंवेशनोद्गमनादिलिङ्गैर्ब्रह्मपरो निर्णीतः। एवमेवान्यत्रापि गायत्र्यादिशब्दा निर्णीताः तथा च तत्सर्वं पीडितं स्यादिति चेत् यत्र हि वाक्यशेषे उपक्रमस्थप्रमाणापेक्षया बहूनि लिङ्गानि सन्ति तत्र तद्विरोधे प्रथमश्रुतमप्यन्यथा नेयम्। यत्र तु नैवं तत्र प्रथमश्रुतानुरोधेनैव चरमश्रुतं नेतव्यमित्यभिप्रेत्याह—

अथ यद्युपक्रमणमल्पतरं
भवति प्रभूतमुपसंहरणम्।
बलवत्तदा चरममेव भवे-
दुभयोर्विरोधसमये नितराम् ॥ १२१ ॥

अथ यदीति। अथशब्दः प्रकृतादर्थान्तरपरः। उपक्रमणमुपक्रमः। अल्पतरमल्पप्रमाणोपेतं प्रभूतमनेकप्रमाणोपेतमुभयोरुपक्रमोपसंहारयोः नितरां विरोधसमये उपक्रमणं यद्यल्पतरमित्यन्वयः ॥ १२१ ॥

अयमपि न्यायः सापवाद एव। यत्राल्पधर्मोपक्रमणमपि प्रतिपाद्यपरमनन्यथासिद्धं च तत्रानेकधर्मकोप्युपसंहारोऽन्यथा नेतव्यः। यथा आत्मा वा इदमेक एवाग्र आसीदित्यत्रोपक्रमस्थाव-

धारणश्रुतिबलात् स ईक्षत लोकान्नु सृजा इति स इमाल्ँ लोकानसृजत ताभ्यो गामानयत ताभ्योऽश्वमानयदित्यादिवाक्यशेषप्रतिपन्नसविशेषात्मलिङ्गान्यथासिद्धानि बहून्यपि बाधित्वा आत्मशब्दः परमात्मपर इति दर्शित इत्याह—

अथ यद्युपक्रमणमल्पमपि
प्रतिपाद्यवस्तुविषयं भवति ।
अविवक्षितार्थविषयं चरमं
भवति प्रभूतमपि बाध्यमदः ॥ १२२ ॥

अथेति । अथशब्दः पूर्ववत् । अल्पमप्यल्पप्रमाणोपेतमपि प्रतिपाद्यवस्तुविषयं प्रयोजनवत्त्वेन प्रतिपाद्यवस्तुपरम् । तदा चरममुपसंहरणं प्रभूतमपि बाध्यं तत्र हेतुः— अविवक्षितार्थविषयमिति । प्रयोजनशून्यविषयत्वेन विवक्षितार्थत्वाभावादित्यर्थः । अदः इदं तस्माद्वेदान्तानां प्रतिपाद्यपरत्वात् प्रत्यक्षादीनां च प्रतिपाद्यवस्तुविषयत्वाभावात् प्रत्यक्षादिबाधकत्वं तेषां युक्तमिति सिद्धम् ॥ १२२ ॥

एवं प्रसङ्गागतं विचारं परिसमाप्य प्रकृतं वेदान्तानां प्रत्यक्षादिबाधकत्वं न्यायान्तरेणाप्युपपादयति—

आसन्नवस्तुविषयेण यथाऽक्षजेन
बाधो भवत्यनुमितेर्व्यवधानयोगात् ।
प्रत्यक्त्वमात्रविषयेण तथाऽऽगमेन
युक्तोऽक्षजादिविषयावगमस्य बाधः १२३ ॥

आसन्नवस्त्विति । प्रमात्रव्यवहितवस्तुविषयेणाक्षजेन प्रत्यक्षज्ञानेन व्यवधानयोगादनुमितिविषयस्य व्यवधानसंभवात् व्यवहितवस्तु-

विषयत्वादित्यर्थः । प्रत्यक्त्वमात्रविषयेणातिशयेन प्रत्यक्स्वरूपात्मविषयेणाक्षजादिविषयावगमस्य प्रत्यक्षादिजन्यप्रपञ्चविषयज्ञानस्य लोके हि वह्न्युष्णत्वाद्यवगाहिप्रत्यक्षेण तद्विरुद्धतदनुष्णत्वादिविषयानुमितिर्बाध्यत इति सर्वसंमतं तत्कस्य हेनोः प्रमात्रव्यवहितवस्तुविषयतया प्रत्यक्षस्य बलत्वात् तद्व्यवहितवस्तुविषयतयानुमानस्य दुर्बलत्वात् । नन्वासन्नविषयत्वस्य प्रबलत्वप्रयोजकत्वे निकटवर्त्तिवह्न्यनुष्णत्वानुमानेप्यासन्नविषयत्वमस्तीति तस्य बाध्यत्वं न स्यादिति चेत् । न ह्यासन्नत्वं निकटदेशवर्तित्वं किन्त्ववधानेन प्रमातृसम्बद्धत्वं तच्च मुख्यममुख्यं च मुख्यं त्वात्मस्वरूपस्यैव प्रमातृस्वरूपतयाऽत्यन्तसन्निहितत्वात् । अमुख्यं तु प्रत्यक्षविषयघटादिवस्तुनः तद्धि स्वसंप्रयुक्तेन्द्रियद्वारानिस्सृतान्तःकरणसम्बद्धत्वेनान्तःकरणोपाधिकप्रमातृसम्बद्धं भवति । अनुमितौ तु विषयेन्द्रियसंयोगाभावात् न तद्द्वाराप्यन्तःकरणोपाधिकप्रमातृसम्बन्धो विषयस्य यत्रापि चक्षुःसंयुक्तवन्ह्यादावनुष्णत्वाद्यनुमितिर्भवति तत्रापि नानुमितिविषयस्यानुष्णस्पर्शस्येन्द्रियसम्बन्ध इति न तद्द्वारा प्रमातृसम्बन्धः । तथा च वेदान्तानामपि सर्वान्तरप्रत्यक्स्वरूपविषयतया बलवत्ताप्रयोजकासन्नवस्तुविषयत्वस्य सत्त्वात् प्रत्यक्षादिबाधकत्वमुपपद्यत इति भावः ॥ १२३ ॥

किं च प्रत्यक्षाद्युपजीव्यवस्तुविषयत्वादपि वेदान्तानां बलवत्त्वमित्याह—

किञ्चाऽऽप्तवचः प्रमेयबलतः सर्वं प्रमाणान्तरं
स्वार्थे साधयतीति तत्सकलमेवाऽऽयत्तमस्मिन्भवेत् ।
यद् यत्राऽऽयतते विरोधसमये तेनास्य तद्बाधने
सामर्थ्यं न चेद् विद्यते श्रुतिवचोबाधे यथा हि स्मृतेः॥ १२४॥

किंचेति। आम्नायवचः प्रमेयबलतः वेदान्तप्रतिपाद्यसच्चिदानन्द-स्वरूपब्रह्मबलात् स्वार्थं स्वविषयं साधयति प्रकाशयति इति यतस्तस्मात्तत्प्रत्यक्षादिप्रमाणमस्मिन्वेदान्तप्रतिपाद्ये ब्रह्मण्यायत्तम-धीनं तादृशवस्तुप्रतिपादकवेदान्ताधीनमित्यर्थः। प्रत्यक्षादिप्रमितिर्हि प्रकाशमानैव स्वस्वविषयं प्रकाशयतीति वक्तव्यम्। अप्रकाशमाना-यास्तस्याः स्वविषयप्रकाशकत्वानुपपत्तेः। प्रदीपादेः प्रकाशमानस्यैव प्रकाशकत्वदर्शनाच्च। न च तत्प्रकाशः प्रमाणान्तरेण भवति। तत्प्र-वृत्तिसमये नियमेन प्रमाणान्तरानुत्थानात्। अनवस्थानाच्च। नापि स्वतः सम्भवति जडत्वात्। अतः स्वतः प्रकाशतत्साक्षिवेदान्तमेय ब्रह्मानुभवमहिम्नैव प्रकाशमाना स्वविषयं प्रकाशयति। ब्रह्मणश्च स्वप्र-काशानुभवरूपत्वं वेदान्तैरेव सिद्ध्यतीति भवति प्रत्यक्षादिकं तादृश-वेदान्ताधीनमित्यर्थः। अस्तु प्रत्यक्षादेर्वेदान्ताधीनत्वं तथापि प्रत्य-क्षादिनैव वेदान्तबाधः किं न स्यात्तत्राह—यदिति। यद्वस्तु यत्र विषये आयतते आयत्तं भवति यदधीनं भवतीत्यर्थः। तेनोपजीव्येन विरो-धसमयेऽस्यायत्तस्योपजीवकस्य तद्बाधने उपजीव्यबाधने सामर्थ्यं न विद्यते तत्र दृष्टान्तमाह—श्रुतीति। यथा स्वप्रमाण्ये वेदमपेक्षमा-णायाः स्मृतेर्वेदविरोधे तद्बाधकत्वं नास्ति किन्तु स्वयमेव तेन बाध्यते तस्योपजीव्यतया बलवत्त्वात्। एवं प्रत्यक्षादिना न वेदान्त-बाधः किन्तु तेनैव प्रत्यक्षादिबाध इत्यर्थः॥ १२४॥

तस्माद्वेदान्तानामुत्तरप्रमाणत्वादत्यासन्नवस्तुविषयत्वाद्उपजी-व्यत्वाच्च तज्जन्याखण्डाकारवृत्तिः सविषयं प्रत्यक्षादिकं समूलं निर्वर्तयत्येवेत्युपसंहरति—

ब्रह्माज्ञानसमुद्भवं ग्रहगणं सातिग्रहं ब्रह्मणः
स्वाकारग्रहणेन वेदशिरसो जाता मतिर्बाधते।

विद्या वस्तुबलेन जन्म लभते माया तु निर्वस्तुका
सा तामुद्भवमात्रतः क्षपयति ध्वान्तं यथा भास्करः॥१२५

ब्रह्माज्ञानेति। ब्रह्माज्ञानात्समुद्भवो यस्य स तथोक्तः गृह्यन्ते एभिर्विषया इति ग्रहाः चक्षुरादयस्तेषां गणाः ग्रहगणाः अतितरां गृह्यते बाध्यते पुरुषोऽनेनेत्यतिग्रहः शब्दादिविषयस्तेन सहितः सातिग्रहः सविषयं समूलं प्रत्यक्षादिकमिति यावत्। वेदशिरसस्तत्वमादिवाक्यात् जाता मतिरखण्डाकारवृत्तिः बाध्यते। ननु वेदान्तजन्यब्रह्मज्ञानं सविलासाज्ञानबाधकमित्यनुपपन्नं श्रुतवाक्यानामनुष्ठितविचाराणामप्यज्ञानतत्कार्यानुवृत्तिदर्शनादिति चेत्। न तेषां ब्रह्मैकाकारतज्ज्ञानाभावादित्यभिप्रेत्याह—ब्रह्मणः स्वाकारग्रहणेनेति। अखण्डसच्चिदानन्दस्वरूपब्रह्मणः स्वाकारत्वेन ग्रहणादखण्डसच्चिदानन्दैकाकारविषयत्वादित्यर्थः। ननु वृत्तेरप्यविद्याकार्यतया कथमेतादृशं सामर्थ्यं तत्राह—विद्येति। विद्या शाब्दात्मसाक्षात्कारः वस्तुबलेन स्वविषयबलेन वस्त्वधीना हि विद्येत्यर्थः। माया तु नैवमित्याह—माया त्विति। निर्वस्तुका निस्तत्त्वा। एतदुक्तं भवति—विद्या हि लक्षणावृत्त्या तत्त्वमादिशब्दाज्जायमाना यथा शब्दसामर्थ्यमेव जायते। शब्दसामर्थ्यं चाखण्डसच्चिदानन्दस्वरूपविषयमितिवस्तुस्वभावानुसारिण्येव विद्या तथा च यथा वस्त्वनुसारित्वलक्षणं विद्यात्वं विद्याया वस्त्वधीनमेव मायायाः मायात्वन्तु न वस्त्वधीनं वस्तुविपरीतरूपप्रदर्शकत्वस्यैव मायात्वात्। तथा च वृत्तेरविद्याकार्यत्वेन स्वतः सामर्थ्याभावेपि स्वविषयवस्तुबलात् सामर्थ्यस्य विद्यमानत्वात्। मायायाश्च विषयस्वभावानुसारित्वाभावेन निस्तत्त्वत्वात्। निस्तत्त्वाविद्यानिवर्त्तकत्वमुपपन्नमित्यर्थः। ज्ञानाभ्यासादिकं व्यावर्त्तयति—उद्भवमात्रत इति। क्षपयति निवर्त्तयति। तत्र दृष्टान्तः—ध्वान्तमिति। अन्धकारं यथा सूर्यः स्वोदयमात्रेणैवान्धकारं निवर्त्तयति नान्यापेक्षया। एवं विद्यापीत्यर्थः॥ १२५॥

ननु विद्याऽविद्यां निवर्त्तयतु नाम विरोधात् कर्तृत्वादिसंसारं तु कथं निवर्त्तयेत्। तस्याविद्यात्वाभावात्। विद्याया अविद्यैकनिवर्त्तकत्वादित्याशङ्क्य विद्यया अविद्याया निवृतौ तत्कार्यकर्तृत्वादिसंसारस्यापि निवृत्तिर्मूलच्छेदे वृक्षनाशवद्भवतीत्यभिप्रेत्य संसारं वृक्षत्वेन निरूपयति—

रागद्वेषप्रशाखं विषयगुणसमुद्भासिधीवृत्तिशाखं
धर्माधर्मप्रवृत्तिप्रचुरसुखसमुद्वेगभोगप्रवालम्।
छिन्द्याः संसारवृक्षं निशितमतिमहाशास्त्रनिक्षेपदक्षः
प्रत्यक्तत्त्वस्थलीगं निबिडतमतमोमूललब्धप्ररोहम्॥१२६॥

रागद्वेषेति। हे शिष्य त्वं संसारवृक्षं छिन्द्या इति सम्बन्धः। संसारस्य कथं वृक्षत्वं वृक्षधर्मवत्वादित्याह—रागेति। रागद्वेषावेव प्रकृष्टा प्रधाना शाखा यस्य तं प्रसिद्धो हि वृक्षः प्रधानशाखयैवाविचलं तिष्ठति उत्तरोत्तरं वर्द्धते च संसारोपि रागद्वेषाभ्यामेवोत्तरोत्तरं वर्द्धते अविचलश्चेति तयोः प्रधानशाखात्वरूपणं विषयगुणसमुद्भासिधीवृत्तिशाखं विषयाः शब्दादयः गुण इत्यगुणस्याप्युपलक्षणं शब्दादिविषयेषु समीचीनत्वेनासमीचनत्वेन च समुद्भासिन्यः प्रकाशमाना धीवृत्तय एव शाखा क्षुद्रविटपा यस्य तं शब्दादिगोचरशोभनाध्यासरूपबुद्धिवृत्तिक्षुद्रविटपमित्यर्थः। प्रसिद्धस्य वृक्षस्य क्षुद्रशाखा महाशाखाजन्या भवन्ति शब्दादिगोचरशोभनाध्यासरूपधीवृत्तयश्च रागादिमतां रागद्वेषाख्यमहाशाखाजन्या भवन्तीति तासां क्षुद्रशाखात्वेन रूपणं धर्माधर्मप्रवृत्तिप्रचुरसुखसमुद्वेगभोगप्रवालधर्माधर्मरूपा या प्रवृत्तिः तया प्रचुरौ यौ सुखसमुद्वेगौ सुखदुःखे तद्भोगस्तत्साक्षात्कार एव प्रवालं पल्लवं यस्य तं प्रसिद्धपल्लवं हि मलयानिलादिसहकारिसमागमे सति क्षुद्र-

शाखायां जन्यते । सुखदुःखानुभवोपि धर्मादिना शोभनाशोभनाध्यास रूपितधीवासनायां जन्यत इति तस्य प्रवालत्वरूपणम् । यद्वा प्रवाल-पदेन पल्लवकुसुमफलानां त्रयाणामपि ग्रहणं धर्माधर्मप्रवृत्तेः प्रचुरसु-खसमुद्वेगयोश्च भोगस्य च यथाक्रमं पल्लवादिभावरूपणं पूर्वपूर्वस्यो-त्तरोत्तरजनकत्वात् । ननु रागद्वेषादीनां परमार्थत्वात्तन्निरूपितसंसार-वृक्षोपि परमार्थ एव । अतः कथं विद्यया तन्निवृत्तिस्तत्राह—निषेढात । अतिशयेन निविडं दुरवगाहं सदसदादिरूपेण विवेक्तुमशक्यं यत्तमो ऽविद्यातस्मादेव मूलात्कारणात् लब्धः प्ररोह उत्पतिर्यस्य तं रागद्वेषा-दीनामसङ्गे आत्मनि परमार्थतोऽसंभवादाविद्यकत्वमेवेतितन्निरूपित-संसारवृक्षोप्याविद्यक इत्यर्थः । ननु संसारवृक्षस्याविद्योपादानतया-विद्याश्रितत्वादात्माश्रितत्वन्न स्यात्तथा च ब्रह्मणः सर्वाधिष्ठानत्व-प्रसिद्धिर्विरुद्ध्यते आत्माश्रयया विद्यया निवृत्तिश्च न स्यादित्या-शङ्क्याह—प्रत्यक्सत्त्वस्थलांगमिति । प्रत्यक्तत्त्वं प्रत्यगात्मा स एव स्थली आश्रयः तन्निष्ठमित्यर्थः । प्रत्यगात्मनोपि विवर्त्तमानाविद्याधिष्ठानत्व-लक्षणोपादानत्वस्य विद्यमानत्वात् सर्वाधारत्वप्रसिद्धिर्न विरुद्ध्यते । विद्यासंसारयोः समानाश्रयत्वं चास्तीत्यर्थः । अथवा संसारवृक्षस्य तमोमूलजन्यत्वे जडत्वेन चैतन्यसम्बन्धाभावादन्धीभावप्रसङ्ग इत्याशङ्क्य चैतन्यसम्बन्धोप्यस्तीत्याह—प्रत्यगिति । एवं संसारस्य निवृत्त्युपयोगित्वेन वृक्षत्वन्निरूप्य तन्निवृत्तिसाधनमाह—निशितेति । निशितं तीक्ष्णं यन्मतिमहाशस्त्रमखण्डसाक्षात्कारलक्षणमहाशस्त्रं तस्य च तैक्ष्ण्यं परमसूक्ष्मब्रह्मविषयत्वात् महत्त्वं च पाशुपतादि-शस्त्रेणाप्यनुच्छेद्यसंसारमहावृक्षच्छेदकत्वात् । तस्य निक्षेपे तदुत्पादने दक्षः समर्थः । अविद्यानिवर्तनक्षमाखण्डसाक्षात्कारलक्षणमहाशस्त्र-वानित्यर्थः । अस्य च त्वमित्यनेन सम्बन्धः । एतदुक्तं भवति । प्रत्यगात्मा-श्रितानाद्यनिर्वचनीयाविद्यायाः पूर्वपूर्वभोगवासनाकर्मचित्रभित्तेः प्रथमं रागद्वेषाध्यासो भवति । ततः केषु चिद्विषयेष्वनित्यदुःखा-

शुचिषु नित्यत्वसुखत्वशुचित्वभ्रान्तिर्भवति। केषु चिच्चोक्तविपरीतेषु विपरीतबुद्धिः ततः कर्तृत्वाद्यभिमानपूर्वकं तत्तदर्थविषयप्रवृत्तिनिवृत्ती भवतः ततो धर्माधर्मौ ततः सुखदुःखानुभवः। तथा च प्रत्यग्विद्यया तदविद्यानिवृत्तौ तत्कार्यरागादिनिवृत्तिद्वारा सुखदुःखानुभवलक्षणस्यानर्थस्य निवृत्तिरिति छिन्द्याइत्यनेन प्रत्यक्षादिविरोधबुद्ध्यैतादृशीबुद्धिर्न त्याज्या विरोधस्य निरस्तत्वात्। किन्तूपादेयैवानर्थनिवृत्तिफलतयेति सूचितम्॥ १२६॥

ननिवन्द्रो मायाभिरित्यादिवाक्यान्मायाया एव जगत्कारणत्वं प्रतीयते नत्वविद्यायाः अविद्या च मायाया भिन्नैव अतः कथं जगत आविद्यकत्ववर्णनमित्याशङ्क्याह—

प्रत्यग्वस्तुन एव तत्र विषये माया तमः कारणं
ध्वान्तं बीजमबोध इत्यपि गिराऽविद्यैव संकीर्त्यते।
तस्या एव विलास एष भवता गुर्वादिभेदान्वितः
संक्लृप्तो न तु विद्यते पृथगसौ सान्ध्ये यथा धामनि॥१२७॥

प्रत्यग्वस्तुन एवेति। प्रत्यगात्मनस्तत्त्वविषये स्वस्वरूपभूतब्रह्मणि विषये या अविद्या सैवात्माश्रयविषयाविद्यैव मायादिगिराप्युच्यते। अथवा—प्रत्यग्वस्तुनोऽविद्यैव तत्र विषये तत्र तत्र स्थले इन्द्रो मायाभिः तमः आसीदित्यादौ मायादिगिरोच्यते। तथा च मायायाः कारणत्वोक्तौ अविद्याया एव कारणत्वं पर्यवस्यति। नन्वेदश्चोपरिष्टान्निराकरिष्यते अतो नोक्तदोष इत्यर्थः। नन्वस्तु जडप्रपञ्चस्याविद्यकत्वं तथापि नाद्वैतात्मसिद्धिः गुरुशिष्यादिभावेन चेतनभेदस्य प्रतीयमानत्वादित्याशङ्क्याह—तस्या इति। मायादिशब्दवाच्याविद्याया एष परिदृश्यमानविलासो विवर्त्तभूतः संसारः भवता गुर्वादिभेदान्वितः गुरु-

शिष्यादिभेदसहितः कल्पितः नन्वसौ गुर्वादिभेदः पृथक् परमार्थतोऽस्तीत्यर्थः । तत्र दृष्टान्तमाह—सान्ध्यमिति । जाग्रत्सुषुप्त्योरन्तरालवर्त्तित्वात्सन्ध्यं स्वप्नं सन्ध्यसम्बन्धि सान्ध्यं भेदव्यपदेश औपचारिकः धाम स्थानं यथा स्वप्नस्थाने गुर्वादिना चेतनभेदः प्रतीयमानोपि कल्पित एव न तु परमार्थः । एवं जाग्रत्यपि ततश्च वस्तुतो जीवस्यैकत्वात् तत्त्वबोधाद्द्वैतब्रह्मात्मत्वमुपपद्यत इत्यर्थः ॥ १२७ ॥

इदानीं गुर्वादिदृष्टान्तार्थं (१) स्पष्टयति—

मुक्तामुक्तौ विद्वदज्ञौ त्वदन्या-
वाकाशादि क्ष्मावसानं च विश्वम् ।
स्वाविद्योत्थस्वान्तनिष्पन्दनं त-
द्विज्ञातव्यं माग्रहीरन्यथैतत् ॥ १२८ ॥

मुक्तेति । यथाकाशादि पृथ्व्यन्तं विश्वं प्रामाणिकत्वेन प्रसिद्धमपि स्वाविद्योत्थस्वान्तनिस्पन्दनं स्वाविद्याकल्पितान्तःकरणविजृम्भितमेव न तु परमार्थसत्तथामुक्तोऽमुक्तः विद्वान् अज्ञः त्वमन्यः इत्येतदपि स्वाविद्याकल्पितमनोविजृम्भमात्रं विज्ञातव्यम्। अन्यथा परमार्थत्वेन माग्रहीरित्यर्थः । न च प्रपञ्चस्य मनोविजृम्भणत्वे पूर्वोक्तविरोधः । तत्रापि मनोद्वारा अज्ञानस्य प्रपञ्चहेतुत्वेनोक्तेः । अथवा—सर्वमविद्याविजृम्भितमेव । तत्र चान्तःकरणमपि भोक्तृकोटिनिविष्टतया भोग्यविश्वकल्पनहेतुरिति स्वान्तनिष्पन्दनमित्युक्तम् । तथा चोभयमपि विश्वहेतुरित्यर्थः ॥१२८॥

नन्वनादौ काले न कश्चिदपि मुक्त इत्यतिसाहसमस्मदादीनां मुक्तिर्भविष्यतीत्यत्रानाश्वासप्रसङ्गात् गुरुशिष्यादिभावसुखित्वदुःखित्वादिव्यवस्थाविलोपप्रसङ्गाच्च श्रुतिस्मृतिसिद्धा च वामदेवादीनां मुक्तिः तत्कथं मुक्तामुक्तादिभेदः कल्पित इत्यभिप्रायेण शङ्कते—

(१) आदर्शपुस्तकेऽत्रपाठस्य त्रुटिरिव लक्ष्यते ।

कालोऽतीतोऽनादिरेष्यन्ननन्तो
मुक्तामुक्तौ तत्र पूर्वं तथोर्ध्वम् ।
तस्मादेतद्दुर्घटं शङ्कसे चे-
न्माशङ्किष्ठाः स्वप्नदृष्टान्तदृष्टेः ॥ १२६ ॥

कालोऽतीत इति । अतीतकालोनादिः एष्यन्नागामी कालोऽनन्तः तत्रातीतागामिकालयोर्मध्ये पूर्वमतीतकाले मुक्तामुक्तौ आस्तामिति तथोर्ध्वमेष्यत्कालेपि मुक्तामुक्तौ भविष्यत इति शेषः । तस्माद्यत अनाद्यतीतकाले आगामिन्यनन्तकाले च मुक्तामुक्तावास्तां भविष्यतश्च तस्मादेतज्जगदेकजीवकमेव वस्तुतः मुक्तामुक्तादिभेदस्तु मनोमात्र विजृम्भित इत्येतद्दुर्घटमसम्भवीति शङ्कसे चेत्तत्र किं मुक्तामुक्तादिभेदान्यथानुपपत्त्या जीवभेदः सिषाधयिषितः किं वा जीवभेदाभावे न्यायसिद्धमुक्तामुक्तभेदस्तद्व्युत्पादकश्रुतिस्मृतिसुखित्वदुःखित्वादिव्यवस्था चेत्येतत्सर्वं नोपपद्यत इति चोद्यते । आद्येपि किं पारमार्थिकजीवभेदः सिषाधयिषितः उतौपाधिकतद्भेदः । नाद्यः । तस्य निराकरिष्यमाणत्वात् । द्वितीयेपि किमन्तःकरणं जीवोपाधिरित्यङ्गीकृत्य तद्भेदः सिषाधयिषितः उताज्ञानं नाद्यः तस्य जीवोपाधित्वानुपपत्तेः । अन्यथा सुषुप्तावन्तःकरणाभावेन तदुपाधिकजीवस्यापि नाशप्रसङ्गात् । न च सुषुप्तावप्यन्तःकरणमस्तीति वाच्यम् । तत्सत्त्वे प्रमाणाभावात् । न चोत्थानानुपपत्तिः प्रमाणं, तस्यान्यथापि संभवात् । न च प्राणनादिव्यापारस्तत्र प्रमाणं क्रियाशक्तिभावेनापि तदुपपत्तेः । प्राणस्यान्तःकरणभिन्नत्वाच्च । सति संपद्य न विदुः स्वमपीतो भवतीति श्रुत्या सुप्तौ स्थूलोपाधिविलयप्रयुक्तसत्संपत्तिसलयश्रवणविरोधाच्च । अस्तु वा सुषुप्ते तत्सद्भावः प्रलये तु नैवं तस्य सर्वकार्यविलयरूपत्वात् । तथा च तदुपाधिकजीवस्यापि नष्टत्वात् कृतहान्यादिदोषप्रसङ्गः । ननु तत्रापि कारणात्मना तत्सत्त्वमिति

चेद्विक्षेपशक्तिमदज्ञानाख्यकारणसद्भावव्यतिरेकेण कारणात्मना सत्त्वस्यानिरूपणात्। किंचान्तःकरणमपि स्वातन्त्र्येण किं चैतन्यमुपदधाति उताज्ञानोपहितं। नाद्यः। अज्ञानकार्यस्य तस्य स्वातन्त्र्येण चैतन्योपधातृत्वायोगात्। द्वितीये लाघवादावश्यकाज्ञानमेव जीवोपाधिरस्तु किमन्तःकरणस्याप्युपाधित्ववर्णनेन। नन्वाचार्याणामन्तःकरणशबलिते जीववाचकाहमादिशब्दानां व्युत्पत्तिं दर्शयतामन्तःकरणमेव जीवोपाधिरितिसंमतं तत्कथमन्तःकरणस्य जीवोपाधित्वं निराक्रियत इति चेत् न ह्यहमादिशब्दस्यान्तःकरणशबलिते व्युत्पत्तिप्रदर्शनमात्रेणान्तःकरणस्य जीवोपाधित्वमभिप्रेतं भवति। व्युत्पत्तिर्हि व्यवहारबलाद्भवति। व्यवहारश्च स्पष्टमनुभूयमान इत्यन्तःकरणशबलितस्य स्पष्टमनुभूयमानत्वेन तत्राहमादिशब्दानां व्युत्पत्तिरित्युच्यते न तु तस्य जीवोपाधित्वमभिप्रेत्य। न चैवं सत्यहमादिशब्देन जीवमनूद्य तस्य ब्रह्मात्मत्वविधानानुपपत्तिः। अज्ञानोपहितस्यैवान्तःकरणेनाप्युपहिततया तदनुवादोपपत्तेः। न चैवं किमिति तदभिप्रायो वर्ण्यते। अन्तःकरणस्यैव जीवोपाधित्वं तदभिप्रेतं किं न स्यादिति वाच्यम्। तथात्वेऽन्तःकरणानामनेकतया तदुपहितजीवस्याप्यनेकत्वं स्यात्। तच्च नोपपद्यते अनेकजीवत्वस्य "जीवाः सर्वे त्वां प्रति प्रस्फुरन्तः" [२—१४६] "किंचाज्ञानम्" [२—१५५] इत्यादिना च निराकरिष्यमाणत्वात्। न चान्तःकरणमेकमेवेति शङ्क्यं वक्तुम्। तथात्वे कर्मफलभोगार्थमात्मन उत्क्रान्त्याद्यनुपपत्तिप्रसङ्गात्। तस्मान्नान्तःकरणं जीवोपाधिः। अस्तु तर्ह्यज्ञानं तदुपाधिरित्यङ्गीकृत्य तद्भेदस्सिषाधयिषित इति चेन्न। तथात्वे उपाधेरज्ञानस्यैकत्वेन तदुपहितजीवस्याप्येकतया तद्भेदसाधनानुपपत्तेः। अज्ञानैकत्वं चानुपदमेव वक्ष्यते। न चाज्ञानस्यैकत्वे तस्यैव च जीवोपाधित्वे जीवेश्वरयोरौपाधिकभेदस्याप्यनुपपत्तिः उपाधिभेदाभावादिति वाच्यम्। उपाधिभेदाभावेऽप्यज्ञानप्रतिबिम्बितचैतन्यस्य जीव-

तया तत्प्रतिबिम्बापेक्षितबिम्बचैतन्यस्येश्वरतया तयोर्भेदसम्भवात् । अथवा—अज्ञानं हि त्रिगुणात्मकं तत्राज्ञानस्य सत्त्वमात्रगुणावच्छेदेन ईश्वरोपाधित्वं तदुपहितेश्वरश्च तद्गुणोद्रेकसहायेन जगत्पालनादिकं करोति । गुणत्रयावच्छेदेन जीवोपाधित्वमितिभेदः । अथवा—अज्ञानं हि विक्षेपावरणशक्तिद्वयवत् तत्र तस्य विक्षेपशक्तिप्राधान्येनेश्वरोपाधित्वम् । अत एवेश्वरस्य जगदुपादानत्वविभ्रमः आवरणशक्तिप्राधान्येन जीवोपाधित्वम् । अत एव जीव आवृतस्वभावो भ्रान्त इति विभ्रमः । तथाचैकस्यैवाज्ञानस्य शक्तिभेदेनोभयोरुपाधित्वादुभयभेदः संगच्छते । नन्वेवमपि जीवभेदाभावे पूर्वोक्तसुखदुःखादिव्यवस्था मुक्तामुक्तव्यवस्था गुरुशिष्यभावव्यवस्था मुक्तताद्यप्रतिपादकश्रुत्यादयश्च पीड्येरन् । तथा हि यदि जीवः सर्वशरीरेष्वेक एव स्यात्तदा देवदत्ते सुखिनि दुःखिनि वा यज्ञदत्तस्यापि तत्त्वापातः तदभेदात् । ननु यथा नानात्मवादिनामपि प्रतिशरीरमात्मन एकत्वेन हस्तपादादिप्रदेशेष्वात्मन एकत्वेपि पादावच्छेदेनकण्टकवेधादिजनितदुःखं पादावच्छिन्न एवानुभवति न हस्तावच्छिन्नः हस्ते मे वेदनेत्यनुभवात् । एवमेव जीवस्यैकत्वेपि शरीरभेदान्नैकशरीरावच्छिन्ने सुखिनि दुःखिनि वा शरीरान्तरावच्छिन्नस्य सुखित्वादिप्रसङ्ग इति चेत् तर्हि तद्वदेवात्राप्यननुसन्धानप्रसङ्गः अनुसन्धत्ते हि तत्र हस्तादिप्रदेशेषु विद्यमान एक मम आत्मा। पादे मे सुखन्न हस्त इति न चात्र कश्चिन्ममाऽस्मिन् शरीरे सुखमस्मिन् शरीरे दुःखमित्यनुसन्धत्ते अतो जीवैकत्वप्रयोजकानुसन्धानाभावात् न सकलशरीरेष्वेक एव जीवो भवतीति चेत् । तत्र किं शरीरविशिष्टस्य शरीरान्तरे सुखाद्यनुसन्धानमापाद्यते उत शरीरोपहितस्य किं वा तदुपलक्षितस्य । नाद्यः विशिष्टस्य जडतया नुसन्धातृत्वस्यैवाभावात् । न द्वितीयः । कर्णशष्कुलीभेदेन तदुपहितश्रोत्रभेदवत् शरीरोपाधिभेदेन तदुपहितजीवस्यापि भिन्नतया तदनुसन्धानाभावोपपत्तेः । न हि वास्तवभेदाभावेनानुसन्धानापादनं

युक्तिमत् भेदमात्रस्य तद्विरोधित्वात्। अन्यथा—देवदत्ते सुश्रवसि यज्ञदत्तस्य बधिरस्यापि शब्दोपलम्भप्रसङ्गः। सर्वश्रवसां वस्तुतो भेदाभावात्। न तृतीयः। जीवस्यान्तःकरणवच्छेदेनैव कर्तृत्वं भोक्तृत्वं च। तत्रा चान्तःकरणानामनेकत्वात्। यदन्तःकरणावच्छिन्नेन यत्कर्म क्रियते तदन्तःकरणावच्छिन्नस्य तद्वासनारब्धान्तःकरणावच्छिन्नस्य तत्फलभोक्तृत्वं नान्यस्य धर्माधर्मौ ह्यन्तःकरणसमवायिनौ यदन्तःकरणसमवेतौ यौ तत्रैव सुखदुःखे जनयतः तयोः स्वाश्रयमात्रसमवेतसुखदुःखजनकत्वस्य परैरभ्युपगमात्। तथा चान्तःकरणान्तरसमवेतधर्माधर्मफलीभूतसुखदुःखयोर्नान्तःकरणान्तरावच्छिन्नात्मसम्बन्धितापादयितुं शक्यते। अत एव देवदत्ते ब्रह्महन्तरि न तत्फलभोक्तृत्वं यज्ञदत्तस्य नापि बहूनां यागादिप्रवृत्त्यनुपपत्तिः। एकस्यापि बहुतरोपाधिभेदेन भोगार्थं बहुधा प्रवृत्त्यनुपपत्तेः। तथा चान्तःकरणवच्छिन्नस्यैव भोक्तृत्वात्। भोक्तुरेव चानुसन्धानादन्तःकरणानां च भिन्नत्वात्। नोपलक्षितस्यानुसन्धानप्रसङ्गः। किं च किमनुसन्धानं नाम सुखादिज्ञानमात्रमुत ममेति स्वीयत्वेन तत्परिज्ञानम्। नाद्यः। तस्याङ्गीकृतत्वात्। अविद्याप्रतिबिम्बितसाक्षिणा सर्वस्यापि विषयीकरणात्। न द्वितीयः। शिरःपाण्यादिनिखिलावयवोपलक्षितस्यात्मनो भोगायतनैकशरीरावच्छेदवत् निखिलशरीरोपलक्षितस्य जीवस्य भोगायतनैकशरीरावच्छेदाभावेन ममेति तदनुसन्धानप्रसङ्गायोगात्। किं च यथा त्वन्मते आत्मन एकत्वेपि जन्मान्तरानुभूतस्य जन्मान्तरेऽननुस्मरणं शरीरभेदात्। एवमस्मन्मतेपि जीवस्यैकत्वेपि शरीरभेदात् शरीरान्तरेऽनुभूतस्य शरीरान्तरे ऽननुस्मरणमुपपद्यते। ननु तत्र जन्मान्तरत्वमेवाननुस्मरणे प्रयोजकं न शरीरभेद इति चेन्न। विनिगमकाभावात्। ननु विनिगमकाभावादसिद्धिः एकस्मिन्नपि बाल्यकौमाराद्यवस्थाभेदेन शरीरभेदे सत्यप्यवस्थान्तरानुभूतस्यावस्थान्तरे ऽनुस्मरणदर्शनादिति चेन्न। अवस्थाभेदेन शरीरभेदाभावात्

योहं बालः आसं स एवैतर्हि वृद्धो भवामीति शरीरविषयप्रत्यभिज्ञादर्शनात्। नचेयं भ्रान्तिः बाधकाभावात्। ननु विरुद्धपरिमाणत्वेन भेदोऽनुमीयत इति चेन्न। प्रत्यभिज्ञाप्रत्यक्षविरोधे भेदानुमानस्यानुत्थानात्। न चैवं प्रदीपज्वालादेरप्येकत्वं स्यादिति वाच्यम्। तत्र प्रत्यक्षेणापि भेदस्यानुभूयमानत्वात्। किं च क्वचिद्विरुद्धपरिमाणवत्त्वेपि बलवद्बाधकवशात् प्रत्यभिज्ञयैकत्वेङ्गीकृते न सर्वत्रापि मानान्तरविरोधे तदङ्गीकर्त्तव्यमिति नियमः। तथा सति विरुद्धधर्मवत्तया प्रदीपादेर्भेदवत् तारमन्दादिविरुद्धशब्दाश्रयत्वेन गगनस्यापि तथात्वप्रसङ्गात्। अस्ति चात्र शरीरभेदे बलवद्बाधकं शरीरकारणस्य शुक्रशोणितधातुविशेषस्य भेदः तस्य चावस्थान्तरशरीरेऽभावात् प्रथमशरीरस्थ विनाशकारणाभावाच्च द्वितीयशरीरस्याकस्मिकत्वप्रसङ्गो विशिष्टमातापितृजन्यत्वलक्षणब्राह्मण्यादिव्यञ्जकस्य द्वितीयशरीरेऽभावेन तद्व्यङ्ग्यब्राह्मण्यादेरप्यभावप्रसङ्गश्चेति। किं च न परिमाणभेदस्य स्वाश्रयभेदेन व्याप्तिः। दृश्यते ह्येकस्मिन्नपि पटे संकुचिते विस्तृते च परिमाणभेदः। ननु माभूत्परिमाणभेदः स्वाश्रयभेदप्रयोजकः गुरुत्वभेदस्तु भविष्यति। अस्ति चावस्थाभेदेन गुरुत्वभेद इति चेन्न। एकस्मिन्नपि समानपरिमाणे फलादौ कालभेदेन गुरुत्वभेदस्य सर्वानुभवसिद्धत्वान्नियतभोजकादृष्टबलेन सुवर्णादाविव गुरुत्वभेदोपपत्तेः। अस्तु वा जन्मान्तरत्वमेवानुस्मरणे प्रयोजकं तच्च प्रकृतेपि सुसंपादं शरीरावच्छेदेनात्मनो योन्यन्तरसम्भूतत्वं हि जन्मान्तरत्वनाम तच्चैकजीवकानेकशरीरेष्वप्यस्तीतिकथमनुसन्धानप्रसङ्गः। तस्यात्तत्वदर्शनप्रद्वेषमात्रविजृम्भितमेवैकजीववादे सर्वत्रभोगानुसन्धानप्रसञ्जनम्। ननु सुखादिव्यवस्थासम्भवेपि मुक्तामुक्तव्यवस्था न सम्भवतीति चेन्न। तत्त्वज्ञानात्प्रागमुक्तिः तदूर्ध्वंमुक्तिरितिव्यवस्थोपपत्तेः। नन्वनादौ संसारे एकस्यापि मुक्तिसम्भवे सर्वस्यापि मुक्तिप्रसङ्गः इदानींसंसारानुपलम्भप्रसङ्गश्च। नन्वनन्तजीववादिनामप्यनन्तकल्पाना-

मतीततया प्रतिकल्पं च भूयसामात्मनां मुक्तत्वेन संसारनुपलम्भदोषस्तुल्य इति चेन्न। अनन्तकल्पात्ययेपि इदानींतनकल्पोपलम्भवदनन्तानां मुक्ताधप्यमुक्तानामप्यनन्तानां सम्भवात्। न चेतः पूर्वं कस्यापि मुक्तिर्नासीदिति वाच्यम्। सर्वज्ञहिरण्यगर्भादीनामप्यमुक्तौ भविष्यन्मुक्तौ प्रत्ययाभावापातादिति चेत्! न तावदेकमुक्तौ सर्वमुक्तिप्रसङ्गः एकजीववादे संसारिण एकत्वेन सर्वपदार्थाभावेन सर्वमुक्त्यापादनस्यानवसरदुःस्थत्वात्। ननु दृश्यन्ते बहवो जीवा इति चेन्न। दृश्यमानानां शरीरतदवच्छिन्नानामजीवत्वात्। जीवस्य सतोऽविद्यावच्छिन्नस्यैकत्वात्। नापीदानीं संसारानुपलम्भप्रसङ्गः। पूर्वं जीवस्य मुक्त्यभावात्। न च सर्वज्ञानामनीतानेकहिरण्यगर्भादीनामवश्यंमुक्तत्वनियमः। तेषां सृज्यमानाविद्यकसर्वपदार्थपरिज्ञातृत्वेपि सर्वस्वरूपात्मपरिज्ञाने प्रमाणाभावात् तेषामैश्वर्यं च तादृशमेव नत्वनतिशयानन्दस्वरूपमुक्तिः। न च भविष्यन्मुक्तौ प्रत्याशानुपपत्तिः। अनेकात्मवादेप्यनादिकालमारभ्य एतावन्तं कालप्रयुक्तस्य स्वस्य मुक्तौप्रत्याशैव एकजीववादेपिशास्त्रप्रमाणयादेव मुक्तिसद्भावनिश्चयेन तत्प्रत्याशोपपत्तेः। ननु व्यासभगवत्पादादयो मुक्त इति चेन्न। तेषामसंसारीश्वरांशतया संसारप्रसक्तेरेवाभावात्। ते हि स्वेच्छाधीनशरीरपरिग्रहा रामकृष्णादिवदीश्वरा एव सन्तः संसरन्तीव तथा च स्मृतिरपि"द्वापरे द्वापरे विष्णुर्व्यासरूपी महामुनिः। चतुर्भिः सहितः शिष्यैः शंकरोऽवतरिष्यति" इति च। तथा च तेषाममुक्तत्वेपि न संसारानुपलम्भप्रसङ्गः। तस्मान्न मुक्तामुक्तव्यवस्थाया असम्भवः। नन्वेवमपि गुरुशिष्यव्यवस्था न संभवति। जीवस्यैकत्वात् गुरुशिष्यभावस्य भेदगर्भितत्वादिति चेन्न। जीवस्यैकत्वेपि कल्पिताचार्यमादाय तदुपपत्तेः। नन्वाचार्यस्य कल्पितत्वे तस्य शुक्तिरूप्यवज्जडत्वेन शिष्यतदुपसदनानुपपत्तिः। शिष्यस्यापि स्वशिष्येणाचार्यत्वेन कल्पिततया तत्तच्छिष्याणामप्येवमेव कल्पितत्वेन निर्जीवकं च जगत्स्यादिति चेन्न। न तावदुपसदनानुपपत्तिः। कल्प-

तस्यापि विद्वत्तया परिकल्पितत्वेन शिष्यस्य तदुपसदनाद्युपपत्तेः। ननु शिष्यस्य तदुपसदनादिसंभवेपि कथमाचार्यस्य कल्पितस्योपदेष्टृत्वम् न च वाच्यं सर्पत्वेन कल्पितस्य दंशनादिजनकत्ववद्रज्जतत्वेन परिकल्पितस्य कंकणादिहेतुत्ववच्च विद्वत्तया कल्पितस्य विद्योपदेष्टृत्वमिति युज्यते तु कल्पितस्यापि जडस्य बाह्यार्थक्रियाकारित्वं तद्वदेवाचार्यत्वेन परिकल्पितोपि कश्चिदर्थक्रियां करोतु विद्योपदेष्टृत्वन्तु तस्य न भविष्यति। तद्धि विद्यावत एव सम्भवति न त्वविदुषः। ब्रह्मसाक्षात्काराभावे ब्रह्मोपदेष्टृत्वानुपपत्तेः। विद्यावत्त्वं च कल्पितस्यानुपपन्नमिति चेन्न। कल्पितविद्वत्तायास्तत्रापि सत्वात् उपदेशे हि विद्यावत्त्वमात्रमपेक्ष्यते। न वस्तुतो विद्यावत्त्वम्। स्वप्नोपलब्धपित्राद्युपदिष्टविद्याया अपि जाग्रति फलजनकत्वदर्शनात्। नापि शिष्यस्यापि कल्पितत्वेन जगतो निर्जीवकत्वप्रसङ्गः। शिष्यदेहस्यान्येन कल्पितत्वेपि तद्देहद्वारा श्रवणादौ प्रवर्त्तमानस्य तदुपलक्षितजीवस्य ब्रह्मस्वभावस्यान्येनाकल्पितत्वात्। वस्तुनस्तु नित्यशुद्धमुक्तस्वभावं सर्वज्ञं ब्रह्मैव स्वाध्यस्तानाद्यनिर्वचनीयाविद्याप्रतिबिम्बभावेन संसारमनुभवति। तद्बिम्बभावेनेष्टे। न च ब्रह्मणः संसारित्वेऽपसिद्धान्तः ब्रह्मैव स्वाविद्यया संसरति स्वविद्यया मुच्यत इत्यङ्गीकारात्। तत्र कदाचित्स्वस्याविद्याकल्पितसंसारनिवृतये आचार्यवानित्यादिशास्त्रादविद्यानिवर्त्तकविद्याया आचार्याधीनत्वमुपश्रुत्यैकेन देहेन प्रतिबिम्बभूतं ब्रह्म श्रवणादिकमनुतिष्ठति। देहान्तरेण बिम्बभूतं सर्वज्ञं ब्रह्मोपदिशतीति न विद्योपदेशानुपपत्तिः। न च सर्वज्ञबिम्बचैतन्यस्यैवोपदेष्टृत्वे तस्य शिष्योपदेशात्पूर्वं स्वस्य विद्यार्थं श्रवणादिव्यापारानुपपत्तिरिति वाच्यम्। ईश्वरस्य प्रवृत्त्यनभ्युपगमात् सर्वेष्वपि हि शरीरेषु जीवचैतन्यवत् बिम्बभूतेश्वरचैतन्यमप्यन्तर्यामित्वेन सन्निहितं तथा च—जीवस्य श्रवणादिशून्यप्रवृत्तावपि नोपदेष्टुरीश्वरस्य श्रवणादिप्रवृत्तिः। नचैवं श्रवणादिशून्यदेहेनापीश्वरस्यो

पदेष्टृत्वं किन्न स्यादिति वाच्यम् । शिष्यस्य ह्याचार्यवचनविश्वासो विद्योत्पत्तावङ्गं भवति । विश्वासश्च श्रवणादिप्रवृत्तिमद्देहविशेष एव दृश्यते न तु सर्वत्र तदुपदेष्टापि कृपालुरीश्वरः श्रवणादिमद्देहद्वारेणैवोपदिशति न देहान्तरद्वारेणेति न कश्चिद्दोषः । न च शिष्यशरीरानुस्यूतान्तर्यामिणापि शिष्यस्य विद्योपदेशः किन्न स्यादिति वाच्यम् । परमेश्वरो हि यथाशास्त्रमेव जीवमनुगृह्णाति शास्त्रं च गुरूपसदनादिपूर्वकमेव विद्याप्राप्तिमाह । गुरूपसदनादिकं च देहान्तरसापेक्षमिति नोपदेष्टुर्देहान्तरोपादानानुपपत्तिः । न चैवं सत्युपदेष्टुर्गुरोर्देहाभावाद्देहिनश्च जीवस्यानुपदेष्टृत्वादन्योपसदनादिनान्यस्योपदेष्टृमित्यसामञ्जस्यापत्तिः । उपदेष्टुरन्तर्यामिणः स्वनियम्यजीवाभिन्नत्वपरिज्ञानात् । तदुपसदनादिनापि स्वस्योपसन्नत्वाद्यभिमानोपपत्तेः । नचैवमपि जीवस्योपदेष्टृत्वाभिमानो न स्यात् । उपदेष्ट्रीश्वराभिन्नत्वज्ञानाभावादिति वाच्यम् । उपदेष्टुरन्तर्याम्यधिष्ठितदेहादिद्वारैवोपदेशदर्शनात् । जीवस्य च देहतादात्म्यात् भ्रान्त्या तदभिमानोपपत्तेः । नचैवमपीश्वरस्य सर्वज्ञतयानधिकारिणं प्रत्युपदेशानुपपत्तेरधिकारिणं प्रत्युपदेशे चाधिकारिणः प्रमितिजनको वेद इतिन्यायेन तदानीमेव तत्त्वज्ञानोत्पत्तिप्रसङ्ग इति वाच्यम् । अधिकारिणोप्यन्तःकरणमालिन्यादिना असंभावनाग्रस्तत्वेन तदानीं तत्त्वज्ञानाभावोपपत्तेः । अत एव तत्रासकृत् श्रवणादिकं श्रूयते । नचेश्वरस्योपदेष्टृत्वेऽहमेव त्वमित्युपदेशप्रसङ्गः न तु त्वं ब्रह्मेतीति वाच्यम् । तदाकारज्ञानस्यैव पुरुषार्थत्वेन तथोपदेशोपपत्तेः । दृश्यते च तथाप्युपदेशः त्वं वा अहमस्मि भगवो देवते अहं वा त्वमसीति । नचान्तर्यामिणः उपदेष्टृत्वे प्रमाणाभावः, "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदाँश्च प्रहिणोति तस्मै" "तेने ब्रह्महृदा य आदिकवय" इत्यादिश्रुतिस्मृत्योरेव प्रमाणत्वात् । नन्वेवमप्येकस्मिन्कालेऽनेकेषां शरीरिणां सन्यासपूर्वं श्रवणादिप्रवृत्तिर्न संभवति । एकप्रवृत्त्यापि तत्फलसंभवात् । न च

स्वर्गादाविवात्र फलभेदोऽस्ति। अविद्यानिवृत्तिरूपाया मुक्तेरेकरूपत्वात्। न च यथैकस्यापि प्रभोरेकग्रामे फलासंभवशङ्क्या ऽनेकग्रामेष्वनेकमनुष्यद्वारा कृष्यादौ प्रवृत्तिः एवं जीवस्याप्येकप्रवृत्त्या फलासंभवशङ्क्यान्यद्वारापि प्रवृत्तिरिति वाच्यम्। शास्त्रीयात् साधनात् फलासंभवशङ्कानुपपत्तेरिति चेन्न। शास्त्रीयं हि साधनं साङ्गमनुष्ठितमेव फलायालमिति नियमः। अङ्गं चात्रातिदुर्लभविवेकवैराग्यादिकमिति दुष्करगुरुशुश्रूषादिकं च। विवेकवैराग्यादिकं च प्रतिशरीरं भिन्नमेव तदाश्रयान्तःकरणानामनेकत्वात्। तथा च फलासंभवशङ्काभावेऽप्येकस्मिन्देहे साधनापौष्कल्याशङ्क्या युगपदनेकशरीरद्वारा श्रवणादिप्रवृत्तिर्युक्तैव। नन्वेवमपि मुक्तामुक्तप्रतिपादकश्रुतिस्मृतिविरोध इति चेन्न। तस्य निरसिष्यमाणत्वात्। तस्मादनुपपत्तिलेशस्याप्यभावात्। जगदेकजीवमेवेत्येतन्सुघटमेवेत्यभिप्रायेण परिहरति—माशङ्क्किण्ठा इति। जगदेकजीवमेवेत्यत्र त्वयाशङ्का न कर्त्तव्या। उक्तयुक्तिभिस्तत्संभवस्योपपादितत्वादित्यर्थः। युक्तिभिरुपपादितोप्यर्थो निदर्शनप्रदर्शनं विना न शिष्यबुद्धिमध्यारोहतीति मत्वा सकलसंमतनिदर्शनप्रदर्शनमुखेन तदेव हेतुत्वेनाह—स्वप्नदृष्टान्तदृष्टान्तेरिति। स्वप्ने हि द्रष्टृपुरुषाविद्याकल्पितद्रष्टैक एव जीवः अन्ये गुरुशिष्यादिरूपेण प्रतीयमाना जीवाभासा इति सर्वसंमतम्। ततश्च स्वप्ने जीवैकत्वेपि सुखित्वदुःखित्वमुक्तामुक्ताभेदगुरुशिष्यादिव्यवस्थादर्शनात् जाग्रत्यपि तथैवोपपन्नमिति न शङ्का कार्येत्यर्थः॥ १२९॥

स्वप्नदृष्टान्तमेव प्रपञ्चयति—

सुप्तो जन्तुः स्वल्पमात्रेऽपि काले
कोटीः पश्येद् वृत्तसंवत्सराणाम्।
पश्येत्कोटीरेवमागामिनां च
जाग्रत्काले योजयेत्सर्वमेतत्॥ १३०॥

सुप्त इति । निद्राणाः स्वल्पमात्रेपि काले क्षणमात्रेपीत्यर्थः । वृत्तसंवत्सराणां गतसंवत्सराणां कोटीः पश्येत । एवमागामिनां संवत्सराणां कोटीः पश्येदित्यनुषङ्गः । निद्राणो हि पुरुषः निद्रावशेन क्षणमात्र एवातीतानेकसम्वत्सराः भविष्यन्तश्चानेके तत्र चानेके मुक्ताः अनेके च मोक्ष्यन्त इति पश्यति । न च तत्रातीतानागतसंवत्सराः मुक्तामुक्ताश्च सम्भवन्ति तत्र वास्तवकालाद्यभावात् वास्तवस्य च तदोपलब्धुमशक्यत्वात् । ननु तदा तस्य स्मरणं भविष्यतीति चेन्न । अयं गज एतत्कालीन इत्याविद्यकगजादिविशेषणतयानुभूयमानस्य तस्य स्मर्यमाणत्वानुपपत्तेः जीवस्य चैकत्वान्न वास्तवमुक्तामुक्तत्वादिसम्भवः । तथा च यथा तत्र वस्तुतोऽतीताद्यभावेपि जाग्रद्बोधपर्यन्तं तथा प्रप्रीतिः एवमेव जाग्रत्यपि वस्तुतोतीतागामिकालमुक्तामुक्तत्वाद्यभावेऽपि परमात्मबोधपर्यन्तं प्रतीतिमात्रेण तादृशव्यवहार उपपद्यत इति दार्ष्टान्तिकमाह—जाग्रत्काल इति । एतत्सर्वं कालातीतत्वानतीतत्वमुक्तत्वामुक्तत्वादिकं योजनीयमित्यर्थः ॥ १३० ॥

दार्ष्टान्तिकं प्रपञ्चयति—

कालोऽनादिस्तत्र मुक्तः शुकादिः
कालोऽनन्तो मोक्ष्यते तत्र चान्यः ।
इत्येवं ते बन्धमोक्षव्यवस्था-
सांसिद्धिः स्यादापरात्मप्रबोधात् ॥ १३१ ॥

कालोऽनादिरिति । इत्यनेन प्रकारेण एवं स्वप्नवत् ॥ १३१ ॥

एवं जीवस्यैकत्वेप्यविद्यया सुखदुःखगुरुशिष्यभावमुक्तामुक्तव्यवस्थायाः स्वप्न इवातत्त्वबोधे सम्भवात् बन्धमोक्षव्यवस्था घटते अतो नाद्वितीयत्वक्षतिरित्युक्तम् । इदानीं स्वमतं विमलीकरणाय प्रकारान्तरेण बन्धमोक्षव्यवस्थां दूषयितुं मतान्तरमुपन्यस्यति ।

तत्रादौ चैतन्यांशा एव जीवाः ते च ईश्वराद्भिन्नाः चैतन्यप्रतिबिम्बरूपाः न वास्तवभेदवन्तः । अज्ञानं च चैतन्यांशभूतसकलजीवाश्रयं ब्रह्मविषयमेकं तच्च सर्वेषु जीवेषु जातिरिव व्यक्तिषु परिसमाप्य तिष्ठति । तदेव बाह्याध्यात्मिकसकलानर्थप्रपञ्चहेतुः । तत्र कदाचित्तत्त्वमस्यादिवाक्याद्यस्य तत्त्वबुद्धिरुदेति तं विहायाज्ञानमन्यमाश्रयते जातिरिव नष्टव्यक्तिं विहायानष्टव्यक्तिमज्ञाने च गते तत्कार्यं सकलानर्थोऽप्यस्य नश्यति ब्रह्मात्मसम्पतिश्च भवति अन्यश्च संसरतीत्येवं केचिद्बन्धमोक्षव्यवस्थामाहुः । तन्मतमनुवदति —

अज्ञानं सकलभ्रमोद्भवनकृत्पिण्डेषु सामान्यव-
ज्जीवानां प्रतिबिम्बकल्पवपुषां बिम्बोपमे ब्रह्मणि ।
विद्वांसं पुरुषं जहाति भजते विद्याविहीनं नरं
नष्टानष्टमिवाऽऽत्मपिण्डमधुना जातिस्तथैके जगुः॥१३२॥

अज्ञानमिति । सकलभ्रमोद्भवनकृद्बाह्याध्यात्मिकविविधविश्वविभ्रमोत्पत्तिहेतुः । पिण्डेषु गवादिव्यक्तिषु सप्तमी चाधारे सामान्यवत् गोत्वादिसामान्यवत् जीवानामिति सम्बन्धषष्ठी स चाश्रयाश्रयिभावः प्रतिबिम्बकल्पवपुषां चेतनस्य परस्यांशभूतानां बिम्बोपमेऽशीभूते ब्रह्मणि विषयसप्तमी । सामान्यमिव पिण्डाश्रितं ब्रह्मविषयमज्ञानं जीवाश्रितं तच्च सकलहेतुरित्यर्थः । तादृशं चाज्ञानं विद्वांसं ब्रह्माहमस्मीतिवृत्तिसाक्षात्कारवन्तं जहाति परित्यजति विद्या तादृशवृत्तिसाक्षात्कारः तद्विहीनं भजते । तत्र दृष्टान्तः । नष्टेति । नष्टं चानष्टं चेति समाहारद्वन्द्वः आत्मपिण्डं स्वव्यक्तिं नष्टं जहाति अनष्टं भजत इति यथायोग्यं सम्बन्धः इवशब्दो यथार्थः जगुरूचुः ॥ १३२ ॥

अपरे पुनरेवमाहुः-अज्ञानानि ब्रह्मविषयाणि प्रतिजीवं भिद्यन्ते ।

तानि च संसारहेतुः माया चाज्ञानाद् भिन्ना। सा चेश्वराश्रया सैव प्रपञ्चहेतुः। तत्र यदा यस्य तत्त्वज्ञानं भवति। तदा तन्निष्ठमज्ञानं नश्यति ततश्च मुक्तो भवति अन्यश्च स्वाज्ञानेन संसरतीति तन्मतमनुवदति—

अज्ञानानि बहून्यसंख्यवपुषो जीवान्मुमुक्षूनपि
ज्ञानाज्ञानसमाश्रयाननुयुगं तेषां च निःश्रेयसम्।
मायामीश्वरसंश्रयामनुगमात्संसारसंवर्तिनीं
केचिद्दैवविघातनिघ्नमनसः स्वीचक्रुरल्पश्रुताः ॥१३३॥

अज्ञानानीति। अज्ञानानि बहूनि प्रतिजीवमन्यानि स्वीचक्रुः अङ्गीचक्रुः। असङ्ख्यवपुषः अपरिमितान् ज्ञानाज्ञानसमाश्रयान् ज्ञानिनोऽविवेकिनश्च मुमुक्षून् मोक्षेच्छूनपि जीवान् स्वीचक्रुः। अनुयुगं प्रतियुगं यदा तत्त्वसाक्षात्कारः तदेत्यर्थः। तेषां जीवानां निश्रेयसं स्वीचक्रुः। नन्वज्ञानस्य प्रतिपुरुषमन्यत्वे कथं तत्कार्यप्रपञ्चस्य साधारण्यमित्याशङ्क्याज्ञानस्य च मायाया एव साधारणेश्वराश्रितायाः सर्वविश्वहेतुत्वात् प्रतिजीवमसाधारणसुखदुःखादिकार्ये सहकारिमात्रत्वात् साधारण्यं सम्भवतीत्यभिप्रायेणाह—मायामीश्वरसंश्रयामिति। ननु किं मायाया जगज्जननसामर्थ्यं स्वतः न किंत्वीश्वरसम्बन्धवशादित्याह—अनुगमात् संसारसंवर्तिनीमिति। ईश्वरसम्बन्धात् सर्वं जगज्जननीं स्वीचक्रुः। मायाया अज्ञानातिरिक्तत्वे अज्ञानतदधीनमात्रविरोधिज्ञाननिवर्त्यत्वाभावात्पुनरपि तत्प्रयुक्तसंसारः स्यादित्यतिकष्टतापत्त्या भ्रान्तप्रलपितमेवैतदित्यभिप्रेत्य तन्मतानुवादावसर एव तदस्वारस्यं दर्शयति—दैवेति। दैवप्रातिकूल्यापहतमनस इत्यर्थः। अत एवाल्पश्रुताः सकलशास्त्राश्राविणः ॥ १३३ ॥

अपरे पुनरित्थं वर्णयन्ति निरवयवनिर्भेदस्वप्रकाशब्रह्माश्रितमेवाज्ञानं तच्चैकमेव चाब्रह्मऽज्ञानसम्बन्धात् तत्कार्यद्वारानेकतां भजते। तत्र यदा यस्यात्मनो ब्रह्मात्मज्ञानं तस्य ब्रह्माश्रितं तदज्ञानन्नश्यति। यस्य तु तन्न तस्य संसारहेतुत्वेन तस्मिन्ब्रह्मण्यज्ञानं तिष्ठति। न च निरवयवे तस्मिन्नेकदाऽज्ञानभावाभावासंभवः। निरवयवेप्याकाशे पक्षितदभावदर्शनादिति तन्मतमनुवदति—

आकाशे विहगोऽस्ति नास्ति च यथा तद्वत्परब्रह्मणि
स्वच्छे चिद्वपुषि स्वभावविमलेऽसङ्गे शिवे शाश्वते।
निर्भेदेऽनुदयव्ययेऽनवयवेऽविद्या भवेन्नो भवे-
दित्येवं निरवद्यमाहुरपरे पक्षव्यवस्थार्थिनः ॥ १३४ ॥

आकाश इति। विहगः पक्षी स्वच्छे वस्तुतोऽविद्यादोषशून्ये अत एव स्वभावविमले स्वभावादेव कर्तृत्वादिदोषशून्ये हेत्वन्तरं चाह असङ्गे रागादिदोषशून्ये शिवे सुखरूपे अनुदयव्यये आद्यन्तशून्ये अत एव शाश्वते अनवयवे निरवयवेऽविद्येति च्छेदः। निरवयवे गगने एकदा पक्षितदभावदर्शनात् न निरवयवात्मन्यज्ञानतदभावानुपपत्तिदोषोपीत्यभिप्रेत्याह—निरवद्यमिति। पक्षव्यवस्थार्थिनः स्वमते बन्धमोक्षव्यवस्थार्थिन इत्यर्थः ॥ १३४ ॥

केचित्पुनरेवमूचुः निरवयवे ब्रह्मण्येवाज्ञानं विद्यते तत्सम्बन्धेन चात्मनोनेकात्मत्वं यस्य च तत्त्वज्ञानं तस्य तदज्ञानं नश्यति अन्यस्य तत्तस्मिन् तिष्ठतीत्येतत्सर्वं तुल्यं किन्त्वेकस्मिन्निरवयवे एकदा भावाभावयोर्वृत्त्यनुपपत्तेरन्तः करणतदभावौ द्वारीकृत्यैवाज्ञानतदभावौ ब्रह्मणि वर्तेते न केवलम् ततश्च न भावाभावयोरेकत्र वृत्तिदोषोपीति तन्मतमनुवदति—

शुद्धे वस्तुनि यद्यपि प्रविशति ध्वान्तं मनः कारणं
स्वीकृत्यैव तथाप्युपाधिमपरं ब्रह्मस्वरूपे विशेत् ।
तच्चान्तःकरणं सुसूक्ष्मवपुषा तिष्ठेद् बहिः सर्वदा
चैतन्ये तमसो नियामकमिति स्वीचक्रुरन्ये पुनः ॥१३५॥

शुद्धे वस्तुनीति । शुद्धेऽनात्माविशिष्टे वस्तुनि आत्मनि कारणं जगत्कारणं ध्वान्तमज्ञानं प्रविशति वर्तते यद्यपि तथापि अपरमात्मनोन्यं मनोलक्षणमुपाधिं स्वीकृत्यैवादायैव ब्रह्मस्वरूपे विशेत् वर्तेत । नन्वतःकरणस्योपाधित्वे सुषुप्त्यादौ तदभावात् तदा कथमज्ञानं तिष्ठेत् । किंचान्तःकरणमादाय ब्रह्मण्यज्ञानप्रवेशेऽन्तःकरणस्यापि तदाश्रयत्वं स्यादित्याशङ्क्य परिहरति—तत्रेत्यादिना । तत्राज्ञानप्रवेशसमयेऽन्तःकरणं तमसोऽज्ञानस्य चैतन्ये नियामकं आश्रयत्वनियामकं सत् चैतन्यस्याज्ञानाश्रयत्वप्रयोजकं स्यादित्यर्थः । सर्वदा आमोक्षं सूक्ष्मवपुषा कारणात्मना अज्ञानशक्त्यात्मना कार्यात्मना चेत्यपि द्रष्टव्यम् । सुप्त्यादौ सूक्ष्मरूपेण जाग्रदादौ स्थूलरूपेण चेत्यर्थः । बहिः अज्ञानाश्रयचैतन्याद्बहिः, तथा च नान्तःकरणस्याज्ञानाश्रयत्वप्रसङ्गः न वा ब्रह्मणि सुप्त्यादावज्ञानवृत्त्यनुपपत्तिरित्यर्थः । अत्र चान्तःकरणस्याज्ञानवर्त्तननियामकत्वं वदतान्तःकरणाभावोऽज्ञानाभाववर्त्तननियामक इति सूचितम् ॥ १३५ ॥

केचित्त्वेवं वदन्ति—अज्ञानमेकमेव तच्च परमात्माश्रितं परमात्मा चाज्ञानवशात् कार्यद्वारेणानेकात्मकतां भजते तत्र यस्य ज्ञानं तस्य तदज्ञानं नश्यतीत्येतत्सर्वं तुल्यमेव किन्तु विनश्यदज्ञानमंशभेदेनैव नश्यति न तु सर्वात्मना एकस्य सर्वात्मना नाशेऽन्यत्र संसाराभावप्रसङ्गात् अत एव आत्मनि बन्धमोक्षव्यवस्थेति तन्मतमनुवदति—

अज्ञानि ब्रह्म बुद्धीरनुसरति ततः स्थावरं जङ्गमं च स्वाज्ञानादेव भूत्वा क्वचिदवगतितो मुक्तमन्यत्र बद्धम् । तच्चाज्ञानं विनष्टं स्थितमथ च तदेवांशभेदोपपत्ते-रेवं सर्वव्यवस्था परमपुरुषगा जाघटीतीति केचित्॥१३६॥

अज्ञानीति । अज्ञानाश्रयः बुद्धीः अन्तःकरणान्यनुसरति तत्र प्रतिफलतीत्यर्थः । ततः तत्र प्रतिफलनानन्तरं स्वाज्ञानादेव स्थावरं वृक्षादि जङ्गमं मनुष्यादि भूत्वा स्थावरादिभावमापद्येत्यर्थः । क्वचि-दुपाधिविशेषेऽवगतितः तत्त्वसाक्षात्कारान्मुक्तं भवतीति शेषः । अन्यत्र तत्त्वबोधरहितस्थले बद्धं संसारि भवतीति शेषः । नन्वज्ञान-नाशाभावे कथं मुक्तिस्तत्राह—तच्चेति । तद्ब्रह्माश्रितं पुनरन्तःकरणादि-रूपेण परिणतं चाज्ञानं विनष्टमवगतित इत्यनुषङ्गः । नन्वज्ञानस्य नष्टत्वे कथमन्यत्र संसारस्तस्यैकत्वादित्यत्राह—अथ च तदेव स्थितमिति । अथाप्यज्ञानस्य नष्टत्वेपीत्यर्थः । तदेवाज्ञानं तिष्ठति । नन्वेकस्यैव तदा नष्टत्वं विद्यमानत्वं चानुपपन्नं तत्राह—अंशभेदेति । अंशभेदसंभवादुप-पद्यत इत्यर्थः । ततश्चैवमेव बन्धमोक्षव्यवस्था संभवतीत्याह—एवमिति । अज्ञानस्यांशभेदेन नाशानाशाभ्यामित्यर्थः । सर्वव्यवस्था-बन्धमुक्त्यादिव्यवस्था परमपुरुषगा परमात्मविषया जाघटीति । भृशमुपपद्यते केचिदाहुरिति शेषः ॥ १३६ ॥

केचित्त्वेवमाहुः—यथा लोके दाशः स्वेच्छया कांश्चित् मत्स्यान् प्रति जालं प्रसारयति कांश्चित्प्रति संकोचयति । एवमेवेश्वरः कर्म-सहायः सन् स्वेच्छया बन्धनीं मायां कांश्चिदज्ञानिनो जीवान् प्रति प्रसारयति कांश्चित् विदुषः प्रति संकोचयति मिथ्या मायैव च बाह्याध्यात्मिकसकलप्रपञ्चकारणमज्ञानं तु भगवत्तत्त्वावारकमेव न विक्षेपहेतुः सा च माया सत्या वास्तविति तन्मतमनुवदति--

बाह्याध्यात्मिकवस्तुजातजननी माया हरेर्बन्धनी
शक्तिर्दाशकजालवत्प्रसरणं प्राप्नोत्यविद्यावतः।
जीवान्संकुचतीच्छया भगवतः सत्याऽस्तु मिथ्याऽथवा
संकोचश्च विलक्षणश्च भवतः स्वाभाविकावित्यपि॥१३७॥

बाह्याध्यात्मिकेति। बाह्यं साधारणं वियदादि आध्यात्मिकं प्रत्यात्मनियतं सुखदुःखादि तदुभयवस्तुविशेषजननी अत एव बन्धनी जीवस्य संसारकरी परमेश्वरस्य शक्तिः। अनेन मायास्वातन्त्र्यं निरस्तम्। दाशकजालवत्। दाशो वागुरिकः स्वार्थे कः तस्य जालं वागुरा यथा मृगादीन् प्रति प्रसरणं प्राप्नोति संकुचति च तद्वद्भगवतः कर्मसहायस्येश्वरस्येच्छयाऽविद्यावतोऽविवेकिनो जीवान् प्रतिप्रसरणं प्राप्नोति। ते चेश्वरेच्छया प्रसारितमायाबन्धेनावृताः सन्तः स्वर्गनरकादिगर्ते पतन्ति। यदात्वीश्वरार्पणबुद्ध्यानुष्ठितयज्ञादिना तेषां भगवान् तुष्यति। तदा तत्कृपावशात् बन्धनी माया तान् प्रति संकुचति निवर्तते। ननु मायाया अज्ञानान्यत्वेन ज्ञानवित्यर्थत्वं न स्यादित्याशङ्क्य भगवदनुग्रहादेव तन्निवृत्तेरङ्गीकृतत्वादिष्टापत्तिः। ज्ञानानिवर्त्यत्वेपि न क्षतिरिति परिहरति—सत्यास्त्विति। अथवेत्यनास्थायां वस्तुतस्तु सत्यैवेत्यर्थः। नन्वेवं सति ज्ञानस्योपयोगो न स्यात्तस्य सत्यनिवर्तकत्वाभावादित्याशङ्क्य भगवत्समर्पितकर्मादिना शुद्धाशयस्य ज्ञानिन एव भगवदनुग्रह इत्येतावन्मात्रे तस्योपयोगात्। सत्यत्वेपि तदुपपत्तिरित्याह—संकोच इति। विलक्षणः विकासः अस्मिन्पक्षे एकस्य विद्यमानस्य निवृत्त्यनुपपत्तिः। संकोचरूपत्वान्निवृत्तेरित्यर्थः। इत्यपि केचित्स्वीचक्रुरिति शेषः॥ १३७॥

मण्डनमिश्रादयस्त्वेवमाहुः—विक्षेपसंस्कारलक्षणैवाविद्या सैव निखिलजगत्कारणं न तु तदुपादानभूता आमोक्षं दण्डायमाना काचि-

दविद्यास्ति। सा च जीवाश्रया ब्रह्मविषया प्रतिजीवं भिन्ना च प्रवाहरूपेण चानादिः ज्ञानकर्मसमुच्चयाच्च तन्निवृत्त्या मोक्षः तद्रहितानां च संसार इति तन्मतमनुवदति—

संस्कारभ्रमसन्ततिं प्रतिनरं भिन्नां परब्रह्मणि
स्वीचक्रुर्विषये प्रवाहवपुषाऽनादिं तमः केचन।
तामुच्छिद्य समुच्चयेन घटते मोक्षाय कश्चिन्नरः
कश्चिन्नद्विरहेण संसरति ना जीवाश्रया सेति च॥१३८॥

संस्कारेति। संस्कारः विक्षेपसंस्कारः भ्रमो मिथ्याज्ञानं तयोः सन्ततिः प्रवाहः तां प्रतिनरं प्रतिजीवं परब्रह्मणि विषये परब्रह्मविषयिणीमित्यर्थः। ननु संस्कारस्य भ्रमस्य च जन्यस्य कथमनादिप्रपञ्चकारणत्वं तत्राह—प्रवाहेति। प्रवाहरूपेणानादिं प्रवाहानादित्वं नाम संस्कारभ्रमान्यतरव्याप्तकालत्वम्। तथा च जगतोपि प्रवाहरूपेणैवानादित्वात्प्रवाहरूपेणानादिसंस्कारजन्यत्वं युज्यत इत्यर्थः। केचन्मण्डनादयः। उक्तविशेषणविशिष्टां संस्कारभ्रमसन्ततिं तमः स्वीचक्रुरिति सम्बन्धः। तन्निवर्त्तकमाह—तामिति। संस्कारभ्रमसन्ततिं समुच्चयेन ज्ञानकर्मसमुच्चयेनोच्छिद्य निरस्य मोक्षाय घटते मुक्तो भवतीत्यर्थः। तद्विरहेण ज्ञानकर्मसमुच्चयविरहेण ना नरः जीव इत्यर्थः। सा च जीवाश्रयेत्याह—जीवाश्रयेति। सा संस्कारभ्रमसन्ततिः इति च स्वीचक्रुरित्यनुषङ्गः॥ १३८॥

एवं सप्तपक्षानुपन्यस्य तत्राद्यपक्षद्वये चाज्ञानस्य प्रत्यगात्माश्रयत्वमङ्गीकुर्वन् जीवभिन्नब्रह्मविषयत्वं साधकाभावेन निराकर्त्तुं विकल्पयति—

अज्ञस्तावत्प्रत्यगात्माऽहमज्ञ
इत्येवं नः सिद्ध्यति स्वप्रकाशात्।

अज्ञातं तु ब्रह्म सिद्ध्येत् कुतो वः
सम्यग्ज्ञानाद्भ्रान्तितः स्वप्रकाशात् ॥ १३९॥

अशस्तावादिति । अज्ञः अज्ञानाश्रयः तावदिति वाक्यालंकारे प्रत्यगात्मा तावन्नोस्माकं सर्वेषां जीवानामज्ञः सिद्ध्यति । एवं स्वप्रकाशादिति सम्बन्धः । एवंशब्दार्थमाह—अहमज्ञ इतीति । अहमज्ञ इत्यज्ञानाश्रयत्वेन स्वस्य प्रतीचो भानादित्यर्थः । एतस्मादिति पाठः सुयोजः । अज्ञातमज्ञानविषयस्तु ब्रह्म न कुतः अस्मात्साधकात् सिद्ध्येदित्यर्थः । कुतः शब्दपरामृष्टान्विकल्पानाह—सम्यग्ज्ञानादिति । किं प्रमाणज्ञानादज्ञातं ब्रह्म सिद्ध्येत् किं वा भ्रान्तिज्ञानात् । अथवा स्वप्रकाशरूपानुभवादितिविकल्पार्थः ॥ १३९ ॥

तत्राद्यं दूषयति—

सम्यग्ज्ञानाद्ब्रह्मणः सिद्धिपक्षे
जाड्यं तस्य स्याद्घटादेर्यथैव ।
सम्यग्ज्ञानाद्ब्रह्मणोऽज्ञानसिद्धौ
तस्यापि स्यात्सत्यता तद्वदेव ॥१४०॥

सम्यग्ज्ञानादिति । प्रमाणज्ञानादज्ञातब्रह्मणः सिद्ध्यङ्गीकारे तस्य ब्रह्मणो यथा घटादेः प्रमाणवेद्यत्वेन जाड्यं तद्वज्जडत्वं स्यादित्यर्थः । ननु भवद्भिरपि तस्य वेदान्तप्रमाणवेद्यत्वमङ्गीक्रियत इति चेन्न । स्वयंप्रकाशप्रत्यगभिन्नस्य वेदान्तजन्याखण्डाकारवृत्तिमात्रविषयत्वस्यैव स्वाकारसमर्पकत्वलक्षणस्यास्माभिरङ्गीकारात् । तर्हि तादृशमेव प्रमाणवेद्यत्वमस्माभिरप्यज्ञातब्रह्मणः स्वीक्रियत इति चेन्न त्वन्मते स्वप्रकाशप्रत्यग्भिन्नस्य तद्विषयचैतन्यप्रकाशं विना तत्सिद्ध्यनुपपत्तेरित्यर्थः । दूषणान्तरमाह—सम्यग्ज्ञानाद्ब्रह्मणोऽज्ञानसिद्धाविति ।

अज्ञानेतिच्छेदः । ब्रह्मणोऽज्ञानसिद्धौ ब्रह्मविषयाज्ञानसिद्धौ तद्वत् ब्रह्मवत् अज्ञातस्य ब्रह्मणः प्रमाणसिद्धौ नागृहीतेति न्यायेनाज्ञानस्यापि तस्मात्सिद्धिर्वक्तव्या । तथा च तदपि ब्रह्मवत् वास्तवं स्यादित्यर्थः । ननु यथा युष्माकमज्ञानस्यानुमानादिप्रमाणगम्यत्वेपि न वास्तवत्वं तद्वत्स्यादिति चेन्न । यतोऽस्माभिः प्रमाणेनाज्ञानस्याभावव्यावृत्तिरेव क्रियत इत्यङ्गीक्रियते । ननु न प्रमाणेनाभावव्यावृत्तिः कर्तुं शक्या तस्याकारकत्वाद्व्यावृत्तेरनादित्वाच्च । न चाभावव्यावृत्तिबोधः क्रियत इति वाच्यम् । तत्र किं प्रमाणेनाभावव्यावृत्तिमात्रमेव बोध्यते । उत व्यावृत्तिविशिष्टमज्ञानमपि । नाद्यः । केवलं व्यावृत्तिरित्यप्रतीतेः प्रत्येतुमशक्यत्वाच्च । न हि धर्माद्यविशिष्टा व्यावृत्तिः क्वचित्प्रतीयते । द्वितीयेऽज्ञानस्यापि प्रमाणवेद्यत्वममतमेवेति चेन्न । प्रमाणं ह्यज्ञातांशे प्रमाण्यमश्नुते न तु ज्ञातांशेप्यज्ञानं च स्वप्रकाशानुभवरूपमात्माश्रितं तेन सिद्धमेव अतो नानुमानादिकमज्ञानांशेपि न प्रामाण्यं भजते । येनाऽस्मन्मते तस्य प्रमाणिकत्वेन वास्तवत्वप्रसङ्गः । किन्तुभावत्वोपादानत्वाभावव्यावृत्तिमात्रांश एव नैवं त्वन्मतेऽज्ञातत्वं ब्रह्मणः केनचिन्सिद्धं तस्यैवाद्यविचारणादित्यर्थः ॥ १४० ॥

द्वितीयं दूषयति—

भ्रान्तिज्ञानाद्ब्रह्मणः सिद्धिपक्षे
तस्यापि स्यात्कल्पितत्वं तमोवत् ।
अज्ञातं चेद् ब्रह्म नः स्वप्रकाशं
मा भाषिष्ठाः नानुभूतिस्तथा नः ॥ १४१ ॥

भ्रान्तिज्ञानादिति । भ्रान्तिज्ञानादेवाज्ञातब्रह्मणः सिद्ध्यङ्गीकारे तस्य

ब्रह्मणोऽपि तमोवद्विशेषणीभूताज्ञानवत् कल्पितत्वं स्यादित्यर्थः। तृतीयमनूद्यासंभवेन दूषयति—अज्ञातमिति। अज्ञानविषयो ब्रह्म नो ऽस्माकं जीवानां स्वप्रकाशं चेत्स्वस्य प्रतीचः प्रकाशेनैव प्रकाश इति चेत् मा संभाषिष्ठाः मैवं वद यतो नोऽस्माकं तथा स्वप्रकाशत्वेनानुभूतिः अज्ञातब्रह्मणः ॥ १४१ ॥

मायाऽज्ञानातिरिक्ता ब्रह्म तदाश्रय इति ब्रह्मणोमायावित्वं तन्मायावित्वमपि ब्रह्मणोऽज्ञानविषयत्ववत्साधकाभावेन दूषणीयमित्यतिदिशति—

अज्ञातत्वे यानवोचाम दोषान्
मायावित्वे ब्रह्मणस्तानवेहि।
मिथ्याज्ञानात्स्वप्रकाशात्प्रमाणा-
त्संसिद्धिः स्यात्तस्य तत्कथ्यतां नः ॥१४२॥

अज्ञातत्व इति। ब्रह्मणोऽज्ञातत्वपक्षे यान् दोषान् जडत्वापत्त्यादीनवोचाम तान्दोषान्मायावित्वेपि जानीहि साधकविकल्पस्यात्रापि संभवादित्यर्थः ॥ १४२ ॥

तानेव दोषान् वक्तुं पूर्ववद्विकल्पयति—

मिथ्याज्ञानाद्ब्रह्मणः सिद्धिपक्षे
मायेव स्यात्कल्पितं तच्च तद्वत्।
मानादिष्टं ब्रह्म मायावि चेद्वो
मायायाः स्यात्सत्यता जाड्यमस्य ॥१४३॥

मिथ्याज्ञानादिति। नोऽस्माकं मिथ्याज्ञानात्तस्य मायाविब्रह्मणः

संसिद्धिः स्यादथवा प्रमाणात् उत स्वप्रकाशादिति क्रमो द्रष्टव्यः। तत्केन साधनेन संसिद्धिः स्यादित्येतदाद्यपक्षद्वयं पूर्ववदुदूषयति—मिथ्याज्ञानादिति। ब्रह्मणो मायाविनः तद्ब्रह्म तावदितिवाक्यालङ्कारे। तद्वदितिपाठे तद्वत् ब्रह्मवत् मायायाः सत्यता स्यादिति सम्बन्धः। इष्टं सेद्धुमिति शेषः। वः पूर्वपक्षिणाम्। अस्मिन्पक्षेपि मायायाः सत्यता स्यात् प्रमाणगम्यत्वात्। तथा च तत्कार्यस्यापि सत्यतया निवृत्त्ययोगात्। निवृत्तावप्यात्यन्तिकनिवृत्त्ययोगात्। पुनरपि कदाचित्संसारः स्यादित्यर्थः। प्रमाणगम्यत्वादेवास्य ब्रह्मणोपि जाड्यं स्याद् घटादिवदित्यर्थः॥ १४३॥

तृतीयमनुवदति—

तन्मायावि ब्रह्म चेत्स्वप्रकाशं
मायाऽपि स्याद्ब्रह्मवत्स्वप्रकाशा।
मायां पश्येद्ब्रह्म चेत्स्वप्रकाशं
तत्रापि स्यात्स्वानुभूत्या विरोधः॥ १४४॥

तन्मायानीति। मायावि तद् ब्रह्म नः स्वप्रकाशं चेदित्यर्थः। तत्र किं मायाविशिष्टं ब्रह्म नः स्वप्रकाशम्। उत मायोपलक्षितम्। नाद्य इत्याह—मायाऽपीति। अन्यथा मायालक्षणविशेषस्यास्वप्रकाशत्वे तद्विशिष्टब्रह्मणोपि स्वप्रकाशत्वं न स्यादित्यर्थः। द्वितीयमनुवदति मायां पश्येदिति। मायासाधकं ब्रह्मैव नः स्वप्रकाशं न तु मायाऽपीति चेदित्यर्थः। तत्र पूर्वोक्तमनुभवासंभवमेव दूषणमाह—तत्रापीति। मायोपलक्षितं ब्रह्मैव स्वप्रकाशमित्यस्मिन् पक्षेऽपि प्रत्यग्भिन्नस्य ब्रह्मणः स्वप्रकाशतया प्रतीचोऽनुभवाभावादेव विरोध इत्यर्थः॥ १४४॥

अननुभवमेव व्यतिरेकदृष्टान्तपूर्वकमाह—

आत्मा मूढः स्वप्रकाशो यथायं
नैवं मायि ब्रह्म नः स्वप्रकाशम् ।
अज्ञादन्यद्ब्रह्म चेत्स्वप्रकाशं
द्वे विस्पष्टे स्वप्रकाशे स्फुरेताम् ॥ १४५ ॥

आत्मेति । यथाऽयमात्मा प्रत्यगात्मा मूढः अज्ञानाश्रयस्वप्रकाशः अहमज्ञः इतिस्वानुभवगम्यः एवं मायि मायावि ब्रह्म नः स्वप्रकाशं स्वानुभवगम्यं न भवतीत्यर्थः । ननु प्रत्यगात्मवद् ब्रह्मापि नः स्वप्रकाशमेवेति वदन्तं प्रत्याह—अज्ञादन्यदिति । अज्ञादज्ञानाश्रयात्प्रतीचः यद्यज्ञानाश्रयप्रत्यगात्मव्यतिरेकेण मायावि ब्रह्मापि नः स्वप्रकाशं स्यात् स्वानुभवेन प्रतीयात् तदास्माकं शास्त्रश्रवणविधुराणामपि प्रत्यक्षेणानुभूयमानवस्तुद्वयवदज्ञमायाविनोरुभयोरपि विविक्तत्वेनापरोक्षप्रतीतिः स्यादित्यर्थः ॥ १४५ ॥

ननु पुरुषान्तरसंवेदनस्य स्वप्रकाशत्वेपि पुरुषान्तरेण स्पष्टं स्वानुभवेनागृह्यमाणत्ववद् ब्रह्मणः स्वप्रकाशत्वेप्यस्माभिरप्रतीयमानतया विस्पष्टमुभयप्रतीतिर्नास्तीति चेन्न—स्वप्रकाशत्वं हि स्वस्य प्रतीचः प्रमाणान्तरं विना प्रकाशमानत्वं तच्च पुरुषान्तरसंवेदनेऽप्यस्ति तस्य स्वविषयप्रमाणं विना तदाश्रयप्रत्यगात्मनः प्रकाशमानत्वात् । ब्रह्म च प्रमाणान्तरं विना प्रतीचो न प्रकाशत इति न तत्स्वप्रकाशम् । ननु प्रमाणं विना स्वस्य प्रकाशमानत्वमेव स्वप्रकाशत्वं न प्रतीच इति चेन्न—तथात्वे घटादेरपि स्वात्मानं प्रति स्वयं न प्रकाशत इत्यत्र मानाभावेन तस्यापि स्वप्रकाशत्वप्रसङ्गादित्यर्थः । तस्मात्प्रमाणाभावात् प्रत्यग्भिन्नस्य ब्रह्मणोऽज्ञानविषयत्वं मायावित्वं चानुपपन्नमिति न तद्भेदः प्रामाणिक इति भावः । एवं ब्रह्मणो जीवभिन्नत्वे जीवस्य साधकप्रमाणाभावेन ब्रह्मणोज्ञातत्वं मायावित्वं च न

सिद्धयतीत्युक्तम्। इदानीं ब्रह्मणो भिद्यमानाः जीवाः ब्रह्मणा ज्ञायन्ते। उत न। नाद्यः। तेषां जडत्वप्रसङ्गात्। न द्वितीयः। ब्रह्मणोऽसर्वज्ञत्व-प्रसङ्गादित्यतोपि जीवब्रह्मभेदः प्रामाणिको न भवतीत्यभिप्रेत्याह—

ज्ञायन्ते चेद्ब्रह्मणा जीवभेदा
जाड्यं तेषां कुड्यवन्निर्विवादम्।
न ज्ञायन्ते ब्रह्मणा चेत्तदानीं
सर्वज्ञत्वव्याहतिर्दुर्निवारा ॥ १४६ ॥

ज्ञायन्ते चेदिति। जीवभेदाः भिद्यन्त इति भेदाः भिद्यमानजीवा इति यावत्। जाड्यं स्यादिति शेषः। सर्वज्ञत्वव्याहतिर्ब्रह्मण इति शेषः। साधकाभावेन भिद्यमानजीवानामसिद्धिरित्यपि द्रष्टव्यम् ॥ १४६ ॥

ननु साधकाभावोऽसिद्धः भिद्यमानजीवानां स्वयंप्रकाशत्वादेव सिद्धिसंभवादिति शङ्कते—

जीवा एते स्वप्रकाशस्वभावा
निर्भासन्ते ब्रह्मणश्चेद्विभक्ताः।
तेषां भेदः स्वप्रकाशो न वा स्या-
दोषं ब्रूमो दुर्निवारं द्विधाऽपि ॥ १४७ ॥

जीवा एत इति। ब्रह्मणो विभक्ता भिन्ना स्वप्रकाशस्वभावा इति हेतु-गर्भितं विशेषणं यतः स्वप्रकाशाः अतो निर्भासन्ते प्रकाशन्ते चेदिति सम्बन्धः तत्र किं जीववज्जीवनिष्ठभेदोपि स्वप्रकाशः उत नेति विक-ल्प्योभयथापि दोषं वक्ष्यामीति प्रतिजानीते—तेषामिति। जीवानां भेदः ब्रह्मप्रतियोगिकः द्विधापि पक्षद्वयेपीत्यर्थः ॥ १४७ ॥

आद्ये दोषमाह—

तेषां भेदः स्वप्रकाशो यदीष्टः
सत्यत्वं स्यात्तस्य तेषां तथैव।
वेद्योऽभीष्टस्तद्विभागो यदि स्या-
त्तानज्ञात्वा तद्विभागं न वेद्यः॥ १४८॥

तेषामिति। यदि ब्रह्मप्रतियोगिकजीवभेदः स्वप्रकाशः स्यात्तदा जीवानां तेषां यथा सत्यत्वं तद्वत्तस्य भेदस्यापि सत्यत्वं स्यात्। न च सत्यत्वमिष्टमेवेत्यपि शङ्क्यम्। तत्त्वमाद्येकत्वश्रुतिविरोधात्। नात्र का चनभिदास्ति नैवात्र काचन भिदास्ति। अत्र भिदामिव मन्यमानः शतधा सहस्रधा भिन्नः मृत्योः स मृत्युमाप्नोतीति भेदनिषेधश्रुतिविरोधाच्च। स्वप्रकाशस्य चैतन्यात्मत्वनियमेन भेदत्वानुपपत्तेश्चेत्यर्थः। द्वितीयमनुवदति—वेद्य इति। तद्विभागः जीवनिष्ठभेदः। भेदो हि धर्म्यादिविशिष्ट एव ज्ञायते। केवलभेदमात्रस्य क्वचिदप्यप्रतीतेः। जीवानां च धर्मिभूतानां प्रतियोगिब्रह्मणश्च स्वप्रकाशकत्वान्न भेदप्रकाशकप्रकाश्यत्वं संभवतीति धर्मिज्ञानाभावात् भेदज्ञानमपि न संभवतीति तत्र दूषणमाह—तानज्ञात्वेति। तान् धर्मिभूतजीवान् ब्रह्म चाज्ञात्वा भेदप्रकाशकमानेनेत्यर्थः॥ १४८॥

एवं जीवब्रह्मभेदे जीवानां ब्रह्मासिद्धिः ब्रह्मणश्च जीवासिद्धिः सिद्धौ वा जडत्वादिप्रसङ्ग इति दूषणमुक्तं जीवानां परस्परभेदेपि परस्परासिद्धिः सिद्धौ वा जाड्याद्यापत्तिरिति दूषणं वक्तुं पूर्ववत् विकल्पयति—

जीवाः सर्वे त्वां प्रति प्रस्फुरन्तः
सम्यग् ज्ञानात् प्रस्फुरन्ति स्वतो वा।

यद्वा मिथ्याज्ञानसामर्थ्यतोऽमी
पक्षः कस्ते रोचते ब्रूहि तन्मे ॥ १४९ ॥

जीवा इति । त्वामितिप्रतिवादिनं प्रत्युक्तिः । यदि जीवाः परस्परं भिन्ना इति ब्रूषे तर्हि किं त्वया न ज्ञायन्ते उत ज्ञायन्ते । नाद्यः तानज्ञात्वा तद्भेदस्य ज्ञातुमशक्यत्वेन परस्परं भिन्ना इत्युक्त्यनुपपत्तेः ज्ञायन्ते चेत् किं ज्ञायमानाः जीवाः प्रमाणेन त्वया ज्ञायन्ते, उत स्वतः, किं वा भ्रान्त्या, एषु पक्षेषु मध्ये कः पक्षः ते तुभ्यं रोचते तं पक्षं ब्रूहि तत्र दूषणं वदाम इत्यर्थः ॥ १४९ ॥

पक्षत्रयेपि दूषणं क्रमेण दर्शयति—

सम्यग्ज्ञानाज्जीवभेदप्रसिद्धा
वद्वैतत्वं ब्रह्मणो न प्रसिद्ध्येत् ।
जीवाः सर्वे मां प्रति स्वप्रकाशा
इत्युक्तिस्ते स्वानुभूत्या विरुद्धा ॥ १५० ॥

सम्यग्ज्ञानादित्यादिना उपेय इत्यन्तेन । यदि परस्परं भिन्ना जीवाः त्वया प्रमाणेन ज्ञायन्ते तदा ब्रह्मणः सजातीयादिभेदराहित्यलक्षणमद्वयत्वं श्रुतिप्रमितं न सिद्ध्येत् । जीवानां च जाड्यं स्यात् । यदि त्वया स्वत एव ज्ञायन्ते इदमतिसाहसवचनं नह्यन्योऽन्येन स्वतोऽनुभूयते । यदि त्वया भ्रान्त्या ज्ञायन्ते तर्हि भ्रान्तिसिद्धस्य सम्यग्ज्ञानेन बाधितत्वादेकत्वमेव परिशिष्यत इत्यस्मत्पक्षकुक्षिनिक्षेपे जीवानां बाध्यत्वं स्यादित्यर्थः ॥ १५० ॥

भ्रान्तिसिद्धस्य बाधे दृष्टान्तमाह—

मिथ्याज्ञानाज्जीवभेदप्रसिद्धौ
सम्यग्ज्ञानाद्बाध एवाभ्युपेयः ।
मिथ्याज्ञानाद्रज्जुसर्पः प्रसिद्धः
सम्यग्ज्ञानात्तस्य बाधोऽपि सिद्धः ॥ १५१ ॥

मिथ्याज्ञानादिति । सम्यग्ज्ञानात् रज्जुतत्त्वज्ञानात् ॥ १५१ ॥

यत्पुनरुक्तं प्रतिबिम्बकल्पवपुषामित्यादिना जीवेश्वरयोरंशांशित्वमिति तत्तु तृतीयाध्याये निराकरिष्यते । यत्पुनर्मण्डनादिमतं विक्षेपसंस्कारभ्रमलक्षणैवाविद्येति तदसत् । सुषुप्त्यादौ भ्रमाभावात् संस्कारस्य च रजतादिसंस्कारवत् तत्त्वप्रकाशप्रतिबन्धकत्वायोगादहमज्ञ इत्यज्ञानानुभवविषयत्वायोगाच्च । यत्तु समुच्चयेन मुक्तिरिति तन्मतं तत्तु प्रथमाध्याये निराकृतं निराकरिष्यते च तस्मादाद्यपक्षद्वयमन्त्यपक्षद्वयं चानुपपन्नमिति सिद्धम् । यत्पुनर्मतान्तरं ब्रह्माश्रितमेकमेवाज्ञानं पुरुषभेदेन स्थितिनाशाभ्यां बन्धमोक्षव्यवस्थाहेतुरिति तद्दूषयति—

एकोपाधावेकवस्तुप्रसिद्धौ
भावाभावौ नेक्षितौ क्वापि लोके ।
पक्ष्यादीनामस्तिता नास्तिता च
व्योम्न्येकस्मिन्नप्यवच्छिन्न एव ॥ १५२ ॥

एकोपाधाविति । एकस्मिन्नधिकरणेऽवच्छिन्नप्रदेशभेदशून्ये एकवस्तुप्रबन्धावेकवस्तुसम्बन्धिनौ नेक्षितौ न दृष्टौ । लोके हि निरवयवे एकत्र वस्तुन्येकस्य वस्तुनो भावाभावौ एकदा न क्वापि दृश्येते । तथा च निरवयवब्रह्माश्रितस्याज्ञानस्यैकस्य एकं प्रति निवृत्तौ सर्वस्यापि

निवृत्तिः अन्यं प्रति तदनिवृत्तौ वा मुक्तस्यापि तदनिवृत्तिप्रसङ्गः । यत्पुनरत्र तेन दृष्टान्ततयोक्तमाकाशे विहगतदभावौ दृष्टाविति तदप्यसंप्रतिपत्त्या दूषयति—पक्ष्यादीनामिति । अस्तिता सद्भावः नास्तिता अभावः पक्ष्यादिसद्भावाभावौ चैकस्मिन्ननवच्छिन्ने व्योम्नि न किन्तु व्यवच्छिन्ने केन चिदवच्छिन्न एवेत्यर्थः ॥ १५२ ॥

ननु किमवच्छेदक उपाधिः सर्वगतः उत परिच्छिन्नः आद्ये तदुपहितवृत्ती पक्ष्यपि सर्वत्रोपलभ्येत । द्वितीये अवच्छेदकोपाधितदभावौ केवले गगने वर्त्तेते उतोपहिते । आद्ये पक्षितदभावयोरेव तथात्वमस्तु किमनुपलभ्यमानोपाधिकल्पनया द्वितीये किन्तेनैवोपाधिनावच्छिन्ने उत पाध्यन्तरेण । आद्ये आत्माश्रयः स्यादित्यभिप्रेत्याशङ्कते—

सोऽवच्छेदोऽप्यस्ति नास्त्यम्बरे च
त्तत्रान्वेष्यः सोऽप्यवच्छिन्नभावः ।
सोऽवच्छेदोऽप्यस्ति नास्त्यम्बरे चेद्
वाढं तस्मिन्सोऽप्यवच्छिन्न एव ॥ १५३ ॥

सोऽवच्छेद इति । द्वितीयमादाय परिहरति—तत्रेति । आकाशे कोऽप्यवच्छिन्नभावः येन केनाप्यवच्छिन्नमित्यर्थः । ननु तदुपाधिसद्भावाभावौ पूर्वोपाध्यवच्छिन्ने वर्त्तेते उतोपाध्यन्तरेण आद्येऽन्योन्याश्रयः स्यादित्यभिप्रेत्याशङ्कते—सोऽवच्छेदोपीति । द्वितीयमादाय परिहरति—वाढमिति । वाढमित्यनेनावच्छिन्ने वृत्तिरङ्गीकृता । अन्योऽन्याश्रयदोषस्य तस्मिन्नित्यादिना परिहारः । तस्मिन्नाकाशे कोप्यवच्छिन्नभावः अन्वेष्य इत्यनुषङ्गः । ननु तदुपाधिसद्भावाभावावपि किं प्रथमोपाध्यवच्छिन्ने वर्तेते उतान्येन चतुर्थादिना । आद्ये चक्रकापत्तिः स्यादित्याशङ्क्य द्वितीयपक्षमादाय परिहरति—सोपीति । सः—तृतीयोपाधिः अवच्छिन्ने चतुर्थादिनेति शेषः ॥ १५३ ॥

एवं सत्यनवस्था स्यादिति शङ्कते—

नन्वेवं स्यादुर्निवाराऽनवस्था
वाढं का नो हानिरिष्टैव साऽपि।
कर्मोद्भूतं नः शरीरं शरीरा-
त्कर्मोद्भूतिस्तत्र किं नेष्यते सा ॥ १५४ ॥

नन्वेवमिति। एकत्र भावाभावयोर्वृत्त्यनुपपत्तेः। वृत्तौ वा तदुपजीविनो विरोधमात्रस्य दत्तजलाञ्जलित्वप्रसङ्गादनवस्थाया न दोषत्वमित्यभिप्रेत्यानवस्थामङ्गीकरोति—वाढं का नो हानिरिति। नचैवं सति कुत्राप्यनवस्थाया दोषत्वन्न स्यादिति शङ्कनीयं प्रामाणिकाप्रामाणिकत्वेन व्यवस्थोपपत्तेरित्यर्थः। न केवलमस्माभिरेवैवमुच्यते किन्तु सर्वैरपि प्रामाणिकयनवस्थाङ्गीकृतैवेत्याह—इष्टैवेति। सा प्रामाणिकयनवस्था कुत्रेष्टेत्याशङ्क्योदाहरणं दर्शयति—कर्मोद्भूतमिति। नः शरीरं कर्मोद्भूतं शरीराच्च कर्मोद्भूतिः। तत्रैवं सति साऽनवस्था। एतदुक्तं भवति। अस्माकं हि शरीरमस्मद्भोगहेतुत्वेनास्मत्कर्मोपार्जितमिति सर्वैर्वक्तव्यम्। कर्म चास्मच्छरीरारब्धमेवास्मदीयं सदस्मद्देहारम्भकं भवति। तत्र चात्माश्रयादिदोषपरिहाराय तत्तद्देहानां तत्तत्कर्मणां च पूर्वपूर्वतत्तत्कर्मारब्धदेहारब्धत्वेऽनवस्था भवति। सा च प्रामाणिकत्वादेव यथा न दोषाय एवमवच्छेदपरम्परापीत्यर्थः। न चावच्छेदकान्तरस्यात्रानुपलम्भः। सावित्रप्रकाशतदवयवानामेव सत्वादिति भावः। एतच्च परमीत्योक्तम्। वस्तुतस्तु गगनस्य निरवयवत्वमेवासम्मतं पञ्चीकृतत्वेन सावयवत्वादिति द्रष्टव्यम् ॥ १५४ ॥

एवमेकत्रैकस्य वस्तुनो भावाभावावनुपपन्नाविति ब्रह्मण्यज्ञान-

तदभावौ न सम्भवत इत्युक्तमिदानीं प्रमाणाभावाच्च नाज्ञानतदभावौ ब्रह्मणि सिध्यत इत्यभिप्रेत्याह—

किञ्चाज्ञानं ब्रह्मणोऽप्यस्ति नास्ती
त्येतत्कस्मात्त्वं विजानासि हेतोः।
मूढोऽस्मीति प्रत्ययादस्ति बुद्धि-
र्मुक्ते दाहान्मोहनास्तित्वबुद्धिः ॥ १५५ ॥

किञ्चेति। कस्माद्धेतोः साधकान्न कस्मादपीत्यर्थः। पृष्टं मत्वोत्तरमाह—मूढ इति। अस्तिबुद्धिः अस्तितावुद्धिः दाहान्निवृत्तेः शुकादिमुक्तयनन्तरमपि ब्रह्मविषयाज्ञानस्यामुक्तेन मूढोहमित्यनुभवात् मुक्तेन चाज्ञानस्य निवृत्ततया तदभावानुभावात् न विद्वदविद्वत्प्रत्यक्षमेव तत्र प्रमाणमित्यर्थः ॥ १५५ ॥

मुक्तामुक्तभेदस्यैवाद्याप्यसिद्धत्वात् न तदनुभवाभ्यामज्ञानस्य भावाभावौ सिद्धयत इत्यभिप्रेत्य मुक्तामुक्तभेदाङ्गीकारेप्यमुक्तत्वेन त्वया मूढोहमित्यज्ञानस्यानुभूयमानत्वात् तत्सद्भावोस्तु मुक्तेऽज्ञानं नष्टमित्येतत्कथं त्वया ऽवगतमिति पृच्छति—

मुक्तेऽज्ञानं दग्धमित्येतदेवं
कस्माद्धेतोर्वेत्सि तत्कथ्यतां नः।
मिथ्याज्ञानात्स्वप्रकाशात्प्रमाणा-
न्मुक्तेऽज्ञानं दग्धमित्यस्य सिद्धिः ॥ १५६ ॥

मुक्तेऽज्ञानमिति। अज्ञानमिति च्छेदः। किं शब्दसूचितान् विकल्पान्दर्शयति—मिथ्याज्ञानादिति। मुक्तेऽज्ञानं नष्टमित्यस्य ज्ञानं किं प्रमाणात् भवति। उत मिथ्याज्ञानात्। उत स्वप्रकाशादिति विकल्पक्रमो द्रष्टव्यः ॥ १५६ ॥

त्रिष्वपि क्रमेण दूषणमाह—

सम्यग्ज्ञानान्मुक्तिसिद्धिर्यदीष्टा
नूनं मुक्तः कुड्यवत्ते जडः स्यात्।
मिथ्याज्ञानान्मुक्तिसिद्धिर्यदीष्टा
स्रक्सर्पादिर्मुख्य एवैष मुक्तः॥ १५७॥

मुक्तो मह्यं स्वप्रकाशश्चकास्ती-
त्येषा वाणी स्वानुभूत्या विरुद्धा।
न ह्यश्रुत्वा शास्त्रमेतन्मनुष्यः
कश्चिज्जानात्येष मुक्तः शुकादिः॥ १५८॥

सम्यग्ज्ञानादित्यादिना विरुद्धेत्यन्तेन। मुक्तेऽज्ञानं नष्टमित्यस्य प्रमाणादिगम्यत्वे विशेषणीभूतमुक्तस्यापि प्रमाणादिगम्यत्वं वक्तव्यम्। तथा च तस्य प्रमाणागम्यत्वे जाड्यं भ्रान्तिगम्यत्वे स्रक्सर्पतुल्यत्वं स्वप्रकाशगम्यत्वे स्वानुभवविरोधः। अन्यस्यान्यं प्रति स्वप्रकाशत्वानुपपत्तेरित्यर्थः। अनुभवविरोधमेव स्पष्टयति—नह्यश्रुत्वेति। शुकादिर्मुक्त इत्येतच्छास्त्रं शुकादिमुक्तिप्रतिपादकशास्त्रमश्रुत्वा कश्चिज्जानाति न हीति सम्बन्धः। तथा च मुक्तः स्वप्रकाश इत्येतदनुभवविरुद्धमित्यर्थः। तस्मात्तत्तृतीयपक्षोपि न साधुरिति सिद्धम्॥ १५७॥॥ १५८॥

यत्पुनरन्यन्मतमन्तःकरणोपाधिद्वारा ब्रह्मण्यज्ञानमन्तःकरणानां चानेकत्वात् बन्धमुक्तिव्यवस्थेति तद्दूषयितुमनुभाषते—

तात्स्थ्येनोपाधिमादाय मोह-
श्चैतन्येऽस्मिन्स्वप्रकाशे प्रविष्टः।

तेनेह स्याद्बन्धमोक्षव्यवस्थे
त्युक्तं यत्प्राग्दूषणं तस्य विद्धि ॥ १५९ ॥

ताटस्थ्येनेति । तास्थ्येनाश्रयस्वरूपानुप्रविष्टतयोपाधिमन्तः करण-लक्षणम्,पतेनोपाधिभेदेन। इह अस्मिन्पक्षे जीवेष्विति वा तन्मतमनूद्य तत्र दूषणं प्रतिजानीते दूषणमिति ॥ १५९ ॥

तस्य मतस्य दूषणमेवाह—

ताटस्थ्येनोपाधिरङ्गं यदि स्या-
न्मोहाविष्टे ब्रह्मणि स्वप्रकाशे ।
अग्निक्षेपस्योल्मुकं यद्वदेवं
मोहस्य स्यान्न प्रदेशस्थितत्वम् ॥ १६० ॥

ताटस्थ्येनोपाधिरङ्गमिति । अङ्गं द्वारं मोहाविष्टे मोहप्रवेशेऽग्निक्षेपस्य प्रहादावग्निप्रवेशस्य यद्वदग्निक्षेपस्योल्मुकं ताटस्थ्येनाङ्गमेवं स्वप्रकाशे ब्रह्मणि मोहाविष्टे उपाधिस्ताटस्थ्येनाङ्गं यदि स्यादिति सम्बन्धः । अन्तः करणद्वारा ब्रह्मण्यज्ञानमिति कोऽर्थः—किमन्तः करणोपहित इति किंवान्तः करणसम्बन्धिनीति । नाद्यः । अन्तःकरणस्याल्पत्वेन तदुपहितचैतन्यस्यापि परिच्छिन्नतया तन्मात्राश्रितादेकस्मादज्ञानात्सर्वेषां संसारानुपपत्तेः । द्वितीये तु न देशवृत्तित्वं तथा चैकस्मिन्नेव भावाभावौ स्यातामित्यर्थः ॥ १६० ॥

प्रवेशद्वारीभूतस्याश्रयप्रदेशनियामकत्वाभावे दृष्टान्तमाह—

अग्निः क्षिप्तो ह्युल्मुकेन प्रदेश-
मात्रव्याप्तिं वर्जयित्वा समस्तम् ।

वेश्म व्याप्नोत्येवमेवेह कृत्स्नं
ब्रह्म व्याप्नोत्याधिनाऽस्तं तमोऽपि ॥ १६१ ॥

अग्निरिति । आधिना- उपाधिना क्षिप्तः अस्तः प्रवेशित इति यावत् । यथा वेश्मादावुल्मकेन प्रक्षिप्तोऽग्निर्नोल्मुकसम्बन्धप्रवेशमात्रं व्याप्नोति किन्तु सर्वमेव वेश्म तद्वदन्तः करणोपाधिना ब्रह्मणि प्रविष्टो मोहः तत्सम्बन्धप्रदेशमेव न व्याप्नोति किन्तु समस्तमपि ब्रह्म तथा चैकत्रैव भावाभावयोर्वक्तव्यत्वात् । तयोश्च निर्द्धारमयोगात् ? चतुर्थोऽप्यनुपपन्न इत्यर्थः ॥ १६१ ॥

यः पञ्चमः पक्षः अज्ञानस्यैकस्यैवांशभेदेन नाशानाशाविति सोपि नाज्ञानस्यांशभेदाभावात् "मुक्तेऽज्ञानं नष्टम्" इत्यत्र साधकानिरूपणेन तृतीयपक्षोक्तदोषानुषङ्गाच्चेत्युपेक्षितं तन्मतम् । तस्मान्मुक्तादिभेदस्य प्रमाणिकत्वासंभवात् सत्यज्ञानानन्दानन्तात्मकं ब्रह्मैव स्वाश्रयानाद्यनिर्वचनीयया विद्ययैकधाजीवभावमापद्य त्वद्रूपेण स्थित्वा स्वाज्ञानकल्पितान्मुक्तादिजीवभेदान् स्वप्न इव पश्यति । अतो न त्वत्तोऽन्यः कश्चिज्जीवोस्ति तथा च न बन्धमुक्तिव्यवस्थानिरूपणायासेन मनः खेदनीयमित्यभिप्रेत्योपसंहरति—

तस्माद्ब्रह्माविद्यया जीवभावं
प्राप्याऽऽसित्वा तावके तु स्वरूपे ।
त्वच्चित्तेन स्पन्दितं जीवजात-
माकाशादि क्ष्मावसानं च पश्येत् ॥ १६२ ॥

तस्माद्ब्रह्मेति । तस्मान्मुक्तामुक्तादिभेदस्य प्रामाणिकस्य वक्तुमशक्यत्वात् तावके त्वदीये स्वरूपे आसित्वा स्थित्वा त्वद्रूपेण

स्थित्वेत्यर्थः । त्वच्चित्तेन त्वदज्ञानेन चेत्यपि द्रष्टव्यम् । त्वंपदं शिष्यवाचि । स्पन्दितं कलितं पश्येत् पश्य ॥ १६२ ॥

ननु सर्वस्यापि जीवजातस्य शिष्याविद्याकल्पितत्वे आचार्याभावाद्विद्यायाश्चाचार्यवानित्यादिनाचार्यहेतुकत्वश्रवणाद्विद्याप्राप्तिः शिष्यस्य न स्यादित्याशङ्क्य विद्यायामाचार्यमात्रस्यैवापेक्षितत्वात्कल्पिताचार्यस्य च तत्रापि सत्त्वात् तस्यापि वेदादिवद्विद्याहेतुत्वसंभवाच्छिष्यस्य विद्यावाप्तिर्भवत्येवेत्याह—

स्वीयाविद्याकाल्पिताचार्यवेद-
न्यायादिभ्यो जायते तस्य विद्या।
विद्याजन्मध्वस्तमोहस्य तस्य
स्वीये रूपेऽवस्थितिः स्वप्रकाशे ॥ १६३ ॥

स्वीयेति । वेदादयस्तु दृष्टान्ततयोपाताः न्यायो युक्तिः आदिपदेन निदिध्यासनादिकं गृह्यते । ननु विद्या जायतां न हि तावता पुरुषार्थः तस्याः सुखदुःखावाप्तिपरिहारयोरन्यतरत्वाभावादित्यत्राह-विद्याजन्मेति । विद्योत्पत्तिमत्रेण ध्वस्तो मोहो यस्य शिष्यस्य स तथोक्तः ॥ १६३ ॥

एवं सत्यादिस्वरूपब्रह्माश्रयविषयमेवाज्ञानं तच्चैकमेव तद्विलास एव सर्वोपि प्रपञ्च इत्युक्तम् । इदानीमाचार्यग्रन्थेषु क्वचित् कस्याविद्या यस्त्वं पृच्छति तस्य तवेति वदाम इत्यादिना जीवाश्रितमज्ञानमिति प्रतीयते । तद्विरुद्धमिदमज्ञानस्य ब्रह्माश्रयत्वकथनमित्याशङ्क्याचार्यवचनस्याभिप्रायं दर्शयति—

अज्ञानि ब्रह्म जीवो भवति भवति च स्पष्टमज्ञानमस्य
प्रागस्यष्टं सदन्तः करणनिपतितज्योतिराभासयोगात् ।

चैतन्यैकप्रतिष्ठं स्फुरति न हि तमस्तादृशं यादृशं तद्बुद्धिस्थाभासनिष्ठं स्फुरति तदुचितं जीवमौढ्याभिधानम् ॥ १६४ ॥

अज्ञानि ब्रह्मेति। अज्ञान्यज्ञानाश्रयः अस्य जीवस्य प्रागन्तःकरणसम्बन्धात्प्राक्सुषुप्त्यादौ अस्पष्टमहमज्ञ इति व्यवहारानर्हेऽन्तःकरणनिपतितज्योतिराभासयोगात् अन्तःकरणे प्रतिबिम्बितं यत्ज्योतिश्चैतन्यं तस्य य आभासो व्याप्तिः तद्योगादन्तःकरणगतो यो ज्योतिराभासः चैतन्याभासः तत्सम्बन्धादिति वा ब्रह्मैव ह्यज्ञानाश्रयः स्वाज्ञानोपाधिना जीवो भवति। तस्यैव चान्तःकरणमपि स्पष्टव्यवहारहेतुत्वात् जीवत्वोपाधिरुच्यते। अज्ञानं च निर्विकल्पकचैतन्याश्रितं सुषुप्तिमूर्छादौ स्पष्टमनवभासमानं स्वावभाससाक्षिणः सविकल्पकान्तःकरणप्रतिफलने सति तेन चैतन्याभासेनाहमज्ञ इत्येवमादिरूपेण स्पष्टममभासत इति लोकप्रतीत्यनुरोधेनैव भाष्यकारो जीवाश्रितमज्ञानमित्यूचे न तु ब्रह्माश्रयत्वनिराकरणाभिप्रायेणेत्यर्थः। अज्ञानाश्रयस्य ब्रह्मण एवाज्ञानद्वारा जीवत्वात्तस्यैवान्तःकरणे प्रतिबिम्बितत्वात् तवेत्युक्तिरपि संगच्छते इत्यभिप्रेत्योक्तमज्ञानि ब्रह्म जीवो भवतीति। अज्ञानस्यान्तःकरणसन्निधाने सत्येव स्पष्टतां व्यतिरेकमुखेन द्रढयति—चैतन्येति। चैतन्यैकप्रतिष्ठं चैतन्यमात्राश्रितं तत्तमः बुद्धिस्थाभासनिष्ठं बुद्धिप्रतिफलितचैन्याभाससम्बद्धं सत् स्फुरति न तथाचैतन्यमात्रनिष्ठं तस्माज्जीवमौढ्याभिधानं जीवस्याज्ञानित्वाभिधानं भाष्यकारस्योचितमेवेत्यर्थः ॥ १६४ ॥

ननु यद्यज्ञानं निर्विकल्पकचैतन्यमात्रनिष्ठतयाऽस्पष्टं सत् सविकल्पान्तःकरणकार्यसम्बन्धात् स्पष्टं प्रतीयते तर्हि घटादेरपि सविकल्पकत्वात्तदवच्छिन्नप्रदेशेप्यन्तःकरणचैतन्याभासोपरागं

विनाऽज्ञानानुभवः किं न स्यादतो नूनमेवं ज्ञायते भाष्यकृद्वचनस्य जीवाश्रयत्वमेवेति चेत्तत्राह—

अज्ञानं जडशक्तिमात्रवपुषा जीवाद्बहिः सिद्ध्यति
जीवारूढमहं न जान इति तु ज्ञानापनोद्यात्मना।
संसिद्धिं प्रतिपद्यते तदुचितं जीवाज्ञताभाषितं
द्वैरूप्ये सति रूप्यमेकमनिशं भात्येवमन्यन्न हि ॥ १६५ ॥

अज्ञानमिति । जडशक्तिमात्रवपुषा जाड्याकारेणेत्यर्थः । जीवाद्बहिर्घटादौ जीवारूढं जीवस्य स्पष्टव्यवहारोपाध्यन्तःकरणगतचैतन्याभाससम्बद्धं तदज्ञानं ज्ञानापनोद्यात्मना ज्ञानविरुद्धाकारेणाऽज्ञानस्य ह्याकारद्वयमेको जडशक्त्यात्माऽपरोक्षाज्ञानविरुद्धत्वलक्षणः तत्र ज्ञानविरुद्धत्वलक्षणस्य न घटादौ प्रतीते प्रसङ्गः ज्ञानसमानाश्रयत्वेनैवाज्ञानस्य ज्ञानविरुद्धत्वाद्घटादीनां च ज्ञानाश्रयत्वाभावादितरस्त्वाकारो घटादावपि प्रतीयत एव घटादिनिष्ठजाड्यानुभवस्य तदुपादानाज्ञानविषयत्वात् सकलकार्यानुयायि जाड्यस्याज्ञानव्यतिरिक्तत्वे प्रमाणाभावात् । तथा च घटादावप्यज्ञानानुभवसद्भावान्नानुपपत्तिरित्यर्थः । ननु जीवस्यैवाज्ञत्वं वक्तुमयुक्तं घटादेरप्यज्ञानवत्त्वादित्याशङ्क्योभयत्राप्यज्ञानसम्बन्धविशेषेऽप्यहमज्ञ इत्येवं ज्ञानापनोद्यात्मना जीव एवाज्ञानस्य स्पष्टं प्रतीयमानत्वात् । घटादेश्च ज्ञानाश्रयत्वाभावेन तेन रूपेण तत्राप्रतीयमानत्वात् । जाड्याकारस्य च विलम्बेनैवाज्ञानरूपत्वस्य प्रतीयमानत्वात् । लौकिकानुभवविरोधेन युक्तैव जीवस्याज्ञताभाषितुमित्याह—तदुचितामिति । तत्तस्मात्तच्छब्दार्थमेवाह-द्वैरूप्ये सति ज्ञानविरुद्धत्वजाड्यलक्षणद्वैरूप्ये सत्येकरूपं ज्ञानविरुद्धत्वलक्षणं जीवे भाति । अविलम्बेन भाति । अन्यज्जाड्यलक्षणं रूपम् । एवं ज्ञानापनोदनरूपवदविलम्बेन न भाति । जाड्यस्य

प्रथमं घटादिधर्मत्वेनैव प्रतीयमानत्वादनन्तरमेवानुगतकारणाज्ञानजाड्यरूपत्वानुसधानादित्यर्थः । हि यतः ॥ १६५ ॥

अज्ञानस्योक्तरूपद्वये प्रमाणमप्यस्तीति दर्शयितुमादौ जडशक्तिरूपे प्रमाणमाह—

जडशक्तिमात्रवपुषा गगन-
श्वसनादिकार्यजननी भवति ।
पुरुषोत्तमस्य वशवर्तितया
प्रकृतिः परस्य जगदेकगुरोः ॥ १६६ ॥

जडशक्तिमात्रेति । जडशक्तिप्राधान्येनेत्यर्थः । श्वसनो वायुः आदिपदेन तेज आदिकं गृह्यते । कार्यजननीत्युक्तं निमित्तकारणमिति शङ्का स्यात् तदर्थमाह—प्रकृतिरिति । गगनादीनामुपादानभूता माया तथा च माया कार्यगगनादिव्यक्तेर्जडरूपत्वात्तत्कारणमपि जडं भवतीत्यनुमीयत इत्यर्थः । एतादृशमायायाः पराभिमतप्रधानत्वं बारयति जगदेकगुरोः परस्य पुरुषोत्तमस्य वशवर्तितयेति । जगतः सूत्रादिपुत्तिकान्तस्यानित्यप्रपञ्चस्यैकगुरुः एककारणं तस्याव्याकृतमप्येतादृशमिति विशिनष्टि—परस्येति । कार्यकारणाभ्यां परस्येत्यर्थः । तथा चाविद्यायाः परमाधीनतयैव जगत्प्रकृतित्वात् न पराभितप्रधानत्वमित्यर्थः ॥ १६६ ॥

इदानीं ज्ञानपर्युदासात्मकरूपवत्वे प्रमाणमाह—

इयमेव सर्वजननी प्रकृति-
र्वशिनी शरीरिणमिमं पुरुषम् ।

अधिरुह्य जीवमहमज्ञ इति
स्फुरणैकगोचरवपुः स्फुरति ॥ १६७ ॥

इयमेवेति । इयं जडात्मिका वशिनी जीववशीकरिणी इदं च मायाया जीवस्य स्वरूपावारकत्वे हेतुः । शरीरिणं स्थूलदेहावच्छिन्नं पुरुषं पुरि शेत इति व्युत्पया लिङ्गशरीरावच्छिन्नमिमं जीवमधिरुह्याश्रित्य परमात्मैवाज्ञाने प्रतिफलितः जीवभावमापन्नः पुनः स्पष्टोपाधिभूतेऽन्तःकरणे प्रतिफलति पुनः स्पष्टतमोपाधिभूते स्थूलशरीर इति कृत्वा जीवाश्रितत्वमज्ञानस्य स्फुरणैकगोचरवपुः जीवस्य स्वरूपभूतं यत्स्फुरणं साक्षि तदेकगोचरः तन्मात्रविषयः वपुःस्वरूपं यस्याः सा तथोक्ता । तथा चाज्ञानस्य प्रमातरि जीवे तत्स्वरूपब्रह्माच्छादकतया अहं न जानामीति स्पष्टमेवानुभूयमानत्वात् ज्ञानापनोद्यत्वलक्षणं रूपमपि सिद्धतीत्यर्थः ॥ १६७ ॥

ननु चैतन्यमेकमज्ञानमप्येकं तथा च कथमेकस्यैवाज्ञानस्यैकमेव चैतन्यं प्रति स्वातन्त्र्यास्वातन्त्र्ये इत्याङ्क्याह—

चितिशक्तिबाधितवपुः परमं
पुरुषं प्रति स्फुरति सा प्रकृतिः ।
चितिशक्तिबाधकवपुः पुरुषं
पुरवर्तिनं प्रति पुनः स्फुरति ॥ १६८ ॥

चितिशक्तीति । चितेः स्वरूपचैतन्यस्य या शक्तिर्महिमा तया बाधितं मिथ्यात्वेन निश्चितं वपुः स्वरूपं यस्याः सा तथोक्ता परमं पुरुषमुपाध्यनन्तर्भूतमीश्वरं चितिशक्तिबाधकवपुः स्वरूपमहिमावारकस्वरूपा पुरुषं जीवं पुरवर्तिनं शरीरत्रयमध्यवर्तिनं यद्यप्यज्ञान-

मेकं चैतन्यमपि वस्तुत एकं तथापि सत्त्वगुणप्रधानाज्ञानप्रतिबिम्बत्वेनेश्वरस्यानावृतज्ञानत्वात् जीवस्य च तद्विपरीतरूपत्वात् एकस्यैवाज्ञानस्यौपाधिकभेदभिन्नौ तौ प्रत्यज्ञानस्य पारतन्त्र्यापारतन्त्र्ये युज्येते इत्यर्थः ॥ १६८ ॥

नन्वज्ञानस्यैव चैतन्यं प्रति स्वातन्त्र्यास्वातन्त्र्ये इत्यनुपपन्नं स्वाश्रयाव्यामोहकत्वलक्षणमायायाः स्वाश्रयव्यामोहकत्वलक्षणाविद्यायाश्च भेदेनैव तदुपपत्तेरित्याशङ्क्य मायाविद्ययोरभेदस्य प्रमाणसिद्धत्वान्नैवमित्यभिप्रेत्यानुमानं प्रमाणमाह—

दृश्यत्वजाड्यपरतन्त्रचिदाश्रयत्वै-
र्मायेश्वरस्य तम आत्मतयानुमेया ।
स्वप्नप्रपञ्चरजतभ्रमलिङ्गदेह-
दिक्चन्द्रविभ्रममरीचिजलोपमानैः ॥ १६९ ॥

दृश्यत्वेति । स्वव्यवहारे स्वातिरिक्तदर्शनापेक्षत्वं दृश्यत्वमनात्मप्रकाशत्वं जडत्वं नियमेन परप्रयोज्यतया व्यवहारजनकत्वं परतन्त्रत्वं चैतन्याश्रितत्वं चिदाश्रयत्वं तैः । अनेन हेतुनिर्देशः । तम आत्मतयाऽविद्यात्मतयाऽविद्याऽभिन्नत्वेनेति यावत् । अनेन साध्यं द्योतितं स्वप्नप्रपञ्चेत्यादिना दृष्टान्तनिर्देशः । लिङ्गदेहोऽन्तःकरणं दिग्भ्रमश्चन्द्रभ्रमश्चेति भ्रमपदमुभयत्रापि सम्बध्यते । चन्द्रद्वित्वभ्रम इत्यर्थः । उपमानशब्दो दृष्टान्तपरः । अत्रायं प्रयोगः । ईश्वराश्रिता माया अज्ञानाभिन्ना दृश्यत्वाज्जडत्वात् परतन्त्रत्वात् चिदाश्रयत्वाद्वा स्वप्नप्रपञ्चादिवत् । न च दृष्टान्ताः साध्यविकलाः कार्यकारणयोरभेदेनाविद्याभिन्नत्वोपपत्तेः । नच घटादौ व्यभिचारः तस्यापि माया कार्यत्वे पक्षतुल्यत्वात् । अविद्याकार्यत्वे च साध्यसंभवात् माया-

याश्चाविद्याकार्यत्वासंभवात् अविद्यात्मत्वेनैव साध्यं पर्यवस्यतीति। अथवा अनादिकारणत्वे सत्यज्ञानभिन्नत्वाभावः साध्यत्वेन विवक्षितः हेतूदाहरणे पूर्ववदेव। दृष्टान्तेऽनादिकारणत्वलक्षणविशेषणाभावात् साध्यवैकल्याभावः। पक्षे त्वज्ञानभिन्नत्वलक्षणविशेष्याभावमादायैव साध्यं पर्यवस्यति। न च तन्त्वादौ व्यभिचारः। तस्यानादित्वाभावेन विशेषणाभावसंभवात् विशिष्टाभावोपपत्तेः। न च जीवत्वादौ व्यभिचारः। तस्य कारणत्वाभावेन विशेषणाभावसंभवाद्विशिष्टाभावोपपत्तेरिति। न च दृश्यत्वहेतुर्ब्रह्मणि व्यभिचरति तस्यापि ब्रह्मेत्यादिव्यवहारे स्वातिरिक्तवृत्त्यपेक्षत्वादिति शङ्क्यं वृत्तेरदर्शनत्वात्। नचाद्यहेतुद्वयं स्वरूपासिद्धं मायाया ईश्वरेच्छारूपत्वेनेच्छायाश्च स्वसत्तायामप्रकाशविधुरतया स्वप्रकाशत्वेन दृश्यत्वादेरभावादिति वाच्यम्। न हि स्वसत्तायामप्रकाशविधुरत्वमात्रेण स्वप्रकाशत्वं तथात्वे दुःखादेरपि तत्प्रसङ्गात्। अस्त्विति चेत्तत्र किं दुःखादेः स्वसत्तायामप्रकाशविधुरत्वं स्वातिरिक्तप्रकाशाधीनमुत स्वरूपाधीनम्। आद्ये स्वप्रकाशत्वं परिभाषिकमेव स्यात्। न द्वितीयः। तस्य प्रकाशस्वरूपज्ञानाद्भिन्नत्वात्। तत्स्वरूपमपि प्रकाशात्मकमिति चेन्न। अनुभवं विनाऽस्माकं तदनुभवात्। प्रकाशस्वरूपमेवानुभवेनानुभूयत इति चेन्न। अनुभवातिरिक्तप्रकाशकल्पनावैयर्थ्यप्रसङ्गात्। घटादेरपि तत्त्वापाताच्च। तस्मान्मायायां स्वव्यवहारे स्वातिरिक्तदर्शनापेक्षत्वानात्मप्रकाशत्वयोर्नासिद्धिरितिभावः ॥ १६६ ॥

नन्वज्ञानस्यानेकत्वात् मायायाश्चैकत्वात् कथं तयोर्विरुद्धधर्मिणोरैक्यमित्याशङ्क्याज्ञानस्याप्येकत्वान्नैवमित्यभिप्रेत्य सकलस्यापि जगत एकाज्ञानकार्यत्वं साधयति—

एकाज्ञानविकल्पितं सकलमेवाऽऽकाशपूर्वं जग-
द्बाध्यत्वादिह यद्यदीदृशमदस्तादृङ्मतं स्वप्नवत्।

बाध्यं चेदमभीप्सितं भवति वस्तस्मादिदं तादृशं
शुद्धं धूमवदेव साधनमिदं तत्पाञ्चरूप्यान्वयात् ॥१७०॥

एकाज्ञानेति। सकलमाकाशपूर्वकं जगदिति पक्षनिर्देशः। भूतभौतिकसकलकार्यप्रपञ्च इत्यर्थः। एकाज्ञानविकल्पितमिति साध्यनिर्देशः एकपदमर्थान्तरतानिराकरणार्थं बाध्यत्वात् स्वविपरीताकारज्ञाननिवर्त्यत्वादिति हेतुनिर्देशः इह लोके यद्यदीदृशं बाध्यमदः तत्तादृगेकाज्ञानविकल्पितं स्वप्नवदेकपुरुषदृश्यमानस्वप्नवदिति दृष्टान्तनिर्देशः। न च हेतोरपक्षधर्मता तथा विद्वान्नामरूपाद्विमुक्त इत्यादिना प्रपञ्चस्य ज्ञानबाध्यत्वसिद्धेरित्यभिप्रेत्याह—बाध्यं चेदमिति। इदं जागद्बाध्यं ज्ञाननिवर्त्यमिति वानेकाज्ञानवादिनां च संमतमिति सम्बन्धः। अनेनोपनयनिर्देशः। तस्माद्बाध्यत्वादिदं जगत्तादृशमेकाज्ञानविकल्पितमिति निगमनिर्देशः। नचायं हेतुराभासः धूमादिवत्पञ्चरूपोपपन्नत्वादित्याह—शुद्धमिति। इदं बाध्यत्वलक्षणं साधनं धूमवत् शुद्धमसिद्धादिदोषपञ्चकरहितमेव तत्पाञ्चरूप्यान्वयात् धूमस्येव तस्य हेतोः पक्षधर्मत्वादिसद्भावात्। न चाप्रयोजकः। अज्ञानभेदे प्रमाणाभावगौरवलक्षणस्य तदेकत्वे लाघवलक्षणस्य च तर्कस्य विद्यमानत्वात्। तथा हि न तावदज्ञानभेदेऽनुभवः प्रमाणं तदभावात्। नन्वनुभूयते प्रतिजीवमज्ञ इत्यज्ञानभेद इतिचेन्न। अनेकव्यक्तिवृत्तिसामान्यवत्तदेकत्वेपि तदुपपत्तेः। ननु घटादिज्ञानेन तदज्ञाननिवृत्तावपि पटादिविषयाज्ञानं कालान्तरे तद्घटादिविषयं चाज्ञानमनुभूयते। न च तदज्ञानैकत्वे सम्भवति। न च घटादिज्ञानेन तदज्ञानं न निवृत्तमेवेति वाच्यम्। ज्ञानाज्ञानयोर्विरोधेन तन्निवृत्त्यवश्यम्भावात्। अन्यथा—ब्रह्मज्ञानादपि तदनिवृत्तिप्रसङ्गात्। अतो ज्ञाननाशान्यथानुपपत्तिरेव तद्भेदे प्रमाणमिति चेन्न। विरोधो हि ज्ञानाज्ञानयोः समानाश्रयसमानविषययोरेव वक्तव्यः। अन्यथाऽतिप्रसङ्गात्।

नचाज्ञानस्य घटाश्रयविषयत्वं तदवच्छिन्नचैतन्याश्रयविषयत्वं वैकाज्ञानवादिनाभ्युपगम्यते । येन तद्विषयज्ञानेन विरुद्धयेत । किन्तु-प्रत्यङ्मात्राश्रयविषयत्वमेव । नचैवं सत्यज्ञानकार्यरजतादेः शुक्ति-संसर्गावगमो न स्यात् तत्राज्ञानाभावादिति वाच्यम् । सर्वविभ्रमाणां चैतन्यमात्राश्रितत्वेन तत्संसर्गावभासस्यापि विभ्रमत्वात् । नचैवं सति घटादिनिष्ठत्वेनापि रजतादिप्रत्ययः स्यात् । घटादेरपि शुक्तीदंत्वादिवद्रजतादिना सहैकचैतन्याधिकरणत्वादिति वाच्यम् । सादृश्यस्यैव रजताद्याकारप्रतीतिनियामकत्वात् । न च सादृश्यस्य रजताद्युत्पत्तिमात्रे एवापेक्षितत्वादसार्वत्रिकत्वाच्च नाधारविशेष-निष्ठतया प्रतीतिनियामकत्वमिति वाच्यम् । शुक्ताद्यग्रहणं हि रजताद्युत्पत्तौ ज्ञप्तौ चान्वयव्यतिरेकसिद्धतयापेक्ष्यते । ततश्च यदग्रहणाधीनोत्पत्तिज्ञप्तिकं यत्तत्तन्निष्ठत्वेन प्रत्येतव्यमित्यनुभवानुगुण्येनाग्रहणनियामकस्येव । नचैवं सति घटादीनां नियमेन मृन्निष्ठतावगमो न स्यात् । तेषां मृदाद्यग्रहणाधीनज्ञप्त्युत्पत्तिकत्वाभावादिति वाच्यम् तेषामपि वास्तवनिर्विकारमृद्ग्रहणाधीनोत्पत्तिज्ञप्तिकत्वात् वाचारम्भणमित्यादिना घटादेः रजतस्य शुक्तिमात्रस्वरूपवन्निर्विकार-मृन्मात्रस्वरूपत्वप्रतिपादनात् रजतस्यैव घटाद्याकारस्यानिर्वचनीयत्वप्रतिपादनाच्च । नन्वेवमपि घटाद्यवच्छिन्नचैतन्यस्याज्ञानानावृतत्वेन तद्वलाद्घटादेर्नित्यवत्प्रकाशः स्यादिति चेत्किं ब्रह्मणो घटादि प्रकाशो नित्यवत् स्यादित्यापाद्यते । उत जीवस्य । नाद्यः । इष्टत्वात् । न हि सर्वज्ञस्य ब्रह्मणः तदापादनीयम् । न द्वितीयः । जीवस्य तेन सम्बन्धाभावात् । ननु जीवस्य स्वप्रकाशचैतन्यरूपस्य सर्वव्यापिनः कथं न तेन सम्बन्धः न हि सम्भवति गगनेनासंसृष्टो घट इति चेन्न । आत्मा हि स्वतोऽसङ्गस्वभावतया न केनचित्संयुज्यते । किन्त्वविद्याविषयत्वमापन्न एव तत्तदाकारेण विवर्त्तमानस्तेन तेन सम्बध्यते । जगद्विवर्त्तनं चात्मनो ब्रह्माकारेणैव न जीवाकारेणेति न तस्य

स्वतो नात्मसम्बन्धः कथं तर्हि सम्बध्नातीति चेत् । तत्तदाकारान्तः करणवृत्तिद्वारेणेति गृहाण । न चासङ्गे आत्मा कथमन्तःकरणेनापि सम्बध्यत इति वाच्यम् । अविद्यायाः इवान्तःकरणस्याप्यतीव स्वच्छतया विषयस्वभावात्तेन सम्बन्धोपपत्तेः । दृश्यते हि सर्वगतायाऽपि जातेर्व्यक्तिमात्रसम्बन्धित्वम् । न चैवं सति ब्रह्मज्ञानादज्ञाननिवृत्तिर्दृष्टिबलान्न कल्प्येतेति वाच्यम् । ज्ञानस्य स्वविरोधिसंशयादिनिवर्त्तकत्वदर्शनेन ज्ञानस्यापि ज्ञानविरुद्धत्वेन तन्निवर्त्यत्वकल्पनोपपत्तेः । सन्तु वाऽनाद्यनन्ता अविद्यावस्थाः ताश्चाविद्यावच्छिन्नचैतन्यनिष्ठास्तत्कार्यघटादिनापि मृदाद्यवच्छिन्न इवाकाशो घटादिनावच्छिद्यन्ते ततः सर्वोपि व्यवहारः सङ्गच्छते । नचैवमनेकाज्ञानवादादविशेषापत्तिः स्वतन्त्रानेकाज्ञानानङ्गीकारात् । तेह्यात्ममात्राध्यस्तानि स्वतन्त्राण्यनेकाज्ञानानि स्वीकुर्वते । अस्माभिस्तु मूलाज्ञानावच्छिन्नचैतान्याध्यस्ततया तत्परतन्त्रा एवावस्थाः स्वीक्रियन्त इति विशेषः । तस्माल्लाघवानुगृहीताज्ञानानुभवबलेनाज्ञानस्यैकत्वात् मायायाश्चैकत्वादुभयोरेकत्वमविरुद्धमित्यर्थः ॥ १७० ॥

ननु "माया चाविद्या च स्वयमेव भवति" "इन्द्रो मायाभिः पुरुरूप ईयत" इत्यादौ मायाज्ञानयोर्भेदेन निर्देशादज्ञानबहुत्वस्याप्यवगमात् । अनुमानान्यागमबाधितविषयाणीत्याशङ्कते—

अनुमानमागमविरुद्धमिदं
प्रतिवादिनो यदि मतं तदसत् ।
न तमोऽतिरिच्य जगतो जनक-
प्रतिपादकं वचनमस्ति यतः ॥ १७१ ॥

अनुमानमिति । मायाविद्यैकत्वानुमानमविद्यैकत्वानुमानं चागमः

माया चाविद्येत्यादिभिः पूर्वोक्तं दूषयति—तदसदिति । तत्र हेतुमाह—न तम इति । यस्मात्कारणादज्ञानस्यैकस्य जगत्कारणत्वप्रतिपादकवचनं विहायान्यस्य तत्प्रतिवादकं वचनं नास्ति । ततो नागमविरोध इत्यर्थः । न चैकत्वे भेदेन निर्देशानुपपत्तिः । एकस्यैव देवदत्तस्य पितृपुत्रादिभावेनेव विक्षेपावरणलक्षणाकारभेदेन पृथग्निर्देशोपपत्तेः न च बहुवचनानुपपत्तिः । कार्यापेक्षयावस्थापेक्षया वोपपत्तेरिति भावः ॥ १७१ ॥

नन्वज्ञानं करणादिदोषक्षुब्धमेव रूप्यादिविभ्रमकारणं दृष्टम् तथा चाज्ञानस्य जगत्कारणत्वे क्षोभकदोषो वक्तव्यः । न च स प्रेक्ष्यते । अतो मायैव जगद्धेतुर्नाज्ञानमिति तयोरस्ति भेद इत्याशङ्क्य क्वचिदृष्टबलादन्यत्रापि तदापादने मायापि लोके मन्त्रौषधादिक्षोभकमपेक्ष्यैव गजादिभ्रमोपादानमिति जगन्मूलमायायामपि तत्प्रसज्ज्येत । लौकिकमायायां क्षोभकान्तरापेक्षायामपि जगन्निदानमायायां न तदपेक्षा तस्या अदृष्टेश्वरमात्र संक्षोभ्यत्वादित्येतदज्ञानेऽपि तुल्यं न वा लोकेऽप्यज्ञानस्या सर्वत्र क्षोभककरणदोषाद्यपेक्षा संविद्यनित्यत्वादिभ्रमे तदभावादिति पूर्वोक्तं स्मारयति—

विषयकरणदोषान्न भ्रमः संविदि स्या
दपि तु भवति मोहात्केवलादेवमेव ।
भगवति परमात्मन्यद्वितीये समस्त
द्वयमतिरियमस्तु भ्रान्तिरज्ञानहेतुः ॥ १७२ ॥

विषयेति । उक्तार्थः श्लोकः ॥ १७२ ॥

एवमज्ञानस्यैकत्वं मायायाश्च तदभिन्नत्वं तत्प्रतिबिम्बलक्षणश्च जीवभावो ब्रह्मणः गुरुशिष्यादिभेदश्चाविद्याकल्पितः न परमार्थिक

इत्येवमाद्युक्तमिदानीं ब्रह्मण एव जीवत्वे तस्य नित्यमुक्ततयाऽहं कर्त्ता दुःखीत्यादिप्रतीयमानसांसारिकधर्माश्रयत्वन्न स्यादित्याशङ्क्य किं जीवस्य तदाश्रयत्वे तदभिन्नब्रह्मणोपि तत्प्रसङ्गात्तन्न स्यादित्युच्यते। किं वा ब्रह्मणः सर्वज्ञनित्यमुक्तत्वात्तदात्मकजीवस्यापि तत्त्वमिति तत्प्रतीतिर्न स्यादित्युच्यते । नोभयथापि वस्तुतोऽभेदेपि शुद्धाशुद्धोपाधिभेदेन भेदात् । बिम्बप्रतिबिम्बभावेनापि प्रतिबिम्बबिम्बधर्माणामन्यत्रापि कल्पितभेदेनावदातत्वश्यामत्वादीनामसांकर्येण स्थितत्वेनात्रापि सर्वज्ञत्वदुःखित्वादीनां व्यवस्थोपपत्तेरित्यभिप्रेत्य परिहरति—

अज्ञानिनो भवति दुखमनेन कल्पं
सर्वेश्वरस्य न खलु प्रतिभासतोऽपि ।
सर्वज्ञतादिगुणजातममुष्य नास्य
संसरिणः स्फुरति मोहसमन्वितस्य ॥ १७३ ॥

अज्ञानिन इति । तमसाज्ञानप्रतिबिम्बस्य जीवस्यानेनोपाधिभूताज्ञानेन सर्वेश्वरस्य विशुद्धसत्वोपाधिकस्य दुःखं प्रतिभासतोपि नेत्यनेन जीवस्यापि दुःखं प्रतीतित एव न वस्तुत इति सूचितम् । सर्वज्ञतादीत्यादिपदेन सर्वशक्तिमत्वसर्वनियन्तृत्वानन्तकल्याणगुणवत्वादिकं गृह्यते । अमुष्येश्वरस्यास्य जीवस्य सर्वज्ञत्वादिकं नेत्यत्र हेतुमाह—मोहेति । तामसाज्ञानावृतस्येत्यर्थः ॥ १७३ ॥

पूर्वं चैतन्यमात्राश्रयविषयमज्ञानमित्यत्र भाष्यकारवचनविरोधः परिहृतः । इदानीमन्येषामपि सिद्धान्तकर्तॄणां प्राचामाचार्याणां वचनस्याज्ञानस्य जीवाश्रयत्वविषयस्योक्तरीत्यैव तात्पर्यं कल्पयित्वा विरोधः परिहरणीय इत्याह—

जीवन्मुक्तिगतो यदाह भगवान्सत्संप्रदायप्रभु-
र्जीवाज्ञानवचस्तदीदृगुचितं पूर्वापरालोचनात् ।
अन्यत्रापि तथा बहुश्रुतवचः पूर्वापरालोचना-
न्नेतव्यं परिहृत्य मण्डनवचस्तज्ज्यन्यथा प्रस्थितम् ॥१७४॥

जीवन्मुक्तिगत इति । जीवन्मुक्तिप्रकरणे प्रवृत्तः यज्जीवाज्ञानवच आहेति सम्बन्धः तदीयवचनस्याविरोधनयने बीजमाह—सत्संप्रदायेति । तज्जीवाश्रिताज्ञानप्रतिपादकवचः ईदृक्स्पष्टप्रतीत्यपेक्षयेत्यस्मदुक्त-प्रकारमन्यत्रापि ग्रन्थान्तरेपि तथा यथा जीवन्मुक्तिकारवचन मीदृगुचितम् । तथाऽन्येषां बहुश्रुतानां वचोपि पूर्वापरपर्यालोचन-येदृक् नेतव्यम् । तर्हि मण्डनस्य जीवाज्ञानवचनमप्येवञ्नेतव्यं नेत्याह—परिहृत्येति । तत्र हेतुमाह—तद्धीति । तन्मण्डनवचः हि यतः अन्यथा प्राकारान्तरेण प्रस्तुतं प्रस्थितं भिन्नप्रस्थाननिष्ठमिति यावत् । न हि भिन्नप्रस्थानान्तरवचनविरोधः परिहरणीय इति भावः ॥ १७४॥

एवं बृहदारण्यकभाष्यगतमपि जीवाज्ञानविषयं वचनमुक्तरीत्या योज्यमित्याह—

जीवस्य कार्यकारणाधिपतेरविद्या-
दोषान्वितस्य तमसाऽऽवृतमन्धदृष्टेः ।
ज्ञानं निरावरणमैश्वरमित्यपीदं
भाष्यान्तरं कथितनीतिवशेन योज्यम् ॥१७५॥

जीवस्येति । कार्यकरणाधिपतेः कार्ये स्थूलदेहः करणानीन्द्रियाणि लिङ्गदेह इति यावत् । तयोरधिपतिः तन्नियन्ता दोषान्वितस्य रागा-

दियुक्तस्य तमसावृतमूढदृष्टेः तमसाज्ञानेनावृता अत एव मूढा स्वस्वरूपविषया दृष्टिर्ज्ञानं यस्य स तथोक्तः। अनेन जीवस्याविद्यावत्त्वे प्रत्यक्षं प्रमाणमुक्तम्। कार्यकारणाधिपतेरिति स्पष्टजीवोपाधिकीर्तनम्। अविद्याविशिष्टः कार्यकरणोपाधिरात्मा जीव इति बृहदारण्यकभाष्यवचनमविद्याशब्दस्य कार्याविद्यापरत्वमादाय वा स्पष्टप्रतीत्यपेक्षया वा अविरोधेन नेयमित्यर्थः। यत्पुनर्भाष्यकारीयमेव वचनान्तरं नित्यनिरतिशयज्ञानशक्त्यात्मेश्वर इत्यादिकमीश्वरस्याविद्यावरणशून्यज्ञानस्वरूपत्वप्रतिपादकं तदपीश्वरस्याविद्याबाधकसत्वात् स्पष्टप्रतीत्यभावाद्वा कार्याविद्याभावाद्वाविरोधेन नेयमित्याह—ज्ञानमिति। निरावरणमविद्याख्यावरणशून्यं ऐश्वरं ईश्वरसम्बन्ध्युक्तविशेषणविशिष्टं जीवस्याविद्येतीदं भाष्याक्षरं मैश्वरं ज्ञानं निरावरणमितीदमपि भाष्याक्षरमिति सम्बन्ध इदञ्चार्थतोऽनुकरणं नीतिर्न्यायः॥ १७५॥

उक्तन्यायमेव दर्शयन् प्रसङ्गादीश्वरस्वरूपमपि दर्शयति—

स्पष्टं तमः स्फुरणमत्र न तत्र तद्-
त्सर्वेश्वरे तदिति तत्र निषिद्ध्यते तत्।
बिम्बे तमोनिपतिते प्रतिबिम्बके वा
देहद्वयावरणवर्जितचित्स्वरूपे॥ १७६॥

स्पष्टं तम इति। अत्र जीवे तत्र सर्वेश्वर इति सम्बन्धः। तद्वज्जीव इव तत्तमः स्फुरणं तत्रेश्वरे तत्तमः स्फुरणम्, ईश्वरस्वरूपमेवाह—बिम्ब इति। निखिलोपाधिविवर्जिते परमात्मस्वरूपे, व्यावहारिकेश्वरस्वरूपमाह—तमो निपतित इति। तमसि विशुद्धसत्त्वप्रधानेऽज्ञाने निपतितेऽनुप्रविष्टतया प्रतीयमाने बिम्बभूतचैतन्यं वेश्वरः सत्त्वप्रधा-

नायां मायायां प्रतिबिम्बतचैतन्यं वोभयत्रापि जीव इव स्पष्टं तमः स्फुरणाभावात्तमो नास्तीति निषिध्यत इत्यर्थः। तत्र हेतुः देहद्वयावरणवर्जितचित्स्वरूप इति। स्थूलसूक्ष्मदेहद्वयस्याज्ञानप्रयुक्तावरणस्य चेश्वरेऽभावान्न स्पष्टमज्ञानस्फुरणमित्यर्थः ॥ १७६ ॥

यत्पुनर्जीवस्य किञ्चिज्ज्ञत्वमीश्वरस्य सर्वज्ञत्वं चेत्येवंरूपार्थप्रतिपादकं भाष्यवचनं तदज्ञानस्य चैतन्यमात्राश्रयविषयत्व एव संगच्छते। जीवाश्रयत्वपक्षे त्वीश्वरस्य सर्वाकारज्ञानपरिणामासंभवात् सर्वज्ञत्वं न स्यादित्यभिप्रेत्याह—

किंञ्चिज्ज्ञताऽस्य तमसावृतनित्यदृष्टेः
सर्वज्ञता पुनरमुष्य परस्य पुंसः।
अज्ञानतज्जकरणादिविवर्जितत्वा-
दित्येतदेवमुपपन्नतरं हि भाष्यम् ॥ १७७ ॥

किंञ्चिज्ज्ञतेति। अस्य जीवस्य तमसावृतनित्यदृष्टेः अज्ञानेनावृतनित्यस्वरूपचैतन्यस्य, इदं च किञ्चिज्ज्ञत्वे हेतुः। परमपुरुषस्य भगवतः सर्वज्ञत्वे हेतुमाह—अज्ञानेति। आवारकाज्ञानविवर्जितत्वात् अज्ञानानावृतस्वरूपत्वादित्यर्थः। हेत्वन्तरमप्याह—तज्जकरणादिविवर्जितत्वादिति। ईश्वरस्य हि विषयप्रकाशने व्यवधायकदेहाद्यभावेन करणसंप्रयोगादेरनपेक्षितत्वान्न तत्क्रमप्रयुक्तो ज्ञानक्रमः। अतो युगपत्सर्वविषयज्ञातृत्वलक्षणं सर्वज्ञत्वं सम्भवतीत्यर्थः। उक्तविशेषणविशिष्टस्य जीवस्य किञ्चिज्ज्ञतापरस्योक्तहेतोः सर्वज्ञतेत्येतद्भाष्यमेवास्मदुक्तप्रकारेणावृतत्वानावृतत्वादिव्यवस्थयोपपन्नतरमित्यर्थः ॥ १७७ ॥

ननु चैतन्यमात्रस्याज्ञानाश्रयत्वे जीववदीश्वरस्याप्यहमज्ञ इति प्रतीतिः किं न स्यादित्याशङ्क्य तादृशप्रतीतेरन्तःकरणसम्बन्धनिमि-

त्तकत्वादीश्वरस्य च तदभावात् सर्वज्ञत्वकिञ्चिज्ज्ञत्वादिवद्व्यवस्थोपपत्तेर्मैवमित्यभिप्रेत्याह—

अज्ञोऽहमित्यवगतिर्न परस्य पुंसः
सर्वज्ञतावगतिरात्मनि नास्य पुंसः ।
अत्रापि कारणमहंकृतिवर्जितत्वं
तद्बुत्तया च परमेऽल्पतरे च पुंसि ॥ १७८ ॥

अज्ञोऽहमिति । सर्वज्ञतावगतिरिति दृष्टान्तार्थम् । आत्मनि—स्वस्मिन् अस्य-जीवस्योभयत्रापि बीजमाह—अत्रापीति । ईश्वरस्याहमज्ञ इत्यवगत्यभावे जीवस्य च सर्वज्ञत्वाभावे चाहंकृतिवर्जितत्वमन्तःकरणासम्बद्धत्वं तद्बद्धताहंकृतिसम्बन्धता परमे पुंसि ईश्वरेऽल्पतरे पुंसि जीवे ईश्वरेऽहंकृतिविवर्जितत्वमज्ञोऽहमित्यभिमानाभावे हेतुः यथा जीवे तत्सम्बद्धत्वं सर्वज्ञत्वाभावे हेतुरिति भावः । यथा जीवस्याहंकारतादात्म्यापन्नत्वात्सर्वज्ञत्वाभावादहंकारस्याल्पत्वेन तदुपाधिकस्य स्वस्याप्यल्पतया सर्वसम्बन्धाभावात् तथेश्वरस्यापि-परिच्छिन्नान्तः करणतादात्म्याभावान्नाहमज्ञ इति परिच्छेदाभिमान इत्यर्थः ॥ १७८ ॥

नन्वीश्वरस्याप्यवतारेष्वहमज्ञो बद्धो दुःखीत्याद्यभिमानः स्मर्यत इति चेत्सत्यम् । न हि सोऽभिमानो जीवस्येवाहंकारपारतन्त्र्यनिमितः ईश्वरेण विभूत्यध्याये स्वस्य सर्वात्मतयाविष्करणात् स्वातन्त्र्याविष्करणाच्च किन्तु स्वेच्छोपात्तशरीरसम्बन्धित्वाभिनयप्रयुक्त एव अतः पारतन्त्र्यापादकाहंकृतिसम्बन्धो भगवतो नास्तीत्याह—

बिम्बस्य नापि तमसि प्रतिबिम्बकस्य
संघट्टनं क्वचिदहंकरणेन शक्यम् ।

वक्तुं प्रभोः सकललोकहितावतार-
स्वेच्छाविनिर्मितवपुर्वरमन्तरेण ॥ १७९ ॥

बिम्बस्येति । बिम्बभूतस्यापि सत्त्वप्रधानाज्ञाने प्रतिबिम्बभूतस्यापि प्रभोरीश्वरस्य सकललोकहितावतारस्वेच्छाविनिर्मितवपुर्वरमन्तरेण सकललोकहिताय योऽवतारः स्पष्टाविर्भावस्तदर्थं यत्स्वेच्छाविनिर्मितवपुस्तद्विषयो यो वरस्तं विना ब्रह्मादिप्रार्थनात्तवपुर्वरः वपुः श्रेष्ठस्तं विनेति वा । अहंकरणेन पारतन्त्र्यापादकाहंकारेण संघट्टनसम्बन्धो वक्तुं न शक्यत इत्यर्थः ॥ १७९ ॥

ननु माभूदीश्वरस्याहंकृतियोगः अज्ञानावृतिस्तु किन्न स्यात् न हि कार्याभावः कारणाभावप्रयोजक इति चेत् तत्र किमीश्वरस्याज्ञानावृतत्वं तदनुभवात्कल्प्यते, उताहमभिमानाख्यकार्येण, अथवा पुण्यापुण्यलक्षणकर्मणा, अथवा शरीरसम्बन्धेन, नाद्यः, जीवस्येव परस्यान्तःकरणसम्बन्धाभावेनाहमज्ञ इत्यनुभवाभावात् । न द्वितीय इत्याह—

नाहंकृतिं च परिहृत्य तमस्विताधीः
सम्भाव्यतेऽपहतपाप्मनि नित्यमुक्ते ।
तामन्तरेण घटते न च मूढभाव-
सम्भावनाऽपि परमेशितरि प्रसन्ने ॥ १८० ॥

नाहंकृतिमिति । अहमभिमानं परिहृत्य विहाय तमस्विताधीः अज्ञानित्वबुद्धिरहमज्ञ इत्यहमभिमानपूर्वको ह्यज्ञानित्वाभिमानो वक्तव्यः । तत्र यद्यहंकृतिसम्बन्धो न स्यात्कथं तत्पूर्वकाज्ञानित्वाभिमानः स्यादित्यर्थः । तृतीयं दूषयति—अपहतपाप्मनीति । पाप्मशब्देनानर्थहेतुत्वेन

पुण्यमपि लक्ष्यते। तदुक्तम् "ब्रह्मादीनां शरीराणि श्वसूकरशरीरवत्। यतो जिहासितान्येव तस्माद्धर्मेऽपि पाप्मगीरि"ति। अपहतो निराकृतः पाप्मा यस्य स तथोक्तः पुण्यपापरहित इति यावत्। तत्र हेतुः—नित्यमुक्त इति। सदाकर्तृत्वादिरहिते कर्तुरेव हि कर्म भवति। तथाचेश्वरस्याकर्तृतया कर्मसम्बन्धाभावान्न तेनाप्यज्ञानावृतत्वं सम्भवतीत्यर्थः। अज्ञानावृतत्वाभावादेव मिथ्याज्ञानलक्षणमोहोपि नास्तीत्याह—तामन्तरेणेति। तामतमस्वितां प्रसन्ने निर्मूले "अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तव" इतीश्वरवचनादज्ञानावृतत्वाभावे तत्कार्यमोहोपीश्वरस्य न सम्भवतीत्यर्थः॥ १८०॥

चतुर्थं दूषयति—

स्वेच्छाविर्निमितवपुर्भजतोऽपि तस्य
नाज्ञानिताघगतिरस्ति वशित्वहेतोः।
वश्यत्वहेतुकमिदं स्फुरणं नराणां
नाहं विजान इति नास्ति तदीश्वरस्य॥१८१॥

स्वेच्छेति। स्वेच्छासृष्टशरीरसम्बन्धेपि तस्य भगवतः नाज्ञानिता भवति। नाज्ञानावृतत्ववुद्धिरित्यर्थः। तत्र हेतुः—वशित्वहेतोरिति। सर्वस्य वशीत्यादिनेश्वरस्य सर्ववशित्वेन सिद्धत्वान्नाज्ञानावृतत्वमित्यर्थः। ईश्वरः अज्ञानावृतो न भवति तद्वशित्वात्प्रसिद्धमायाविवद्धयतिरेकेण जीववद्धेत्यनुमानमिह विवक्षितम्। अस्यानुमानस्याप्रयोजकत्वमुद्धरति—वश्यत्वहेतुकमिति। नराणां जीवानां नाहं जान इत्यज्ञानावृतत्वस्फुरणं वश्यत्वहेतुकमज्ञानादिपरवशत्वहेतुकं न शरीरसम्बन्धमात्रहेतुकं तस्यान्यथापि सिद्धत्वात्। तच्चाज्ञानादपि परवशत्वमीश्वरस्य नास्ति ततस्तस्य न शरीरसम्बन्धमात्रेणाज्ञानित्वमित्यर्थः॥ १८१॥

नन्वीश्वरेपि श्रीरघुनायके अहमज्ञ इति अज्ञानावृतत्वानुभवोनुस्मर्यत इत्याशङ्क्य सकललोकहितावतारेत्युक्तार्थं प्रपञ्चयति—

संकल्पपूर्वकमभूद्रघुनन्दनस्य
नाहं विजान इति कञ्चनकालमेतत् ।
ब्रह्मोपदेशमुपलभ्य निमित्तमात्रं
तच्चोत्ससर्ज स कृते सति देवकार्ये ॥१८२॥

संकल्पपूर्वकमिति । एतदज्ञानावृतत्वं भक्तवत्सलस्य भगवतो भक्तभृगुशापपरिपालनाय संकल्पपूर्वकमेव कञ्चित्कालमहन्न जाने इत्यज्ञानावृतत्वाभिमानोऽभूत् न तु जीववदज्ञानपारतन्त्र्यात् न च संकल्पपूर्वं कृतस्य स्वातन्त्र्यविघातकत्वं सम्भवति मायिकव्याघादावदर्शनादित्यर्थः । ननु प्रसिद्धजीवाज्ञानवत्तन्निष्ठाज्ञानस्याप्यौपदेशिकविद्यानिवर्त्यत्वस्मरणात्कथं न तत्पराधीनत्वं तस्येत्याशङ्क्याह—ब्रह्मोपदेशमिति । ब्रह्मणा चतुर्मुखेन कृत उपदेशः ब्रह्मोपदेशः स्वस्य ब्रह्मत्वोपदेशो वा तदज्ञानावृतत्वं सः श्रीरघुनायकः ब्रह्मोपदेशो हि लोके नटनामनुसरतो भगवतोऽज्ञानविसर्जने निमित्तमात्रं स्वतन्त्र एव सन् स्वशरीरमिव निर्वृत्ते देवकार्ये अज्ञानं विससर्ज ततो न तत् पराधीनत्वं तस्येत्यर्थः ॥ १८२ ॥

तस्माच्चैतन्यमात्राश्रयविषयमज्ञानमिति पक्षे ईश्वरस्याज्ञानावृतत्वाभावात् निरावरणज्ञानत्वाच्च जीवस्य च तदावृतत्वात् सावरणज्ञानत्वाच्च सर्वज्ञत्वकिञ्चिज्ज्ञत्वनित्यमुक्तत्वसंसारित्वादीनां व्यवस्था युक्तेत्युक्तोपपादनं स्मारयितुमुपसंहरति—

अज्ञानवर्जिततया परमेश्वरोऽसौ
सर्वज्ञ एव यदहंकृतिबन्धहीनः ।

ज्ञानं निरावरणमिष्टमसुष्य यस्मा-
ज्जीवस्य सावरणमेव यतोऽनभिज्ञः ॥ १८३ ॥

अज्ञानेति । जीववन्नाहं जान इत्यावरणज्ञानवर्जितत्वादित्यर्थः । तत्र हेतुमाह—यदीति । यस्मात्कारणादहंकृतिबन्धहीनः अहंकरण-सम्बन्धवर्जितः तस्मात्कारणान्नाहं जान इत्यज्ञानविवर्जितत्वा-दित्यर्थः । जीवस्य चाहंकरणसम्बद्धतया नाहं जान इत्यावरणाज्ञान-सत्त्वात्किञ्चिज्ज्ञत्वमेवेत्यर्थः । तयोः सर्वज्ञत्वतदभावे हेत्वन्तरमप्याह—ज्ञानमिति । अमुष्येश्वरस्य ज्ञानं निरावरणं विषयव्यवधानशून्यं जीवस्य ज्ञानं सावरणं विषयव्यवधानसहितं यतः अतोपि ईश्वरः सर्वज्ञः जीवोऽनभिज्ञः असर्वज्ञ इत्यर्थः ॥ १८३ ॥

जीवेश्वरज्ञानयोः सावरणत्वनिरावरणत्वे उपपादयति—

सर्वप्रमाणफलभूतसमस्तसंवि-
ज्जातं बिभर्ति परमः पुरुषो न जीवः ।
ज्ञानं निरावरणमैश्वरमस्तु तस्मा-
ज्जैवं च सावरणमस्य विशेषहेतोः ॥ १८४ ॥

सर्वप्रमाणेति । सर्वप्रमाणानां फलभूताः समस्तवस्तुविषयाः याः संविदः तासां जातं समूहं बिभर्त्ति भरते अस्य जीवस्य विशेषहेतोः समस्तसंविदज्ञानाश्रयत्वलक्षणविशेषाद्धेतोः ईश्वरो हि सर्वोपादा-नतया सर्वप्रमाणफलसर्वविषयज्ञानानामप्युपादानभूतस्तदाश्रयो भवति ततस्तज्ज्ञानं निरावरणमेव जीवस्तु न सर्वोपादान इति न सर्वविषयज्ञानाश्रयः अतोऽस्मादेव विशेषाज्जैवं ज्ञानं विषयव्यवधान-सहितमित्यर्थः ॥ १८४ ॥

निरावरणसावरणत्वे च हेत्वन्तरमाह—

अज्ञानतज्जमखिलं जगदात्मभासा
नित्यं प्रकाशयति सन्निहितः सदात्मा ।
जीवस्तु नैवमिति सावरणं तदीयं
ज्ञानं निरावरणमैश्वरमुच्यते हि ॥ १८५ ॥

अज्ञानेति । आत्मभासा स्वरूपप्रकाशेन सन्निहितः सम्बद्धः नैवमसन्निहितो न प्रकाशयतीत्यर्थः । तदीयं—जैवम्, ईश्वरस्य हि तस्य भासा सर्वमिदं विभातीत्यादिना अज्ञानतत्कार्यलक्षणसमस्तजगदवभासकत्वं श्रूयते न च तत्तस्य समस्तसम्बन्धं विना सम्भवति । अतस्तस्य चैतन्यरूपस्य सर्वोपादानतया सर्वान्तर्यामितया च सर्वसन्निहितत्वात् जीवस्य च सर्वानुपादानतया तदसन्निहितत्वात् जैवं ज्ञानं सावरणं ऐश्वरं च ज्ञानं निरावरणमुच्यत इत्यर्थः ॥ १८६ ॥

ईश्वरस्याज्ञानाश्रयत्वेपि निरावरणज्ञानत्वं सर्वज्ञत्वं चावरणाद्यभावादेव न त्वज्ञानसम्बन्धाभावादित्युक्तेऽर्थे श्रीविष्णुपुराणसम्मतिमाह—

ज्ञानात्मकस्यामलसत्त्वराशे-
रपेतदोषस्य सदा स्फुटस्य ।
किं वा जगत्यत्र समस्तपुंसा-
मज्ञातमस्यास्ति हृदि स्थितस्य ॥ १८६ ॥

ज्ञानात्मकस्येति । अमलसत्त्वराशेरिति । अज्ञानाश्रयस्यैव तस्य तमोगुणप्रयुक्तावरणाभाव उक्तः । अन्यथा सत्वगुणाश्रयत्वस्याप्यनुपपत्तेरि-

त्यर्थः। अपेतदोषस्येति। कर्मादिलक्षणावरणाभाव उक्तः। समस्तपुंसां हृदि स्थितस्येति भूरादिव्यवधानप्रयुक्तावरणाभाव उक्तः। अत्र जगति किमज्ञातमस्ति सर्वं विज्ञातमेवेत्यर्थः॥ १८६॥

ईश्वरस्य मायावित्वप्रतिपादकवचनमपि मायाभिन्नाज्ञानाश्रयस्यैव सतोऽनावरणज्ञानत्वं दर्शयतीत्याह—

मायामसौ वितनुते विभुरेवमेनां
सर्वेश्वरः सततमेव वशीकरोति।
इत्यादिवाक्यमुपपन्नतरं पुराणे
स्वाज्ञानमस्य च वशे विदधीत भावात्॥१८७॥

मायामिति। एवं प्रपञ्चाकारेण वितनुते विस्तारयति। तत्र हेतुमाह—सर्वेश्वर इति। यतोऽसौ सर्वनियन्तृत्वेन मायामपि स्ववशे करोति अतो मायां वितनुत इत्यर्थः। नन्वनेन वाक्येन मायावित्वमेवोच्यते नाज्ञानाश्रयत्वमित्याशङ्क्याज्ञानस्यैव वश्यत्वेन मायाशब्दवाच्यत्वान्नानुपपत्तिरित्याह—स्वाज्ञानमिति। अस्येश्वरस्याज्ञानमीश्वरस्य वशवर्ति यतः अतो मायेत्यर्थः। अज्ञानस्येश्वरवश्यत्वे हेतुमाह—विदधीनभावादिति। स्वसत्तास्फूर्तिप्रदचैतन्येश्वराधीनत्वादित्यर्थः॥ १८७॥

एवं जीवेश्वरयोः किञ्चिज्ज्ञत्वसर्वज्ञत्वादिधर्मव्यवस्थाभिधायिसिद्धान्तग्रन्थगतिमीश्वरस्याज्ञानाश्रयत्वेपि संभवतीत्युपपादितामुपसंहरति—

जीवाज्ञतावचनमेवमिदं समस्तं
सर्वत्र योज्यमितरत्र च तन्निषेधः।

तस्मात्समञ्जसमिदं मतमस्मदीय-
माचार्यवाक्यमुपपन्नतरं हि तत्र ॥ १८८॥

जीवेति। जीवस्य नाहं जान इत्यज्ञानाश्रयत्ववचनमितरत्र ईश्वरे तन्निषेधः अज्ञानाश्रयत्वनिषेधश्च एवमस्मदुक्तप्रकारेण स्पष्टास्पष्ट-प्रतीत्यपेक्षया योज्यम्। फलितं दर्शयति—तस्मादिति। अज्ञानस्य चैतन्य-मात्राश्रयविषयत्वादिलक्षणमस्मदीयमतं तत्रास्मदीये मते ॥ १८८ ॥

न केवलमाचार्यवाक्यमेवास्मन्मतानुसारि किन्तु सकल-वेदान्तवाक्यप्रवृत्तिरप्यस्मन्मतानुसारिणीत्याह—

चैतन्यमेव तु तमस्वि तदप्रबुद्धं
सर्वज्ञमेतदिह विश्वमिमं विभागम्।
जीवेश्वरौ च जगदित्यपि निर्मिमीत
इत्येव वेदशिरसः प्रथितः प्रचारः ॥ १८९ ॥

चैतन्यमेवेति। अखण्डचैतन्यमेवेत्यर्थः। तमस्वि अज्ञानाश्रयः तच्चैतन्यमेवाप्रबुद्धमज्ञानविषयः सर्वज्ञं च तत् अज्ञानाश्रयविषयसर्वज्ञ-चैतन्यम् 'इह स्वस्मिन् विश्वं प्रपञ्चं विभागं विभक्तं निर्मिमीते। विश्वपदार्थं विविच्य दर्शयति—जीवेश्वराविति। जीवेश्वरौ जगदित्यपि विभक्तं विश्वमिति सम्बन्धः। जीवः ईश्वरो जगदित्येवंरूपेण विभक्तं जगन्निर्मिमीत इत्यर्थः। अत्रेश्वरत्वं जीवत्वमेव च निर्मातव्य-त्वेन विवक्षितं न तु जगद्बुद्धिमिद्वयस्वरूपमपि। प्रचारः प्रवृत्तिः। तद्धेदं तर्ह्यव्याकृतमासीत् यस्सर्वज्ञस्सर्ववित् यस्य ज्ञानमयं तपः तस्मा-देतद्ब्रह्मनामरूपमन्नं च जायत इत्यादिवेदान्तवाक्यं परमात्मैवाज्ञाना-श्रयविषयोऽव्याकृतसंज्ञा सैव सर्वज्ञः स एव च जीवेश्वरघटादिरूपेण-

विभक्तं विश्वं निर्मिमीत इत्येवंरूपार्थप्रतिपादकत्वेन प्रवृत्तं तथा च तत्सर्वमस्मन्मत एवोपपद्यत इत्यर्थः ॥ १८९ ॥

नन्वीश्वरस्याप्यज्ञानसम्बन्धित्वे किमिति श्रुतौ स्मृतौ वा न तस्याज्ञानीति व्यपदेशः किमिति वा नियमेन मायावीति व्यपदेशः । तदभेदान्न दोष इति चेत्तर्हि जीवेपि किमिति न मायावित्वव्यपदेशः । ततो नूनं मायाविद्ययोर्भेदो मायैवेश्वराश्रया नाज्ञानमिति च गम्यते । तयैव सर्वज्ञत्वाद्युपपत्तिश्चेत्याशङ्क्यामपाकरोति—

जीवेशानजगद्विभागजननी शक्तिर्जडा वैष्णवी
मायेशानगता सती भवति सा जीवावधिर्मोहगीः ।
जीवानीश्वर एव मोहयति ते जीवा विमुह्यन्त्यतः
शश्वद्विश्वदृगीश्वरो भवति ते जीवा विमूढा मुहुः ॥१९०॥

जीवेशानेति । जीवेश्वरजगद्विभागप्रयोजिका शक्तिः आत्मपरतन्त्रत्वात् वैष्णवी पूर्णचैतन्याश्रयेशानगता सती ईश्वरसम्बन्धिनी सती माया भवति । जीवावधिः जीवसम्बन्धिनी सतो मोहगीः मोहशब्दवाच्या यत्तत्कमज्ञानमाययोर्भेद इति तन्न तस्य निराकृतत्वान्निराकरिष्यमाणत्वाच्च । नचैवं सति नियतव्यपदेशानुपपत्तिः । एकस्याप्यज्ञानस्य स्वतन्त्रपरतन्त्रचैतन्यसम्बन्धेन मायाविद्यालक्षणभेदव्यवदेशोपपत्तेः एकस्मिन्नेव देवदत्ते पितृपुत्रसम्बन्धेन पुत्रत्वपितृत्वलक्षणभेदव्यपदेशवदित्यभिप्रेत्याह—जीवानिति । एष मायावी तथा च मायाविनो मोहयितृत्वे मायया अपि मोहहेतुत्वमिति मायापरतन्त्रत्वात् जीवस्याज्ञानित्वव्यपदेशः । तां प्रति स्वातन्त्र्यादीश्वरस्य मायावित्व व्यपदेश इत्यर्थः । फलितमाह—अत इति । यतो जीवा एव मुह्यन्ति नेश्वरः अतो विश्वदृक् सर्वज्ञः विमूढाः भ्रान्तिसंकुलाः असर्वज्ञा इति ॥ १९० ॥

इदानीमेकस्यैवाज्ञानस्य साधारणासाधारणभ्रान्तिकारणत्वेनापि भेदप्रसिद्धिमुपपादयति—

अज्ञानिनो भवति मोहविजृम्भितं तु-
दुःखं जगज्जनकता परमेश्वरस्य ।
मायामयी भवति तेन विलक्षणत्व-
मेकान्ततः श्रुतिशिरस्सु तयोः प्रसिद्धम् ॥१९१॥

अज्ञानिन इति । अज्ञानावृतस्य जीवस्य मोहविजृम्भितमावारकदुःखात्मकाज्ञानविजृम्भितमज्ञानिनो दुःखमित्यनेनासाधारणभ्रमकारणत्वेनाज्ञानत्वव्यपदेशः समर्थितः जगज्जनकता परमेश्वरस्य मायामयीत्यनेन साधारणभ्रमकारणत्वेन मायावित्वव्यपदेशः समर्थितः जगज्जनकता जगत्कारणत्वं परमेश्वरस्य मायावशकस्य सर्वज्ञस्य मायामयी विक्षेपशक्तिमदज्ञानाधीना जगत्कारणत्वदुःखित्वादिकारणत्वसाधनफलमाह—तेनेति । येन जीवेश्वराश्रितसाधारणासाधारणकार्यहेतुरज्ञानं तेन विलक्षणत्वं भिन्नत्वम् एकान्ततः नियमेनेदं प्रसिद्धमित्यनेनान्वीयते तयोर्जीवेश्वरयोः ॥ १९१ ॥

तस्मादज्ञानस्य चैतन्यमात्राश्रयत्वेपि मायावित्वविमूढत्वादीनां व्यवस्थोपपत्तेराचार्याणां जीवाज्ञत्ववचनमुक्तरीत्या स्पष्टतत्प्रतीत्यभिप्रायेण च वक्तव्यमित्युपसंहरति—

चैतन्यस्याज्ञानशक्तेरनादे-
र्जीवत्वं तु व्यञ्जकं कल्पयन्तः ।
जीवारूढं व्यक्तमज्ञानमाहु-
र्जीवो मूढः कथ्यतेऽतो बहुज्ञैः ॥ १९२ ॥

चैतन्यस्येति । चैतन्यस्य याऽज्ञानरूपा शक्तिः तस्याः जीवत्वं जीवस्वरूपं व्यञ्जकमभिव्यञ्जकमहमज्ञ इत्येवाज्ञानस्य प्रतीतेः । अन्यथा चाप्रतीतेः । जीवत्वमेवाज्ञानाभिव्यञ्जकमिति कल्पयन्तोऽज्ञानं जीवाश्रयमिति वदन्ति लौकिकाः अतः तदनुरोधेनैवाज्ञानं जीवाश्रयमित्याचार्यैरुच्यत इत्यर्थः । तस्मात् चिन्मात्राश्रिताज्ञानादेन जीवेश्वरभेदस्तदाश्रितसर्वज्ञत्वादिकल्पना च न परमार्थत इति सिद्धम् ॥ १९२ ॥

नन्विदं सूत्रविरुद्धं सूत्रकारो हि नेतरोनुपपत्तेः अधिकं तु भेदनिर्देशादित्यादिसूत्रवाक्यैर्जीवपरभेदमेव विवक्षतीत्याशङ्क्य सूत्रकारस्यायं प्रौढिवाद एव वस्तुतस्तस्यापि प्रत्यक्ब्रह्मैक्य एव दृष्टिरित्याह—

अत्रैव वस्तुनि दृढं व्यवतिष्ठमानः
प्रौढिप्रदर्शनपरः पुनरन्यदन्यत् ।
भाषापदं किमपि निक्षिपति स्फुटं त-
दस्माभिरेवमुपपादितमञ्जसैव ॥ १९३ ॥

अत्रैवेति । अस्मदुक्तार्थ एव जीवपरैक्ये दृढं तात्पर्येण व्यवतिष्ठमानः विशेषेण वर्त्तमानः अतिशयेन तात्पर्यवानित्यर्थः । उत्तरश्लोकस्थसूत्रकृत्पदस्यात्रानुषङ्गः अन्यदन्यत् नेतरोऽनुपपत्तेरित्यादिकं भाषापदमुच्चारणविषयं वाक्यं निक्षिपति करोति वदतीत्यर्थः । तदपि सूत्रमस्माभिरुक्तप्रकारेणार्थात् सम्यगुपपादितं भवतीत्याह— स्फुटमिति । तद्भाषापदम् ॥ १९३ ॥

कुत एवं सूत्रकारस्याभिप्रायवर्णनमित्याशङ्क्य तद्वचनबलादेवेत्याह—

विस्पष्टमात्ममतमेव हि सर्वधर्म-
सूत्रेण सूत्रकृदिदं दृढमाचचक्षे ।
सर्वज्ञतादिपरिपालनतत्परः सं-
स्तत्रैव भाष्यकृदपीदमुवाच यत्नात् ॥ १९४ ॥

विस्पष्टमिति । आत्ममतं स्वमतं सर्वधर्मसूत्रेण सर्वधर्मोपपत्तेश्चेति सूत्रेणेदं ब्रह्मात्मैक्यं सर्वज्ञतादिपरिपालनतत्परः सन् सर्वज्ञत्वजगत्कारणत्वादीनामुपपादने तात्पर्यवान् सन् सूत्रकारो हि सर्वधर्मोपपत्तेश्चेति सूत्रेण परमेश्वरस्य जगद्रचनानुकूलान् सर्वज्ञत्वादीन् धर्मान् माययैवोपपादयति । अतस्तस्यास्मदुक्त एवाभिप्राय इत्यर्थः । ननु सूत्रे मायादिपदं न प्रतीमः सत्यं सूचितं हि तत् कथमेवं त्वया ज्ञायते तद्धृदयवेदिसर्वज्ञाचार्यवचनबलादित्याह—अत्रैवेति । अस्मिन्सूत्रे इदं जीवेश्वरविभागसर्वज्ञत्वादेर्मायामयत्वं भाष्यकारो हि वैशिषिकाद्यभिमतजगत्कारणे सर्वज्ञत्वाद्यनुपपत्तिमनुपन्यस्य ब्रह्मणि-तत्कारणे परिगृह्यमाणे सर्वज्ञत्वादिकमुपपद्यते । सर्वज्ञं सर्वशक्ति महामायं च ब्रह्मेति वदन् मायाधीनमेव ब्रह्मणः सर्वज्ञत्वं जगद्भावापत्त्यादिकं दर्शयति । तथा च परमात्माश्रयविषयाज्ञानादेव निखिलजगज्जीवेश्वरविभ्रमस्तज्ज्ञानादेव तद्भ्रमोपादानाविद्यानिवृत्तिरित्यर्थः ॥ १९४ ॥

ननु परमात्मन एवाज्ञानाश्रयत्वे तस्य जीवत्वं स्यात् । न च तद्युज्यते सर्वज्ञत्वाद्यनुपपत्तिप्रसङ्गात् अतो जीवस्यैवाज्ञानाश्रयत्वं वक्तव्यमित्यभिप्रायेण शङ्कते—

अज्ञानित्वं ब्रह्मणो जीवता चे-
न्नाज्ञानित्वं तत्र जीवस्य युक्तम् ।

अज्ञानित्वे चान्यदप्यभ्युपेत-
मज्ञानित्वं यद्यहो कष्टपिष्टिः ॥ १९५ ॥

अज्ञानित्वमिति। यदि ब्रह्मणो अज्ञानाश्रयत्वं तर्हि तस्य जीवतास्यादिति चेदित्यर्थः। अज्ञानं जीवचैतन्याश्रितमिति वदन् प्रष्टव्यः। किं चैतन्यस्य जीवत्वं स्वाभाविकमुतौपाधिकम् नाद्यः। ब्रह्मतादात्म्योपदेशवैयर्थ्यप्रसङ्गात्। द्वितीये किमज्ञानाश्रयत्वं जीवत्वप्रयोजकमित्याश्रित्य ब्रह्मणस्तत्त्वे जीवत्वमापाद्यते। उतान्यदेव जीवत्व प्रयोजकमित्याश्रित्य। नान्त्यः। ब्रह्मणो ज्ञानाश्रयत्वेन जीवत्वापादनानुपपत्तेः। प्रथमेपि किमज्ञानमेकमेव उतानेकं नाद्य इत्याह—नाज्ञानित्वमिति। तत्रैकमेवाज्ञानं तदाश्रयत्वमेव जीवत्वमिति पक्षे जीवस्याप्यज्ञानित्वं न युक्तम्। स्वविशिष्टे स्वस्यासंभवादित्यर्थः। द्वितीयमनूद्य गौरवादिना दूषयति—अज्ञानित्वे चेति। एकाज्ञानेनैव निखिलव्यवहारोपपत्तावनेकाज्ञानकल्पनं कष्टमित्यर्थः ॥ १९५ ॥

किञ्चाज्ञानाश्रयताप्रयोजकजीवत्वोपाधिभूतमज्ञानं कुत्र विद्यत इति विवेचनीयम्। किं जीवे। उत चैतन्यमात्रे। नाद्यः आत्माश्रयात् द्वितीये ब्रह्मण एवाज्ञानित्वमित्यागतमित्याह—

अज्ञानित्वं ब्रह्मणश्चानभीष्ट-
मस्मिन्पक्षे दुर्निवारं प्रसक्तम्।
अज्ञानित्वं ब्रह्मणश्चेदभीष्ट-
मस्मत्पक्षस्त्यज्यते कस्य हेतोः ॥ १९६ ॥

अज्ञानित्वमिति। अनभीष्टं तवासम्मतमस्मिञ्जीवाश्रितमज्ञानमिति पक्षेपीत्यर्थः। अस्मिन्कल्प इति वा। तथा च त्वपक्षेपि ब्रह्मणोऽज्ञानित्वप्रसङ्गेन मत्पक्षपरित्यागे आग्रहः कर्त्तव्य इत्याह—अज्ञानित्वमिति।

कस्य हेतोः कस्माद्धेतोरित्यर्थः ॥ १६६ ॥

नन्वज्ञानि तत्प्रतिबिम्बतचैतन्यमेव जीव इत्युच्यते । तत्र चाज्ञानमुपाधिरेव न विशेषणं येन स्वविशिष्टे स्वस्य वृत्तिप्रसङ्गः। तथाचाज्ञानस्य जीवाश्रयत्वेन ब्रह्माश्रयत्वप्रसङ्गः । नचाज्ञाने सति प्रतिबिम्बतत्वं तस्मिँश्च सति तत्राज्ञानमित्यन्योन्याश्रय इति वाच्यम् । अज्ञानप्रतिबिम्बयोरनादित्वेन तदभावात् । एवञ्च सति ब्रह्मणः शुद्धत्वमपि संरक्षितं भवति । अन्यथा ब्रह्मण एवाज्ञानाश्रयत्वेऽज्ञानदोषेण दूषितत्वात् शुद्धत्वं न स्यादतो ब्रह्मणः शुद्धत्वार्थमेवाज्ञानाश्रयत्वं त्यज्यत इत्याशङ्कामनूद्य दूषयति—

शुद्धत्वार्थं ब्रह्मणस्त्यज्यते चे-
दस्मत्पक्षेऽप्यस्ति शुद्धत्वमस्य ।
अस्मत्पक्षे शुद्धता वास्तवी चे-
द्युष्मत्पक्षे कल्पिता शुद्धता किम् ॥१६७॥

शुद्धत्वार्थमिति । त्यज्यतेऽज्ञानाश्रयत्वं ब्रह्मण इति त्वत्पक्ष इति शेषः । अस्याज्ञानाश्रयस्य ब्रह्मणः अज्ञानलक्षणदोषस्य कल्पितत्वेन वास्तवशुद्धत्वाविरोधित्वान्न शुद्धत्वार्थमस्मत्पक्षत्यागो युक्त इत्यर्थः नन्वेवमपि भवत्पक्षे वस्तुत एव शुद्धिः स्यात्। न प्रतीत्यापीत्यभिप्रायेण शङ्कते—अस्मत्पक्ष इति । ब्रह्मणोऽज्ञानाश्रयत्वमित्यस्मत्पक्षे यथाश्रुतमालम्ब्य गूढाभिसन्धिः परिहरति—युस्मत्पक्ष इति । यदि ब्रह्मणोज्ञानाश्रयत्वे प्रातीतिकाशुद्धिः स्यादित्याद्यते तर्हि त्वत्पक्षेपि ब्रह्मणो जगदुपादानतया तत्प्रयुक्ताशुद्धिः समापाद्याऽरोपितस्योपादानत्वस्य वास्तवः शुद्धव्याहन्तृत्वमित्युच्यते तर्ह्यस्मत्पक्षेपि तुल्यमिति गूढोऽभिसन्धिः । न चाज्ञानप्रतिबिम्बस्य जीवस्याज्ञाना-

श्रयत्वं सम्भवति । उपाधिपरामर्शाधीनस्य प्रतिबिम्बस्य तदाश्रयतया तं प्रति स्वातन्त्र्यानुपपत्तेः प्रतिबिम्बस्य वस्त्वाभासत्वाच्च ॥ १९७ ॥

तस्मादज्ञानोपाधिकजीवाश्रयत्वमज्ञानस्य वदतो वादिनः पक्षोऽत्यन्तक्लिष्टकल्पनत्वात्परित्याज्य एवेत्युपसंहरति —

कष्टः कष्टः कल्पितब्रह्मवादः
श्रेयो मार्गाद् भ्रश्यतो भ्रान्तबुद्धेः ।
त्यक्तव्यस्ते सज्जनैरस्मदीयः
श्रेयोमार्गः श्रेयसे चाभ्युपेयः ॥ १९८ ॥

कष्ट इति । भ्रान्तबुद्धेः अत एव श्रेयोमार्गात् भ्रश्यतः पुरुषार्थमार्गात् प्रच्युतस्य ते त्वया कल्पितब्रह्मवादः स्वकपोलकल्पितब्रह्मवाद इति सम्बन्धः । कष्टः कष्ट इति वीप्सयाऽतिकष्टत्वमुक्तम् । अत एव स पक्षः सज्जनैर्विवेकभिस्त्यक्तव्यः । किञ्चास्मदीयश्रेयोमार्गश्चोपादेयः । किमर्थं श्रेयसे मोक्षाय । तस्माच्चैतन्यमात्राश्रयमेवाज्ञानं तत्प्रयुक्त एव जीवत्वेश्वरत्वे इति भावः ॥ १९८ ॥

नन्वस्तु चैतन्यमात्राश्रयमज्ञानं जीवत्वं च तन्मात्रसम्बन्धप्रयुक्तं तथापि नेश्वरत्वमज्ञानसम्बन्धप्रयुक्तं किन्तु तदभावसम्बन्धप्रयुक्तमेव । नन्वज्ञानाभावोपाधिक ईश्वरः किंब्रह्माण्डात् बहिरेव वर्त्तते । उत तदन्तरमपि । नाद्यः । तस्य ब्रह्माण्डान्तर्वर्तिप्राणिसम्बन्धाभावेनान्तर्यामित्वानुपपत्तेः । न द्वितीयः । ब्रह्माण्डान्तर्वर्तिनः चैतन्यस्याज्ञानसम्बन्धित्वेन तदभावसम्बन्धित्वानुपपत्तेरिति चेन्न । आकाशे एकदा पक्षितदभाववत्ब्रह्माण्डान्तर्वर्तिनि चैतन्येऽज्ञानतदभावसम्बन्धोपपत्तेरित्यभिप्रेत्याशङ्कते—

एकोपाधावस्तिता नास्तिता च
मूढत्वस्य स्वीकृता चेत्परस्मिन् ।
व्योम्न्येकस्मिन्नस्तिता नास्तिता च
पक्ष्यादीनां यद्वदिष्टा तथैव ॥ १९९ ॥

एकोपाधाविति । मूढत्वस्याज्ञानाश्रयत्वस्य अस्तिता सद्भावः नास्तिताऽभावश्च परस्मिन्परमात्मनि एकोपाधावेकाश्रये यद्वत् व्योम्नि पक्ष्यादिभावाभावौ तथैव स्वीकृता चेदिति सम्बन्धः । यद्यप्ययं दृष्टान्तः पूर्वं निराकृत एव तथापि पूर्वमेकाज्ञानवादे बन्धमोक्षव्यवस्थाङ्गत्वेन जीवभेदेन एकत्राज्ञानतदभावयोरेनं दृष्टान्तमुपादाय निराकार । इदानीमज्ञानस्य चिन्मात्राश्रयत्वपक्षेऽज्ञानतदभावाभ्यां जीवब्रह्मविभागेऽयं दृष्टान्त उपादीयत इत्यर्थभेदसत्वाद् दूषणभेदाच्च न पुनरुक्तिरिति द्रष्टव्यम् ॥ १९९ ॥

दूषयति—

नैतत्सारं सत्त्वमिष्टं यदि स्या-
दस्तित्वादेरिष्टहानिः प्रसक्ता ।
एकोपाधावस्तिता नास्तिता चे-
त्स्यादित्येवं स्वीकृतेऽस्मिन्हि पक्षे ॥ २०० ॥

नैतत्सारमिति । अस्तित्वादेः भावाभावयोः सख्यं साहित्यं यदीष्टं स्यात्तदा वक्ष्यमाणप्रकारेणेष्टहानिः स्यादित्यर्थः । नन्वाकाशादौ दृष्टत्वान्नेष्टहानिरिति चेत्तत्र किं सर्वपदार्थानामेकत्र भावाभावौ स्वीक्रियेते उत कस्यचिदिति विकल्प्याद्यं दूषयन्निष्टहानिमेव विशदयति—एकोपाधाविति । अस्तिता नास्तिता च सर्वेषामिति शेषः ।

अस्तिता वृत्तित्वं नास्तिता तदभावः चशब्दः कालभेदेन तदुभयधर्मवत्तानिरासाय युगपद्धर्मद्वयस्वीकारे किं बाधकं तत्राह—एवमिति। एवं युगपदस्मत्पक्षे धर्मद्वयसमुच्चयपक्षे स्वीकृते वक्ष्यमाणदोषः स्यादित्यर्थः ॥ २०० ॥

तमेव दोषं विशदयति—

धूमे सत्ता स्यादसत्ता च तस्मि-
न्धूमस्यैवं कारणं कल्प्यते किम्।
कादाचित्कं कारणं नान्तरेण
स्यादित्येवं तस्य कल्पिः कुतो वः ॥ २०१ ॥

धूमइति। धूमे सत्ता धूमवत्त्वं तदभावश्च स्यात् एवं एवं सति तस्मिन्पक्षे पर्वतादौ धूमसत्तावत् धूमाभावस्यापि सत्त्वात्। धूमेन तस्य कारणं वह्निः किमिति कल्प्येते न कल्प्येतेत्यर्थः। ननु धूमसत्तायाः अपि सत्त्वाद्धूमस्य च कादाचित्ककारणं विना ऽनुपपत्तेः तत्कारणं वह्निरनुमीयत इत्याशङ्क्य निराकरोति—कादाचित्कमिति। कारणमन्तरेण कार्यं न सिद्ध्येदित्यनेन प्रकारेण तस्य कारणस्य कल्पनं वो युष्माकं भावाभावयोः साहित्यवादिनां पक्षे कुतः स्यात् न कुतोपीत्यर्थः ॥ २०१ ॥

तत्र हेतुमाह—

कादाचित्कात्कल्पनां कारणस्य
प्रत्याचक्षीताविरोधं ब्रुवाणः।
एकोपाधावस्तिनास्तित्वयोर्हि
तस्मादेषा कष्टकल्पिर्न कार्या ॥ २०२ ॥

कादचित्कादिति। यत इत्यध्याहार्यम् यस्मादेकत्र भावाभावयोर विरोधं ब्रुवन् भवान् कार्यात् कारणस्य कल्पनां प्रत्याख्यातवान् कार्यदर्शनेन कारणकल्पनादशायां तत्रैव कार्याभावस्याप्यवस्थितत्वेन कारणकल्पनायाः प्रतिबद्धत्वादित्यर्थः। आद्यपक्षनिरासमुपसंहरति—एकोपाधाविति। तस्मादित्यादौ सम्बन्धनीयम् ॥ २०२ ॥

ननु यथैकस्यैव स्वयंप्रकाशब्रह्मात्मनः प्रतीचः एकदा स्फुरणास्फुरणे अन्यत्रादृष्टे अपि त्वया कल्प्येते एवमेकत्र युगपदेकस्य भावाभावावन्यत्रादृष्टावप्यज्ञाने कल्प्येते इति द्वितीयं पक्षमाशङ्कते—

ननु चैकरूपचितिवस्तुगतं
स्फुरणं तदस्फुरणमेव च वः।
अविरुद्धमभ्युपगतं द्वितयं
तदिवास्ति नास्ति युगलं भवतु॥ २०३ ॥

ननु चैकरूपेति। एकरूपमेकरसं यच्चितिवस्तु परिपूर्णानन्दाकारेणभानं तदिवैकस्यैकदा स्फुरणास्फुरणमिवास्ति नास्ति युगलं भावाभावलक्षणद्वयमाज्ञानस्यैकत्रेति शेषः। अविरुद्धमित्यनुषङ्गः ॥ २०३ ॥

वैषम्येण परिहरति—

न तदात्मनः स्फुरणमेव निजं
परतोऽप्रकाशनमबोधवशात्।
न च किञ्चिदन्यदनयोरुभयो-
रविरोधसिद्धिकृदुदाहरणम् ॥ २०४ ॥

न तदात्मन इति। तत् त्वदुक्तं साम्यं न तत्र किमात्मनः स्फुरणा-

स्फुरणे उभे अपि स्वाभाविके एवेति मत्वा तत्साम्यमुच्यते उतान्यतरत्स्वाभाविकमन्यतरदौपाधिकमिति मत्वा तत्र नाद्य इत्याह—आत्मन् इति । आत्मनः स्फुरणमेव निजं स्वाभाविकमप्रकाशनं तु परतः उपाधिवशादेव तदेवाह—अबोधवशादिति । अज्ञानप्रतिबन्धबलात् । न द्वितीयः । अस्फुरणप्रयोजकाज्ञानवत् चैतन्येऽज्ञानाभावप्रयोजकस्यान्यस्याभावात् नन्वज्ञानस्याप्येकस्मिन्नेव एकदा प्रातीतिकसत्त्वेन सद्भावः वास्तवासत्त्वेन चाभावः संगच्छते शुक्ताविव रजतस्येति चेत्तर्हि जीवस्यापि वस्तुतस्तदभाववत्त्वादीश्वरत्वमापद्येत । वस्तुतस्तदभाववत्त्वेपि यदि तद्वत्त्वान्नेश्वरत्वं तदेश्वरोपि नेश्वरः स्यादज्ञानवत्त्वात् तस्य चिन्मात्राश्रयत्वात् । ननु चैतन्यस्याज्ञानवत्तया प्रतीयमानाकरेण जीवत्वं तदभाववत्तया चेश्वरत्वं तत ईश्वरस्य तद्वत्तया प्रतीयमानत्वाभावात् न जीवत्वं जीवस्य पुनस्तद्वत्तया प्रतीयमानस्यापि वस्तुतस्तदभाववत्वात् तेनाकारेणेश्वरत्वमेव सर्वज्ञत्वादिकं चाकारभेदेन त्वन्मत इवात्रापि व्यवस्थितमिति चेन्न । अज्ञानाभाववत्त्वाकारवत ईश्वरत्वे तस्याज्ञानसम्बन्धाभावेन तन्प्रयुक्तसर्वज्ञत्वाद्यनुपपत्त्येश्वरत्वस्यैवानुपपत्तेः। तस्मान्न चैतन्यस्फुरणास्फुरणदृष्टान्तेनाज्ञानस्य भावाभावौ वक्तुं शक्याविति भावः । न च दृष्टान्तान्तरमस्ति येन तद्बलादज्ञानस्य एकदा भावाभावौ वक्तुं शक्यावित्याह—न किञ्चिदिति अनयोः एकदेशकालावच्छिन्नाज्ञानभावाभावयोः ॥ २०४ ॥

एवमस्फुरणस्य स्फुरणाभावरूपत्वमङ्गीकृत्यैकस्मिन् चैतन्ये स्फुरणास्फुरणयोरविरोध उपपादितः । इदानीं नास्फुरणं स्फुरणाभावः किन्तु भावरूपाविद्यैव । अत एकस्मिन् चैतन्ये स्फुरणास्फुरणयोर्विद्यमानत्वबलात् नाज्ञानस्य भावाभावावेकत्र वक्तुं शक्याविन्यभिप्रायेणाह—

स्फुरणास्फुरणे च नाऽऽत्मनः
सदसद्भावतया मनीषिते ।

स्फुरणं चितिरात्मवस्तुन-
स्तदविद्यास्फुरणं च कथ्यते ॥ २०५ ॥

स्फुरणेति । सदसदभावतया भावाभावरूपेणेत्यर्थः । न मनीषिते नेष्टे । पुनः कीदृग्भूते ते विवक्षिते तत्राह—स्फुरणमिति । आत्मनश्चितिः स्वरूपचैतन्यं स्फुरणं तदविद्या चैतन्याश्रिताविद्या अनादिभावरूपा अस्फुरणमित्यर्थः । न चास्फुरणमिति । नञोऽभाववाचित्वात्कथं भावरूपत्वमस्फुरणस्येति शङ्क्यमात्मस्फुरणस्याविनाशितया तदभावासंभवेन नञोऽभाववाचित्वानुपपत्तेः । न च तस्याविनाशित्वे प्रमाणाभावः । न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यत इति श्रुतेरेव तत्र प्रमाणत्वात् । तस्माद्भ्रत्युपरक्तस्फुरणविरुद्धं भावरूपाज्ञानमेवास्फुरणमिति भावः ॥ २०५ ॥

तस्माच्चैतन्यमात्राश्रयविषयमेवाज्ञानं तत्प्रयुक्त एव जीवत्वेश्वरत्वे न तत्सद्भावतदभावप्रयुक्ते । न च चैतन्यस्याज्ञानाश्रयत्वे जीवत्वप्रसङ्गः । अज्ञानाश्रयत्वस्य तदप्रयोजकत्वात् अज्ञानोपाधिगतत्वस्यैव तत्र प्रयोजकत्वादित्युपसंहरति—

अज्ञानित्वं जीवभावो न तस्मा-
ज्जीवत्वादेः कारणं युक्तमेतत् ।
प्राणोपाधेर्वाचको जीवशब्द-
श्चैतन्यस्य स्यात्प्रसिद्धो हि तत्र ॥ २०६ ॥

अज्ञानित्वमिति । तस्मादित्यादौ सम्बन्धनीयम् । यद्यज्ञानित्वं स्याज्जीवभावः स्यादिति यदुक्तं तन्नेत्यर्थः । जीवत्वादेर्जीवत्वेश्वरत्वयोः एतदज्ञानसम्बन्धित्वमेव कारणं प्रयोजकं युक्तं नत्वज्ञान-

सद्भावतदसद्भावावित्यर्थः । नन्वज्ञानाश्रयचैतन्यं जीवो न भवति चेत् कस्तर्हि जीव-इत्यत्राह—प्राणोपाधेरिति । विज्ञ नक्रियाशक्तिमदन्तः करणमत्र प्राणत्वेन विवक्षितं तत एवोपाधेर्निमित्तात् चैतन्यस्य वाचकः अन्तःकरणवासनासहिताज्ञानोपहितं चैतन्यं जीवशब्द-वाच्यमित्यर्थः ॥ २०६ ॥

नन्वज्ञानोपहितस्य जीवत्वं वक्तुमनुपपन्नं तथात्वे तदनुपहिते-श्वरचैतन्यस्य य आत्मनि तिष्ठन्नात्मानमन्तरो यमयतीति श्रुति-प्रसिद्धाया अन्तर्यामित्वेन जीवेऽनुवृत्तेरनुपपत्तेः न हि घटोपहिता-काशे तदनुपहिताकाशस्यानुवृत्तिरस्ति । नन्वाकाशस्य परममहत्त्वा-द्घटोपहितेप्यनुवृत्तिरस्तीति चेत् । न । आकाशत्वेन परममहत्त्वेपि घटानुपहितत्वाकारेण परममहत्त्वाभावात् । ईश्वरचैतन्यस्य जीव-व्यावृत्तेनाज्ञानानुपहितत्वाकारेणैव तन्नियन्तृत्वादिति चेन्न । नह्य-ज्ञानोपहितत्वमज्ञानावच्छिन्नत्वं येन त्वदुक्तो दोषो भवेत् किन्त्व-ज्ञानप्रतिबिम्बितत्वमेव प्रतिबिम्बे च जीवे बिम्बभूतेश्वरचैतन्यस्य नियन्तृत्वेनानुवृत्तिः सम्भवत्येव बिम्बस्याकाशस्य जलाद्युपाधौ प्रतिबिम्बप्रदेशेप्यनुवृत्तिदर्शनादित्यभिप्रेत्याह—

अज्ञानजन्यकरणप्रतिबिम्बवाचि
जीवाभिधानमिह वृद्धजनप्रसिद्धम् ।
अत्रैव निर्वचनमस्ति च तस्य तस्मा-
ज्जीवो भवेत्करणपूगवशीकृता चित् ॥ २०७ ॥

अज्ञानेति । अज्ञानं च तज्जन्यं च यत्करणमन्तःकरणं तच्च तयोः प्रतिबिम्बितं यच्चैतन्यं तद्वाचीत्यर्थः । अथवा—अत्र करणमिति ज्ञानकर्मेन्द्रियप्राणपञ्चकबुद्धिमनोलक्षणसप्तदशावयवात्मकलिङ्गशरीरं

विवक्षितम्। तदेव श्लोकान्ते करणयुगेत्युक्तम्। जीवाभिधानंजीवपदम्। नन्वज्ञानप्रतिबिम्बचैतन्यस्य जीवत्वे जीवपरयोरैक्यं श्रुतिसिद्धं न सिद्धयेत्। लौकिकप्रतिबिम्बस्य बिम्बाद् भिन्नत्वात् तदनुसारेणात्रापि भेदानुमानादनुभूयते हि लोके ग्रीवास्थमुखात् बिम्बाद्भिन्नत्वेन दर्पणस्थप्रतिबिम्बमुखम्। न च ममेदं मुखमिति प्रतिबिम्बमुखस्य ग्रीवास्थमुखाभेदावगमात्तदैक्यमिति वाच्यम्। तस्य व्यक्तिभेदावगाहिप्रत्यक्षविरोधेन स्वमुखसजातीयमुखविषयतयान्यथासिद्धत्वात्। न च भेदप्रत्यय एवैतदबलात् कल्पितविषयः किं न स्यादिति वाच्यम्। उपपत्तिसहकृतत्वेन भेदप्रत्ययस्यैव प्रबलत्वात्। उपपत्तिश्च भेदनियतप्रत्यङ्मुखपराङ्मुखत्वादिलक्षणविरुद्धधर्मवत्त्वानुभवः। ननु विरुद्धधर्मप्रत्ययोऽपि भ्रान्त इति चेत्। न। तद्विषयप्रत्यङ्मुखत्वादेर्बाधकाभावात्। नन्वभेदप्रत्यय एव भेदं बाधमानः प्रत्यङ्मुखत्वादिविरुद्धधर्मप्रत्ययमपि बाधत इति चेदत्र किमभेदप्रत्ययेन युगपदेवोभयबाधः। किं वाभेदप्रत्ययबाधानन्तरं विरुद्धधर्मप्रत्ययबाधः। नाद्यः। अभेदप्रत्ययस्य साक्षात्प्रत्यङ्मुखत्वादिप्रत्ययविरोधाभावात्। व्यापकीभूतभेदप्रत्ययस्य बाधे सति हि तद्व्याप्यविरुद्धधर्मत्वप्रत्ययस्य बाधो भवति। न द्वितीयः। तस्यां दशायां भेदप्रत्ययस्योपपत्तिसहकृतत्वेनाभेदप्रत्ययापेक्षया प्रबलत्वात्। ननु भेदप्रत्ययोऽप्युपपत्तिशून्य एव तद्विषयोत्पत्तिज्ञप्तिकारणाभावात्। तथा हि किं दर्पणे प्रतीयमानमुखं दर्पणपरिणाम उत तदवयवपरिणाम.। नाद्यः। मुखस्य दर्पणव्यापितयोपलम्भप्रसङ्गात् तद्गतरूपवत्। न द्वितीयः। अवयवानां पूर्वपरिणामे विद्यमाने तद्विरुद्धद्रव्यान्तरपरिणामानुपपत्तेः। नापि तज्ज्ञप्तौ कारणं पश्यामः चक्षुरादेर्व्यवहितग्राहित्वाभावादिति चेन्न। दर्पणावयवसंयुक्तपार्थिवावयवानामेव तदाकारेण परिणामोपपत्तेः। न च सर्वदा परिणामप्रसङ्गः। बिम्बसन्निधानस्याप्यन्वयव्यतिरेकाभ्यां कारणत्वात्। न च बिम्बापगमेपि तदुपगमप्रसङ्गः।

बिम्बापगमे प्रतिबिम्बस्याप्यपगतत्वात्। न च निमित्तापगमे नैमित्तिकापगमानुपपत्तिः ज्वरापगमे दुःखापगमवदुपपत्तेः। न च द्रव्यस्यैतदनुपपन्नमिति वाच्यम्। काष्ठादिनाशे वह्नेरपि नाशदर्शनात्। न च द्रव्यान्तरत्वे प्रतिबिम्बस्य बिम्बाधीनचलनादिमत्वं न स्यादिति वाच्यम्। वह्नेः काष्ठाधीनत्ववदुपपत्तेः। न च प्रतीत्यनुपपत्तिः। चक्षुरादिनैव तदुपपत्तेः। न च दर्पणावयवव्यवहितत्वात् तेन तत्प्रतीत्यनुपपत्तिः। तस्य स्वच्छतया चक्षुर्व्यवधायकत्वाभावात्। तस्माद्भेदप्रत्ययः सोपपत्तिक एव। किञ्च बिम्बप्रतिबिम्बयोरभेदे बिम्बमेव दर्पणादिद्रव्यनिष्ठतयारोपितमिति वाच्यम् अन्यथा बिम्बैक्यानुपपत्तेः। तथा चान्यथाख्यात्यापत्तिः। ननु दर्पणस्थत्वादिधर्मा एवारोप्यन्ते न मुखम्। नचैवमप्यन्यथाख्यातिः तेषां रजतवदज्ञानविजृम्भितत्वादिति चेत् तत्र किं मुखाज्ञानात् तदारोपः। किं वा तस्य ग्रीवास्थत्वाद्यपरिज्ञानात्। किं वा तदेकत्वापरिज्ञानात् न सर्वथापि मुखत्वेन ग्रीवास्थत्वेनैकत्वेन च प्रतीयमान एव मुखे प्रतिबिम्बदर्शनात्। किं च तयोरभेदे कस्तूरिकाप्रतिबिम्बे गन्धोपलम्भः गुणप्रतिबिम्बे रसोपलम्भश्च स्यात् तस्मान्न बिम्बप्रतिबिम्बयोरेकत्वमिति चेत्। उच्यते। भेदाभेदप्रत्ययोरभेदप्रत्ययो बलवानित्युत्सर्ग इति स्थायिवादिभिः सर्वैरप्यङ्गीक्रियते। तस्य क्वचिदन्यथात्वं बलवद्बाधकबलात्। न चात्र बलवद्बाधकं पश्यामः। ननु विरुद्धधर्मवत्त्वमेव बाधकमिति चेन्न। तस्यान्यथासिद्धत्वात्। न च बाधकाभावान्न तदन्यथासिद्धिरिति वाच्यम्। एकोपि प्रबलः सहस्रमपि बाधत इति न्यायेनाभेदप्रत्यभिज्ञाया एव तद्बाधकत्वात्। न च प्रत्यभिज्ञासाक्षाद्विरुद्धधर्मप्रतिभासं न बाधते किन्तु भेदबाधद्वारा तस्यां च दशायां विरुद्धधर्मप्रतिभासोपपत्तिसहकृतत्वेन भेदप्रत्यय एव बलवानिति वाच्यम्। विरुद्धधर्मप्रतिभासो हि भिन्नाश्रयत्वव्याप्ततया विरुद्धधर्मं विषयीकुर्वन् भेदप्रत्यय उपकरोति न तु साक्षाद् भिन्नवि-

षयत्वात् । तथा चाभेदप्रत्यभिज्ञया भेदप्रत्ययबाधदशायां विरुद्धधर्मस्य भिन्नाश्रयत्वव्याप्यत्वप्रतिसन्धाननियमाभावात् व्याप्यत्वाभिमतस्याश्रये व्यापकत्वाभिमतबाधदशायां तस्य तदव्याप्यत्वप्रतिसन्धानानुपपत्तेश्च न भेदप्रत्ययस्योपपत्तिसहकृतत्वमित्यौत्सर्गिकप्राबल्यवता प्रत्यभिज्ञानेन भेदप्रत्ययस्यैव बाधः । तदुत्पत्तिकारणानिरूपणादपि भेदप्रत्ययो निरुपपत्तिक एव । न च दर्पणावयवसंयुक्तावयवान्तराण्येव तदाकारेण परिणमन्त इति वाच्यम् । तत्र तादृशावयवान्तरसत्त्वे प्रमाणाभावात् । न च कार्यबलात् तदनुमीयत इति वाच्यम् । तत्कार्यत्वस्यैवाद्याप्यनिश्चयात् । ननु कारणान्तराभावात्कार्यस्य च सकारणत्वनियमात् कल्प्यमानं कारणं दर्पणादिद्रव्यबाधात् द्रव्यान्तरमेव पर्यवस्यतीति चेन्न । एवमप्यन्यत्र कल्पितकारणभावस्याज्ञानस्यैव प्रतिबिम्बमुखं प्रत्यपि कारणत्वकल्पनौचित्यात् । अवयवान्तरकारणत्वे हि धर्मी धर्मश्चोभयमपि कल्पनीयम् । किञ्चैकदा पञ्चभिः पुरुषैर्दृश्यमाने दर्पणेऽनेकमुखानां सत्त्वेन दर्पणस्योच्छूनत्वं विदारणं दुर्बहत्वं च स्यात् । अपि चास्मिन्पक्षे बिम्बापगमेपि प्रतिबिम्बोपलम्भप्रसङ्गः । न च काष्ठापगमे वह्न्यपगमवन्निमित्तबिम्बापगमे प्रतिबिम्बापगम इति वाच्यम् । दृष्टान्तवैषम्यात् । अग्नेर्हि काष्ठाश्रितत्वात् । तन्नाशे अग्न्यारम्भकसंयोगविनाशेन तन्नाशो भवति । न च प्रतिबिम्बं बिम्बाश्रितं तस्मान्न प्रतिबिम्बस्योत्पत्तिकारणं निरूपयितुं शक्यन्नापि प्रतीतिकारणं निरूपयितुं शक्यम् । न च चक्षुषा तत्सम्भवति दर्पणावयवव्यवहितत्वात् । न च तस्य स्वच्छत्वेनाव्यवधायकत्वं तथात्वे दर्पणपृष्ठलग्नहस्तादेरपि ग्रहणप्रसङ्गात् । अत एव प्रदीपप्रत्यभिज्ञातौल्यं निरस्तं वेदितव्यम् । ननु मुखलाञ्छितप्रतिमुद्रैव दर्पणादौ मुखप्रतीतिविषयः । तथा च नोत्पत्तिकारणाद्यनुपपत्तिरिति चेन्न । बिम्बसंश्लेषाभावाद्बिम्बविरुद्धपरिणामत्वात् । बिम्बचेष्टाधीनचेष्टावत्त्वदर्शनाच्च । ननु

मुखच्छायैव प्रतिबिम्बम् । न च तत्र त्वदुक्तदूषणानि सन्ति छायाया बिम्बसंश्लेषं विनापि सम्भवात् । तद्विरुद्धपरिमाणतदधीनत्वादेश्च सम्भवात् प्रत्यङ्मुखत्वादिकं च सङ्गच्छते । प्रसिद्धच्छायायां दर्शनादिति चेन्न । अनुभवविरोधात् । न हि मन्मुखच्छाया दर्पण इति कश्चिदनुभवति । किन्तु मदीयमुखं दर्पणे पश्यामीति तटस्थमपि बोधयति । दर्पणे सुन्दरं मुखं पश्येति दर्पणे मुखसंसर्गबाधानुभवविरोधाच्च । अप्रसक्तस्य मुखस्य तत्र बाधायोगात् । प्रसक्तच्छायायाश्च परमार्थत्वेन बाधानुपपत्तेः । प्रसिद्धच्छायाविलक्षणत्वाच्च । लौकिकी हि छाया नियमेन श्यामैवानुभूयते । न च दर्पणमुखं श्याममनुभूयते । नन्वायसदर्पणे श्यामत्वेनाप्यनुभूयत इति चेन्न । तस्योपाधिश्यामताप्रयुक्तत्वात् । प्रतिबिम्बत्वप्रयुक्तत्वे रजतदर्पणप्रतिबिम्बेपि तदनुभवप्रसङ्गात् । किञ्च वृद्धिह्रासादिमती प्रसिद्धच्छायानुभूयते । न च प्रतिबिम्बमेकस्मिन्नुपाधावेकरूपबिम्बस्य कदाचिद्वर्द्धते ह्रसति वा । ननु छायायामपि नायं नियमः प्रदीपादिष्वेकत्र सत्सु स्तम्भादिच्छायायां तददर्शनादिति चेन्न । तत्रापि प्रदीपस्य दूरसमीपोत्सर्पणादिना वृद्धिह्रासानुभवदर्शनात् । किं च प्रकाश एव छायाया निमित्तं वक्तव्यः सचात्रादित्यादिप्रकाशः । किं वा भास्वरद्रव्यदर्पणप्रकाश एव । नाद्यः । छायान्तरशून्यगृहान्तर्वर्तमानस्यापि पुंसो दर्पणादिप्रतिबिम्बदर्शनात् । किं च यत्प्रकाशकृता या छाया सा तद्विपरीतदेशैव तथैव लोकेनुभवात् । प्रतिबिम्बे तु प्रातःकाले प्राङ्मुखमुपविष्टस्य पुंसः पूर्वस्यां दिश्येवानुभूयते । अत एव न द्वितीयोपि । किं च प्रतिबिम्बस्य छायात्वे तुल्यवत्प्रचुरप्रकाशानेकदीपमध्यगतस्य पुंसः छायानुपलम्भवदनेकप्रकाशमध्यस्थस्य पुंसो दर्पणादिषु प्रतिबिम्बानुपलम्भप्रसङ्गः । तस्मात्प्रतिबिम्बस्यावयवान्तरारब्धत्वप्रतिमुद्रात्वच्छायात्वाभावात् भेदप्रत्ययस्य निरुपपत्तिकत्वादभेदप्रत्ययेन तद्बाधः । नन्वभेदोप्यनुपपन्नः । अभेदे हि प्रत्यङ्मुखत्वाधोग्रत्वदर्पणजलनिष्ठत्वप्रतीतिरज्ञानकल्पितैवेति वक्त-

व्यम् । तच्चानुपपन्नम् । प्राङ्मुखत्वेन ग्रीवास्थत्वेनोर्ध्वाग्रत्वेन भूनिष्ठत्वेन प्रतीयमानेष्वेव मुखवृक्षादिषु तद्विपरीतप्रत्यङ्मुखत्वादिप्रतीतेरित्युक्तत्वात् । न च तत्तद्रूपेण तत्तज्ज्ञानेपि तत्तदज्ञानं न निवृत्तमिति शङ्क्यम् । ज्ञानाज्ञानयोरविरोधप्रसङ्गात् । अनुभवविरोधाच्च । न हि तत्र कश्चित्तदज्ञानं विषयव्यावृत्तमनुभवतीति चेत् तत्र किं मुखवृक्षादेरावारकमज्ञानमेव नेति ब्रूषे । उताज्ञानमात्रम् आद्योङ्गीक्रियते । न द्वितीयः । अनावारकानन्ताविद्यावस्थायास्तत्र सत्त्वात् । मूलाज्ञानस्य वा तत्र सत्त्वात् । न च मूलाज्ञानं तदज्ञाने नश्यति । तस्यानधिष्ठानज्ञानत्वात् । न च तासामप्यवस्थानां ज्ञानेन निवृत्तिः । आवारकाज्ञानेनैव तद्विरोधात् । न च सर्वा अप्यवस्था एकदैव विषयमावृण्वन्तीति वाच्यम् । एकयाप्यावरणसिद्धौ तदन्यस्यास्तत्कल्पने प्रमाणफलयोरभावात् । न चानावारकतत्सत्त्वे मानाभावः । उत्तरकालीनभ्रमादेरेव तत्र मानत्वात् । तस्मादनावारकाज्ञानकल्पित एव प्रतिबिम्बभ्रमः । अत एवावस्थास्वीकारपक्षेऽवस्थानादिरित्येवाङ्गीक्रियते । अन्यथा विरोधिप्रमाणस्य सन्निधाने तदुत्पत्त्यसंभवात् । प्रतिबिम्बभ्रमानुपपत्तेः । नन्वेवमपि प्रतिबिम्बभ्रमो न भवति विशेषज्ञानसत्त्वात् न हि शुक्तिकात्वज्ञाने तत्र भ्रमो दृश्यते । ननु निरूपाधिकभ्रम एवाधिष्ठानविशेषदर्शनविरोधि न सोपाधिकभ्रम इति चेन्न । अधिष्ठानविशेषसाक्षात्कारे सति पीतशङ्खादिसोपाधिकभ्रमाणामप्यदर्शनात् । न च तत्रोपाध्यभावादेव भ्रमाभावः न त्वधिष्ठानविशेषदर्शनसत्त्वादिति वाच्यम् । विभ्रमाणां तत्त्वज्ञानैकविरोधित्वेनोपाध्यभावे तदभावानुपपत्तिरिति चेन्न । अप्रतिबन्धाधिष्ठानविशेषदर्शनं हि विभ्रमविरोधि प्रतिबन्धकाभावस्य कार्यमात्रेऽपेक्षितत्वात् । प्रतिबन्धकं च क्वचित्किञ्चिदित्यन्वयव्यतिरेकाभ्यां सोपाधिकभ्रमे उपाधिरेव प्रतिबन्धक इति कल्प्यते । ततश्चोपाधौ सति तत्प्रतिबद्धमधिष्ठानविशेषदर्शनं न भ्रमं-

विरुणद्धि किन्तूपाधिविगमे सत्येव। ननु प्रतिबिम्बभ्रमः किमपरोक्ष उत परोक्षः। नाद्यः। अधिष्ठानापरोक्षं विना तदनुपपत्तेः। अधिष्ठानस्य च मुखादेः इन्द्रियसंयुक्तत्वाभावेनापरोक्षत्वानुपपत्तेः। ननु स्वमुखैकदेशेन्द्रियसन्निकर्षात्तस्यापरोक्षत्वमिति चेन्न। एवमपि चक्षुर्गोलकादिप्रतिबिम्बस्याचाक्षुषत्वप्रसङ्गात्। न द्वितीयः। अपरोक्षत्वेनानुभवात् लिङ्गादेरभावाच्चेति चेन्न। बिम्बभ्रमे उपाध्यापारोक्ष्यस्यैव तत्र प्रयोजकत्वात्। अध्यासो हि नियमेन यत्संप्रयोगमपेक्षते तदापरोक्ष्येणैव स्वयमपरोक्षो भवति। प्रतिबिम्बाध्यासश्च नियमेनोपाधिसंप्रयोगमपेक्षत इति तदापरोक्ष्यादेव स्वयमपरोक्षो भवति। नन्वधिष्ठानसम्प्रयोगोपि विभ्रमे कारणमिति चेन्न। अन्यत्र तथात्वेप्यन्वयव्यतिरेकाभ्यामुपाधिसंप्रयोगस्यैव भ्रमविशेषे कारणत्वात्। नचाननुगमो दोषाय क्लृप्ताध्यासविलक्षणे कार्ये विलक्षणसंप्रयोगस्यैव कारणत्वौचित्यात्। अथवा—स्वच्छद्रव्यादर्शादिना संप्रयुक्ता नायनरश्मयस्ततः प्रतिहताः सन्नस्तत्तद्बिम्बेन संयुज्य तत्तद्बिम्बमपरोक्षतया गृह्णन्तोप्युपाधिसन्निधानदोषात् स्वाश्रयनिष्ठतया बिम्बं विषयीकुर्वाणास्तत्रोपाधिनिष्ठत्वादिकमारोप्य गृह्णन्तीति न गोलकादिप्रदेशस्यापारोक्ष्यानुपपत्तिः। नन्वेवं किमर्था कष्टकल्पनाः दर्पणस्यैव प्रतिबिम्बमुखाधिष्ठानत्वमस्तु शुक्तेरिवाधिष्ठानत्वम्। नचैवं सति बिम्बमुखैक्यप्रत्यानुपपत्तिः शुक्तिरजते मदीयमिदं रजतमिति पारमार्थिकरजताभेदप्रत्ययवदुपपत्तेरिति चेत्तत्र किं शुक्ताविव रजतमनिर्वचनीयं मुखमारोप्यते। अथवा—प्रसिद्धमुखस्यैव तत्रारोपः। नान्त्यः। अन्यथाख्यातिप्रसङ्गात्। आद्ये इदं रजतमितिवत् दर्पणं मुखमिति प्रतीत्यापत्तिः न तु दर्पणे मुखमिति बाधोपि नेदं रजतमितिवत् नेदं मुखमित्येव स्यान्न तु नात्र मुखमिति। ननु दर्पणे मुखत्वं नारोप्यते। किन्तु मुखवत्वं नामाविद्यको धर्म आरोप्यत इति चेत्तर्हि नियमेन मुखवद्दर्पणमित्येव

प्रतीतिः स्यान्न तु दर्पणे मुखमिति। आरोप्यतावच्छेदकप्रकारकत्व-नियमादारोपस्य तस्मान्मुखमेवाधिष्ठानं तत्र च दर्पणस्थत्वादिधर्म एवारोप्यते न तु मुखमिति वक्तव्यम्। न च बिम्बप्रतिबिम्बयोरभेदे प्रतिबिम्बे कस्तूरिकादिगन्धादेरुपलम्भप्रसङ्गो दोषः। इष्टत्वात्। न च तथा नोपलभ्यत इति वाच्यम्। तत्र बिम्बाभिन्नत्वेन तद्गन्धो-पलब्धेरेव तद्गन्धोपलब्धित्वात् स्मृतिरपि बिम्बप्रतिबिम्बयोरेक-त्वमेव गमयति। "नेक्षतोद्यन्तमादित्यन्नास्तं यन्तं कदाचन। नोपरक्तं न वारिस्थं न मध्यं नभसो गतमि"ति अत्र हि नभसो मध्यं गतं वारिस्थमिति सामानाधिकरण्येन वारिस्थनभोमध्यगतयोरेकत्व-मुच्यते। न च प्रतिबिम्बस्य जीवत्वे मुखप्रतिबिम्बवत् स्वस्य बिम्ब-भूतब्रह्मात्मतानवगन्तृत्वं बिम्बस्य ब्रह्मण एव देवदत्तवत् भ्रान्ति-निवर्त्तकतत्त्वज्ञानाश्रयत्वं स्यादिति वाच्यम्। न हि प्रतिबिम्ब-मुखस्य बिम्बात्मतानवगमे प्रतिबिम्बत्वं प्रयोजकं बिम्बस्यापि घटादेरनवगन्तृत्वात्। किन्तु जडत्वं तच्च न जीवस्य देवदत्तस्यापि तत्त्वज्ञानाश्रयत्वेन बिम्बत्वं प्रयोजकम् किन्तु भ्रान्तत्वं तच्च न ब्रह्मण इत्युक्तम्। तस्मात् बिम्बप्रतिबिम्बयोरेकत्वाज्जीवस्य प्रति-बिम्बत्वे परब्रह्मैक्यं श्रुतिसिद्धं सिद्ध्यत्येवेत्यलमतिप्रसङ्गेन। एवं जीवशब्दस्य सूक्ष्मशरीरप्रतिबिम्बचैतन्येऽविगीततया सकलवृद्धव्यव-हाराद्रूढिरित्युक्तम्। इदानीं योगवृत्त्यापि जीवशब्दः तत्पर इत्याह— अत्रैवेति। आविद्यककरणप्रतिबिम्बे निर्वचनमवयवार्थः। तस्य जीव-शब्दस्य जीवप्राणधारण इत्यस्माद्धातोर्जीवशब्दस्य निष्पन्नत्वात् जीवति प्राणान् करणानि धत्त इत्यवयवार्थस्य तत्रैव सत्त्वात्। करणपूगवशीकृता करणसमष्टिरूपसूक्ष्मशरीरोपाधिपराधीना तत्प्रति-बिम्बिताधिदेवजीवशब्दवाच्येत्यर्थः॥ २०७॥

ननु माभूज्जीवाश्रयमज्ञानं जीवोपाधिः अन्तःकरणाश्रितं तु तत्तदुपाधिर्भविष्यति एवं च सति ब्रह्मासर्वज्ञत्वादिदोषात् परिहृतं

भवति अहमज्ञ इतिप्रतीतिरप्युपपन्नतरा भवतीत्याशङ्कामुपसंहारव्याजेनापाकरोति—

ब्रह्मैवाज्ञानि तस्मादिह भवितुमलं नापरं वस्तु किंचित्तस्याज्ञानात्मकत्वान्न च तमसि तमस्तन्निवृत्तेरयोगात्। नाज्ञानोत्थस्य विशाजनिरिह घटते तां विना तत्र नश्येन्न ह्यज्ञानं विनश्येदवगतिजनकज्ञानजन्मान्तरेण ॥२०८॥

ब्रह्मैवेति। यस्मादपरं किञ्चिद्वस्त्वन्तःकरणं तत्सम्बद्धं चैतन्यं वाऽज्ञानि भवितुं नालं तस्मादुब्रह्मैवाज्ञान्यज्ञानाश्रय इत्यर्थः। किमन्तःकरणं वास्तवमुताविद्यकं नाद्यः तस्य ज्ञाननिवर्त्यत्वप्रतिपादकभिद्यते हृदयग्रन्थिरित्यादिशास्त्रविरोधात्। द्वितीयेपि। किमन्तःकरणमात्रं तदाश्रयः उतान्तःकरणसम्बद्धं चैतन्यं द्वितीयेप्यन्तःकरणसम्बद्धत्वं तद्विशिष्टत्वमुत तदुपहितत्वम्। न द्वितीयः। स्वकार्योपहिते स्ववृत्तित्वानुपपत्तेरित्युक्तत्वात्। प्रथमेपि किं विशिष्टं विशेषणविशेष्याभ्यामनन्यदुतान्यत्। नाद्यः। ब्रह्मणोज्ञानित्वानुपपत्तेरित्यभिप्रेत्येतरत्र पक्षद्वयेप्यज्ञानानाश्रयत्वे हेतुमाह—तस्याज्ञानात्मकत्वादिति। तस्य केवलस्यान्तःकरणस्य तद्विशिष्टस्य चाज्ञानकार्यत्वेनाज्ञानात्मकत्वादित्यर्थः। नन्वज्ञानात्मकत्वमात्रेण कथं तदनाश्रयत्वं तत्राह—नचेति। नह्यज्ञाने ज्ञानं सम्भवति निष्प्रयोजनत्वात् प्रतीत्यनुपपत्तेश्चेत्यर्थः। नचान्तःकरणाश्रयाज्ञानादात्मनः आवरणं प्रयोजनम्। आत्मचैतन्ये न तत्प्रथेत्यपि शङ्क्यम्। आवारकस्य लौकिकतमोवत्स्वाश्रयमात्रावारकत्वात्। अन्तःकरणस्य चावृतस्वभाववत्वात् तदिदमुक्तम्। तम इति। स्वाश्रयातिरिक्तचैतन्येन तस्यासम्बन्धान्न तद्बलेन तत्सिद्धिः। सम्बन्धस्याश्रयस्तु जडरूपाज्ञानकार्यत्वेन जडत्वात् न तत्प्रकाशयितुमर्हति तदिदमुक्तम्—तमसीति। हेत्वन्तरमप्याह—तन्निवृत्तेरिति। तस्याज्ञानात्मकान्तःकरणतद्विशिष्टाश्रयाज्ञानस्य निवृत्तेरसम्भवादपि तमसि तमो नास्ती-

त्यर्थः। किमिति तन्निवृत्तिर्न सम्भवतीति चेत्तत्र वक्तव्यं किं ज्ञानात्तन्निवृत्तिः उत तदतिरिक्तेन। आद्येपि किं स्वसमानाश्रयज्ञानेन उत भिन्नाश्रयज्ञानेन आद्यमसम्भवेन दूषयति—नाज्ञानेति। अन्तःकरणस्याज्ञानकार्यस्य जडत्वान्न तदाश्रितज्ञानं सम्भवति। तस्य चेतनैकाश्रयत्वात्। न च वृत्तिरूपं ज्ञानमन्तःकरणाश्रितं तदेव चाविद्यानिवर्त्तकं तदुक्तं "वृत्तितत्स्थचिदाभासौ द्वावपि व्याप्नुतो घटम्। तत्राज्ञानं धिया नश्येदाभासेन घटः स्फुरेदि"तीति वाच्यम्। वृत्तेः केवलाया जडतया अविद्यानिवर्त्तकत्वानुपपत्तेः। न हि तमसा तमोनिवृत्तिः सम्भवति। न च चैतन्येनापि न तन्निवृत्तिः सम्भवति। तस्य नित्यत्वेन प्रमाणजन्यत्वाभावात् प्रमाणजन्यस्यैव च निवर्त्तकत्वादिति वाच्यम्। तस्य केवलस्य तथात्वेपि वृत्त्युपाधिना जन्यत्वोपपत्तेः। का तर्हि सम्प्रदायविद्वचनस्य गतिः वृत्तिप्राधान्यविवक्षयोपपत्तेः। अन्यथा अविद्यानिवृत्तिव्यतिरिक्तघटादिस्फुरणासम्भवेन तद्व्यतिरिक्तस्याभासकृतस्य वर्णनानुपपत्तेरित्यर्थः। द्वितीयं दूषयति—तामिति। तां स्वसमानाश्रयविद्यां देवदत्तज्ञानेन यज्ञदत्ताज्ञानानाशादित्यर्थः। ननु करणाश्रितमज्ञानं कर्त्राश्रितज्ञानान्निवर्तत इति नियम इति चेन्न। विज्ञानं यज्ञं तनुत इत्यादिना अन्तःकरणस्यैव कर्तृत्वेन सिद्धत्वात्। तस्याज्ञानानाश्रयत्वात्। तदन्यस्य चात्मनः कर्तृत्वानुपपत्तेः। ज्ञानादन्येनाज्ञाननिवृत्तिरिति पक्षं दूषयति—नह्यज्ञानमिति। अवगतिः ब्रह्मानुभवः ब्रह्मैकाकारवृत्ताविचालिचैतन्यप्रतिफलकं तज्जनकं यज्ज्ञानं वृत्तिरूपं तदुत्पत्तिं विनेत्यर्थः। तरति शोकमात्मविदित्यादिश्रुत्या लौकिकप्रसिद्ध्या चाज्ञानस्य ज्ञानैकनिवर्त्यत्वप्रसिद्धेरित्यर्थः॥ २०८॥

फलितं दर्शयति—

अज्ञानात्मकवस्तु नाऽऽश्रयतयाऽज्ञानस्य संभाव्यते
नाज्ञानात्मकताबहिः कृतमिदं जीवत्वमङ्गीकृतम्।

नाज्ञानाश्रयमध्यपाति घटते जीवत्वमेतेन व-
श्चैतन्याश्रयमेतदस्तु घटते तत्रैव हीदं तमः ॥२०६॥

अज्ञानात्मकेत्यादिना सम्भाव्यत इत्यन्तेन। तस्मादिति चादौ वक्तव्यम्। नन्वाविद्यकोपाधिभिन्नस्य जीवस्यान्तःकरणस्य वाऽज्ञानाश्रयत्वाभावेपीश्वरात् स्वाभाविकभेदवतोतिरेकवतो वा जीवस्य तदाश्रयत्वं किन्न स्यादिति चेत्। किमेवं तत्त्वबहिर्मुखो जल्पति। उत तत्त्वविदो वदन्ति। आद्यः सम्पत्स्यते यदि तद्भेदोऽसेत्स्यत् तदेव न तत्र प्रमाणाभावात्। ननु किमिति प्रमाणाभावः निर्दुःखादहं भिन्न इति प्रत्यक्षस्य विद्यमानत्वादिति चेत् किमतः नह्यन्यभेदप्रमाणेनान्यभेदः सिद्ध्यति। ननु नेदमन्यविषयं प्रत्यक्षं किन्त्वात्मविषयमेवेति चेन्न—अहंकारानात्मत्वस्य साधितत्वात्। न च जीवेश्वरौ भिन्नौ विरुद्धधर्माधिकरणत्वात् दहनतुहिनवदिति अनुमानेन तयोर्भेद आशङ्कनीयः वास्तवविरुद्धधर्माधिकरणत्वस्यासिद्धेः कल्पितस्य तस्य बिम्बप्रतिबिम्बयोर्व्यभिचारात्। भेदोपि यदि वास्तवः साध्येत तदा साध्यविकलो दृष्टान्तः भेदवास्तवतायाः सर्वत्र प्रतिषिद्धत्वात्। यदि पुनः कल्पितस्तदा सिद्धसाधनम्। किं च विरुद्धधर्मत्वं यदि परस्पराभावरूपत्वं तदा असिद्धिः सर्वज्ञत्वकिञ्चिज्ज्ञत्वयोस्तदभावात्। यदि परस्पराभावनियतधर्मत्वं तदाप्यसिद्धिः ईश्वरस्य सर्वविभ्रमाधिष्ठानत्वेन किञ्चिज्ज्ञजीवस्याप्यधिष्ठानतया तयोस्तदभात्। यदि पुनर्निवर्त्यनिवर्त्तकत्वं तदा सुतरामसिद्धिरेव। न च द्वा सुपर्णेत्यादिश्रुत्या तद्भेदः सिद्ध्यति। तस्याः प्रत्यक्षसिद्धभेदानुवादेन तन्निषेधपरत्वात्। तस्य पैङ्गिरहस्ये तयोरन्यः पिप्पलं स्वाद्वत्तीति सत्त्वम् अनश्नन्योऽभिचाकशीतीति ज्ञ इति बुद्धिजीवपरत्वेन व्याख्यातत्वाच्च। मृत्योः स मृत्युमाप्नोति या इह नानेव पश्यतीति तस्य निषिद्धत्वाच्च। किं च जीवपरयोर्भेदेऽन्यतरस्यात्मान्यत्वेन घटादिवदनात्मरूपत्वं प्रसज्येत।

ननु घटादेरात्मत्वावच्छिन्नप्रतियोगिकान्यत्वादनात्मत्वम् न हि जीवेश्वरयोस्त्वपरमात्मपरमात्मनोस्तथा किन्तु जीवस्येश्वराश्रितभेदप्रतियोगित्वं जीवत्वाकारेणेश्वरस्य जीवनिष्ठभेदप्रतियोगित्वमीश्वरत्वाकारेणेति चेत् किमिदं जीवेश्वरयोर्जीवत्वमीश्वरत्वं च यदवच्छिन्नप्रतियोगिकभेदवत्त्वेन परस्परभेदेप्युभयोरात्मत्वं न तावज्जीवत्वं जातिः आत्मा द्रव्यत्वापरजातिमान्न भवति विभुत्वात् आकाशवदिति तदभावस्य सिद्धत्वात् व्यञ्जकाभावाच्च । न चानित्यज्ञानाश्रयत्वं तद्व्यञ्जकमिति वाच्यम् । व्यङ्ग्यस्य व्यञ्जकसमानकालीनत्वनियमेन सुषुप्त्यादौ तदभावप्रसङ्गात् । न च तदत्यन्ताभावानधिकरणत्वं तथा तस्य प्रागेव निरस्तत्वात् । अत एव नोपाधिरपि सम्भवति । नापीश्वरत्वं स्थावरजङ्गमात्मकसर्वपदार्थज्ञातृत्वं सर्वमुक्तिदशायामीश्वरस्येश्वरत्वाभावप्रसङ्गात् । तदा सर्वपदार्थाभावेन सर्वज्ञत्वाभावात् । तस्यान्यघटितत्वेन वास्तवत्वानुपपत्तेश्च । तस्माज्जीवपरयोरन्योन्यभेदे आत्मत्वेनैव तत्प्रतियोगित्वस्य वक्तव्यत्वात् । अन्यतरस्यानात्मत्वमेवापतति ततो न स्वाभाविकभेदवान् जीवः नाप्यतिरेकोपाधिकः तत्र प्रमाणाभावात् स ह्यभेदतावन्मात्रविरोधी सन् भेदाभेदप्रयोजक इत्युच्यते। नचैकस्य वस्तुतो भेदाभेदौ सम्भवतः येन तन्निमित्तमतिरेकः कल्प्येत । किं च तस्य वास्तवत्वे तस्य तत्प्रयुक्तजीवभावस्य च मोक्षदशायामप्यनुवृत्तिप्रसङ्गः । कल्पितत्वे चाविद्यातत्कार्ययोरन्यतरत्वापातः तस्माद्वितीयः पक्षः परिशिष्यते । स चानुपपन्नः । तत्त्वदर्शिभिर्वास्तवजीवभेदानङ्गीकारादित्यभिप्रेत्याह— नाज्ञानेति । अज्ञानोपाधिकत्वादज्ञानात्मकत्वं सतो बाहिष्कृतं व्यतिरिक्तं तत्त्वदर्शिभिरज्ञानोपाधिकस्यैव जीवत्वाङ्गीकारात् । स्वाभाविकभेदवत्त्वाङ्गीकारे जीवस्यापसिद्धान्तः स्यादित्यर्थः । फलितमाह— नाज्ञानाश्रयेति । जीवत्वमज्ञानाश्रयमध्यपात्यज्ञानाश्रयकोटिनिविष्टं घटते । परमप्रकृतमुपसंहरति— एतेनेति । उक्तहेतुनेत्यर्थः । एतदज्ञानं चैतन्या-

श्रयमज्ञानमित्यत्र पूर्वोक्तोपपत्तिं स्मारयति—घटत इति । तत्रैवाद्वितीयपरिपूर्णचैतन्य एव तमः सम्भवति यतः अतः अद्वितीयात्माश्रयविषयमेवाज्ञानं न जीवाश्रयमिति सिद्धम् ॥ २०९ ॥

नन्वज्ञानस्याद्वितीयात्माश्रयत्वे तादृशात्मस्फुरणं विना तत्स्फुरणन्न स्यात् । कस्य कुत्राज्ञानमिति तत्स्फुरणस्याश्रयविषयस्फुरणसापेक्षत्वात् । न हि सर्वो लोकस्तादृशमात्मानं प्रत्येति तथा सत्यज्ञानाभावप्रसङ्गादित्युभयतः पाशारज्जुरित्यभिप्रेत्य चोदयति—

ननु चाद्वयाश्रयतमःस्फुरणं
न कथं चिदत्र न हि तत्स्फुरति ।
स्फुरदाश्रयस्य तमसः स्फुरणं
घटते नचाद्वयमिह स्फुरति ॥ २१० ॥

ननु चाद्वयेति । अत्र ब्रह्माश्रयमज्ञानमिति पक्षेऽद्वितीयात्माश्रयविषयतमःस्फुरणं कथं चिदपि न सम्भवतीत्यर्थः । तत्र हेतुमाह—नहीति । हि यतः तदद्वयात्मरूपमद्वयात्मस्फुरणं विनापि तत्स्फुरणं किन्न स्यात् तत्राह—स्फुरदेति । स्फुरन्नाश्रयो यस्येति बहुव्रीहिः । अस्तु तर्ह्यद्वयवस्तुनोपि स्फुरणं तत्राह-नचेति । यद्यद्वयवस्तु स्फुरेत्तदाऽज्ञानन्न स्यादित्यर्थः । तस्मादद्वयब्रह्माश्रयविषयमज्ञानमित्येतदनुपपन्नमित्यर्थः ॥ २०१ ॥

तत्र किमद्वितीयानन्दब्रह्मणोऽद्वितीयत्वाकारेणाज्ञानाश्रयविषयत्वन्निराक्रियते तदाकारस्याप्रतीतेरप्रतीयमानस्य चाज्ञानव्यावर्त्तकत्वायोगादिति । किं वा प्रत्यक्त्वाकारेण । आद्योऽनङ्गीकारपराहत इत्याह—

नाज्ञानमद्वयसमाश्रयमिष्टमेवं
नाद्वैतवस्तुविषयं निशितेक्षणानाम् ।
नाऽऽनन्दनित्यविषयाश्रयमिष्टमेत-
त्प्रत्यक्त्वमात्रविषयाश्रयतानुभूतेः ॥ २११ ॥

नाज्ञानमिति । अद्वयसमाश्रयेऽद्वयत्वाकारेण चैतन्याश्रये एवमन्यत्रापि द्रष्टव्यम् । निशितेक्षणानां सूक्ष्मबुद्धीनामेतदज्ञानमद्वितीयत्वाद्याकारस्यास्फुरणान्न तेनाकारेणाज्ञानाश्रयविषयत्वमित्यर्थः । न द्वितीय इत्याह—प्रत्यक्त्वेति । प्रत्यक्त्वं चैतन्यमज्ञानस्य प्रत्यङ्मात्रविषयाश्रयताया अनुभवसिद्धत्वात् प्रत्यक्त्वाकारेणैवात्मा मोहस्याश्रयो विषयश्च भवति ॥ २११ ॥

नन्वानन्दादेरपि चैतन्यमात्रत्वात् तस्य चानावृतत्वात्कथं तस्याविद्याविषयत्वमित्याशङ्क्य "ज्ञातेपि तावदि" [१।४४] त्यादिप्रथमाध्यायोक्तं स्मारयति—

प्रत्यक्त्वमात्रविषयाश्रयमोहहेतोः
प्रत्यक्तिरोहित इति प्रतिपादयामः ।
प्रत्यञ्चमेव खलु वेद्मि न वेद्मि चेति
प्रत्यक्षमस्ति ननु वेदनमस्य पुंसः ॥ २१२ ॥

प्रत्यक्त्वेति । प्रत्यक्त्वमात्राश्रयविषयमोहाद्धेतोः प्रत्यङ् प्रत्यगात्मा तिरोहितः आवृत इति प्रतिपादयाम इत्यर्थः । अज्ञानस्य प्रत्यङ्मात्रविषयाश्रयत्वानुभवमेव स्पष्टयति—प्रत्यञ्चमिति । अथवा प्रतीयमाने प्रतीचि कथं तद्विषयाज्ञानमित्याशङ्क्य प्रतीयमान एवाज्ञानं वक्तव्यम् । अन्यथा निरूपकाकाराग्रहणे निरूप्याज्ञानस्फुरणा-

नुपपत्तेरित्यभिप्रेत्याह —प्रत्यक्त्वेति । स्वरूपज्ञानस्याज्ञानविरोधित्वात्प्रत्यञ्चं प्रत्यक्त्वाकारं विषयीकृत्य वेद्मि न वेद्मीति च प्रत्यक्षं वेदनमनुभवोस्ति । तथा च प्रत्यक्त्वाकारस्याज्ञानव्यावर्त्तकतया प्रयोजकस्फुरणसंभवात् । मामहं न जानामीत्यज्ञानाश्रयविषयत्वस्य चानुभूयमानत्वात् प्रत्यक्त्वाकारेणैवात्माज्ञानाश्रयो विषयश्चेत्यर्थः ॥ २१२ ॥

ननु प्रत्यक्त्वाकारेणात्मनोऽज्ञानाश्रयत्वेप्यज्ञानविषयत्वमनुपपन्नम् । अज्ञानविषयत्वं ह्यज्ञानावृतत्वं भवति । आवृतत्वं च विपरीतव्यवहारविषयतायोग्यत्वम् । तथा च प्रत्यक्त्वाकारेणात्मनोऽज्ञानविषयत्वे प्रतीचि नाहमस्मीत्यादिविपरीतव्यवहारः स्यात् । न च तथास्ति । किं च प्रत्यक्त्वाकारस्याज्ञानसाक्षितया स्पष्टं प्रतीयमानत्वाच्च तस्याज्ञानावृतत्वविरोधः । ननु प्रतीयमानस्याज्ञानव्यावर्त्तकत्वान्न विरोध इति चेत् सत्यम् । तदा खलु न जानामीत्येव प्रतीयेत नाहमिति स्पष्टम् । न च मामहं न जानामीति प्रतीचोप्यज्ञानविषयत्वप्रतीतेर्न विरोध इति वाच्यम् । इयं हि प्रतीतिः प्रतीचो ब्रह्मत्वाकारेणैवाज्ञानविषयत्वं साधयति न प्रत्यक्त्वाकारेणेत्येव वक्तव्यम् । अन्यथा अहमिति स्पष्टं प्रतीयमाने प्रत्यक्त्वाकारे तद्विषयाज्ञानानुपपत्तेः । न च मामित्युल्लेखानुपपत्तिः । ब्रह्मणोपि प्रत्यग्रूपत्वेन तथोल्लेखोपपत्तेः । नन्वद्वितीयत्वाकारेणाप्यज्ञानविषयत्वमनुपपन्नं तस्याप्रतीयमानत्वादिति चेन्न । अद्वितीयत्वादिलक्षणब्रह्मणः प्रकाशमानप्रत्यगभिन्नत्वेनाप्रतीयमानत्वासिद्धेः । किं च किं त्वमद्वितीयत्वादिलक्षणं ब्रह्म विद्धीति पृष्टः सन् प्रतिविधत्ते नाहं तद्भगवन्वेद्मीति ईश्वरमहं न वेद्मीति च सर्वानुभवो दृश्यते । अतोऽज्ञाततयानुभवसिद्धत्वादप्यद्वितीयब्रह्मणोऽज्ञानविषयत्वं वक्तव्यम् । अन्यथा स्पष्टं प्रकाशमानप्रत्यगभिन्नतयाऽद्वितीयब्रह्मणोपि स्पष्टं स्फुरणप्रसङ्गश्च । श्रुतिरपि कथं नु भगवः स आदेशो भवति । अधीहि भगवो ब्रह्मेत्यादिनाऽद्वितीयत्वादिलक्षणोपदेष्टव्याकारस्य जिज्ञास्यत्वमज्ञान-

विषयत्वं च दर्शयति। किञ्चाज्ञातमेव तत्त्वमादिवाक्यैरुपदिश्यत इति वक्तव्यमन्यथोपदेशवैयर्थ्यात्। प्रत्यक्त्वाकारस्य च स्पष्टं प्रतीयमानत्वान्नोपदेशार्हता आत्मनोऽद्वितीयत्वाद्याकारस्तूपदेशार्ह इति स एवाज्ञानविषयः। किं च यज्ज्ञानात्संसारभ्रमनिवृत्तिः तद्विषयाज्ञानादेव तद्भ्रमो वक्तव्यः। लोके तथैव भ्रमदर्शनात्संसारभ्रमनिवृत्तिश्च प्रत्यगात्मनोऽद्वितीयत्वब्रह्मत्वपरिज्ञानात् न प्रत्यक्त्वमात्रज्ञानात्। अन्यथा सद्योमुक्तिप्रसङ्गात्। तस्मादद्वितीयत्वाद्याकारेणैवात्मनोऽज्ञानविषयत्वं न प्रत्यक्त्वाकारेण। न चाद्वितीयत्वाद्याकारे प्रतीयमानेऽज्ञानानुपपत्तिः। अप्रतीयमाने च तस्मिन् तद्विषयाज्ञानप्रतीत्यनुपपत्तिरित्युभयतः पाशा रज्जुरिति शङ्कयं स्वतोऽज्ञाततया प्रतीयमानेपि वस्तुन्यज्ञानदर्शनादिति पूर्वापरितोषात् सदृष्टान्तं पक्षान्तरमाह—

संवित्परिस्फुरति न स्फुरतीति तस्यां
वैयात्यदूषितधियस्तु विसंवदन्ते।
अज्ञानतस्तदपि तद्वदिहाद्वयत्वं
भादप्यभादिति विमूढधियो वदन्ति॥ २१७॥

संविदिति। तस्यां संविदि वैयात्यं धाष्ट्यं मद इति यावत्। विसंवदन्ते विप्रतिपद्यन्ते तदस्फुरणं विसंवदनं वा भादपि प्रकाशमानमप्यभादिवाप्रकाशमानमिव बिमूढधियः अत्रानावृतधियः लोकेहि संविदि स्वरूपेण प्रकाशमानायामेव स्वप्रकाशत्वादिरूपेण मददूषिताशयानां वादिनां विवादो दृश्यते। न च सोऽज्ञानावृतत्वं विना तस्याः सम्भवति स्पष्टं प्रतीतेर्घटादौ विवादाभावात्। तथा च यथा प्रतीयमानायामेव संविदि विवादान्यथानुपपत्त्या स्वप्रकाशत्वाकारेणाज्ञानविषयत्वमप्युच्यते। एवमद्वयपरिपूर्णपरमानन्दब्रह्मापि स्वयं

प्रकाशप्रत्यगात्माभिन्नतया प्रकाशमानमेव न प्रकाशत इत्यादिविपरीतव्यवहारदर्शनात्तेनाकारेणाज्ञानविषय इति भ्रान्तैः कल्प्यत इत्यर्थः ॥ २१३ ॥

तदेव स्पष्टयति—

अव्युत्पत्तिं बिभ्रती भाति संवि-
त्तद्वद्ब्रह्माप्यद्वितीयस्वरूपम् ।
अव्युत्पत्तिं नाशयद्भाति वेद्यं
तस्मादेतच्चोद्यमस्मासु नास्ति ॥ २१४ ॥

अव्युत्पत्तिमिति । अव्युत्पत्तिं बिभ्रती—अज्ञानविषया सतीत्यर्थः । तद्वत्प्रकाशमानसंविदिवाद्वितीयस्वरूपं ब्रह्माप्यव्युत्पत्तिं बिभ्रत् भातीत्यर्थः । नन्वद्वितीयत्वादिलक्षणब्रह्मप्रकाशेपि तदज्ञानं चेत्कुतस्तर्हि तन्निवृत्तिस्तत्राह—अव्युत्पत्तिं नाशयदिति । वेद्यं तत्त्वमादिवाक्यसमुपजाताखण्डाकारवृत्त्यभिव्यक्तं सदित्यर्थः । यद्यप्यद्वितीयत्वादिलक्षणमपि ब्रह्म प्रकाश एव तथापि न प्रकाशमात्रेणाज्ञाननिवृत्तिः किन्तु वृत्त्यभिव्यक्तस्पष्टप्रकाशेनैव तथा च यदा श्रवणादिना तत्त्वमादिवाक्यादखण्डाद्वितीयाकारा वृत्तिर्भवति । तदा तदभिव्यक्तं सदखण्डाद्वितीयं ब्रह्माज्ञानं नाशयदेव भातीति नोक्तदोष इत्यर्थः । तस्माद्ब्रह्माश्रयाज्ञानपक्षो निर्दुष्ट इत्युपसंहरति—तस्मादिति । एतदद्वितीयेऽप्रतिपन्ने कथं तस्याज्ञानव्यावर्त्तकत्वं प्रतिपन्ने वा कथं तत्राज्ञानमित्येवमादिचोद्यमस्माकं पक्षे नास्ति उक्तप्रकारेण निरस्तत्वादित्यर्थः ॥ २१४ ॥

तदेवमविद्याद्वितीयपरिपूर्णपरमानन्दादिलक्षणं प्रत्यगभिन्नं परमात्मानमेव प्रत्यक्त्वाकारेणाश्रयते अद्वितीयत्वाद्याकारेण

विषयीकरोति । तादृशाविद्यानिमित्त एव जीवभावः । स चैक एव । तस्य यदा तत्त्वज्ञानं तदा संसारः समूलं नश्यति । न च तदा प्रपञ्चोऽमुक्तो वा कश्चिद्भविष्यतीत्युक्तम् । तत्रैकजीववादे विदुषां वामदेवादीनां मुक्तिः अविदुषां च संसार इति बन्धमोक्षव्यवस्था-प्रतिपादकशास्त्रं विरुध्येतेति चोदयति—

नन्वेवं चेद्बन्धमोक्षव्यवस्था
शास्त्रं कुप्येन्नाऽऽप्रबोधात्प्रवृत्तेः ।
बद्धो मुक्तोज्ञानवानज्ञ इत्य-
प्येतत्सर्वं यावदज्ञानमिष्टम् ॥ २१५ ॥

नन्वेवं चेदिति । यद्यज्ञानेनैव जीवभावः स च एक इत्यङ्गीक्रियत इत्यर्थः । यदीदानीमुपलभ्यमानसंसारानुरोधेनेतः पूर्वं कस्याप्य-मुक्तिरुच्यते तदा शुकादिमुक्तिप्रतिपादकशास्त्रं पीड्येत । यदि मुक्ति-शास्त्रप्रामाण्यमङ्गीक्रियते । तदा ससारविषयं शास्त्रं तद्दर्शनं च पीड्येतेत्यर्थः । किमज्ञानदशायां बन्धमोक्षव्यवस्थाप्रतिपादकशास्त्र-स्यानुपपत्तिश्चोद्यते । उत ज्ञानदशायाम्। नान्त्यः । इष्टत्वात्। न प्रथमः । अज्ञानेनैव तदुपपत्तेरित्याह—नाप्रबोधादिति । आप्रबोधात् ब्रह्मात्म-बोधपर्यन्तमित्यर्थः । प्रवृत्तेः शास्त्रस्येति शेषः । बन्धमोक्षविषयशास्त्र-प्रवृत्तिवत् बन्धमोक्षादिरूपार्थव्यवस्थाप्रतीतिरप्यविवेकदशायामेवे-त्याह—बद्ध इति ॥ २१५ ॥

नन्वेवमपि मुक्तिशास्त्राप्रमाण्यं तदवस्थं प्रमेयाभावादित्याशङ्क्य तच्छास्त्रस्य मुक्तिपरत्वाभावात्तदंशेऽप्रमाण्यमिष्टमेति वक्तुं विक-ल्पयति—

किञ्चैतत्किं बन्धमोक्षव्यवस्था-
शास्त्रं यन्नात्तत्परं सत्प्रवृत्तम्।
किंवान्यस्मात्प्राप्तमेवानुभाष्य
तस्या रूपं ब्रह्मतत्त्वं विदध्यात् ॥ २१६ ॥

किञ्चैतदिति। एतत् तद्वैतत् अपश्यदित्यादिव्यवस्थितमुक्त्यादिप्रतिपादकं प्रकरणोल्लङ्घनेनापि शास्त्रं यन्नात् तत्परं मुक्त्यादिपरं प्रवृत्तं किं वा अन्यस्मात्प्राप्तमनादिलोकप्रतीतिप्रसिद्धमुक्त्यादिस्वरूपमनुभाष्यानूद्य प्रकरणेना चैकवाक्यत्वमापद्य तस्या व्यवस्थायाः व्यवस्थितमुक्त्यादेरिति यावत्। रूपं स्वरूपं ब्रह्मतत्त्वं विदध्यात् तात्पर्येण प्रतिपादयेदिति विकल्पार्थः ॥ २१६ ॥

तत्र प्रथमं दूषयति—

शास्त्रं यावत्तत्परं नेष्यते त-
दानर्थक्यात्तत्स्वरूपप्रतीतेः।
ब्रह्मात्मैक्यप्रत्ययेनार्थवत्त्वं
वक्तुं युक्तं तच्च नोऽभीष्टमेव ॥ २१७ ॥

शास्त्रमिति। तदानर्थक्यादित्यत्र तदिति च्छेदः। तच्छास्त्रमिति सम्बन्धः। तद्वामदेवादिमुक्तिपरन्नेष्यते। तत्र हेतुमाह—आनर्थक्यादिति। निष्प्रयोजनत्वादित्यर्थः। तत्स्वरूपप्रतीतेः—वामदेवादिमुक्तिस्वरूपप्रतीतेः। न हि वामदेवादिर्मुक्त इति ज्ञानादध्येतुः कश्चित्पुरुषार्थोऽस्ति। न चापुरुषार्थपरत्वं वेदस्य सम्भवति। अध्ययनविधिव्याकोपप्रसङ्गात्। प्रयोजनस्य तात्पर्यलिङ्गत्वाच्चेत्यर्थः। मुक्तिस्वरूपात्मैक्यप्रतिपादकतत्त्वमादिवाक्यशेषत्वे तु ज्ञानी वामदेवो मुक्त इति

ज्ञानं ज्ञानमात्रेण ब्रह्मात्मैक्यलक्षणमुक्तावाश्वासं सम्पादयत् मुक्त्यनुकूलप्रवृत्तिद्वारा आत्मैक्यधियार्थवद् भवति । अतो द्वितीयपक्ष एव वक्तव्यः । स चास्माकमिष्ट एवेत्याह—ब्रह्मात्मैक्येति । अर्थवत्त्वं शास्त्रस्य तथा च वामदेवादिमुक्तिप्रतिपादकशास्त्रस्यादित्यो यूप इत्यादिवत् गुणार्थवादत्वान्मुक्तिपरत्वाभावात्प्रत्युत ब्रह्मात्मैक्यपरत्वात्तदंशेऽप्रामाण्यमिष्टमेवेति नातत्परमुक्तिशास्त्रपीडा दोषायेत्यर्थः । तस्मादद्वितीयपरिपूर्णब्रह्माभिन्नस्त्वमेव जीवः न त्वदन्यो जीवो मुक्तिभागासीदस्ति भविष्यतीति सिद्धम् ॥ २१७ ॥

एवमाचार्येण जीवैकत्वे प्रतिपादिते स्वानुभविरोधान्न जीवैकत्वमुररीकर्त्तुं शक्यमिति शिष्यश्चोदयति—

नन्वन्यो मद्बन्धमोक्षादिभागी
भूतो भावी वर्तते वा न कश्चित् ।
इत्युक्तार्थं स्वानुभूत्या विरोधा-
न्नाहं जातु प्रोत्सहे संग्रहीतुम् ॥ २१८ ॥

नन्वन्य इति । मत्-मत्तः आदिपदेन सुखदुःखादिकं गृह्यते । भूतः अतीतः भावी भविष्यन् न जातु स्वप्नेपीत्यर्थः । संग्रहीतुं अङ्गीकर्त्तुं यद्यपि स्वप्नदृष्टान्तेन प्रागेवानुभवविरोधः परिहृतः। तथाप्येतस्यार्थस्यापरिपक्काशयानां दुरवगाहतां दर्शयितुं पुनरपि प्रकारान्तरेण परिहर्त्तुं चोद्यमुद्भावितमिति द्रष्टव्यम् ॥ २१८ ॥

विकल्पासहत्वान्न जीवैकत्वे स्वानुभवविरोधगन्धोप्यस्तीति वक्तुं विकल्पयति—

किं द्वैतानुभवो विरोधपदभाक्किं वा परोऽस्मीत्ययं
यद्वा कश्चिदिहापरोऽस्त्यनुभवो यस्ते विरोधावहः ।

नाद्वैतानुभवः क्षतिं वितनुते तस्येति युक्तं वचो
नापि द्वैतमुपोल्लिखन्ननुभवस्तेनास्य बाधो यतः ॥ २१९ ॥

किं द्वैतानुभव इति । त्वमहमयमिति भेदानुभवः विरोधपदभाक् विरुद्ध इत्यर्थः । परः परमात्मास्मीत्ययमनुभवः इह जीवैकत्वे अपरः द्वैताद्वैतविषयः किं जीवैकत्वे ब्रह्माहमस्मीति ब्रह्मैक्यानुभवो विरुद्धः । किं वा त्वमहमयमिति भेदानुभवः किं वाऽन्यो द्वैताद्वैतविषयोनुभवोस्ति योऽस्मिन्विरोधावह इति विकल्पक्रमो द्रष्टव्यः । आद्यं दूषयति—नाद्वैतेति । अद्वैतानुभवः ब्रह्माहमस्मीति ब्रह्मात्मैक्यानुभवः तस्य जीवैकत्वस्य क्षतिमनुपपत्तिं वितनुते करोतीति वचो न युक्तमिति सम्बन्धः । अद्वैतानुभवस्य जीवैकत्वानुकूलत्वात् तस्य तद्विरुद्धत्ववचो न युक्तिमदित्यर्थः । द्वितीयं दूषयति—नापीति । द्वैतमुपोल्लिखन् त्वमहमयमितिभेदं विषयीकुर्वन् अनुभवः तस्य क्षतिन्नवितनुत इत्यनुषङ्गः । तत्र हेतुमाह—तेनेति । तेन जीवैकत्वानुभवेनास्य त्वमयमितिभेदप्रत्ययस्य त्वमहमित्यादिभेदप्रत्ययो हि शरीरावच्छिन्नात्मानमेव विषयीकरोति । स च जीवाभासः न पारमार्थिकजीवः न ह्यपारमार्थिकविषयज्ञानं बाधितुमीष्टे तथा च पारमार्थिकजीवैकत्वप्रत्ययेनापारमार्थिकतद्भेदप्रत्ययस्य चन्द्रैकत्वज्ञानेन तद्भेदज्ञानवत् बाधितत्वान्न तेनापि तद्बाध इत्यर्थः ॥ २१९ ॥

तृतीयमनुवदति—

द्वैताद्वैतनिवेशिनोऽनुभवनाद्बाधोद्भवोऽस्येति चे-
त्तादृङ्नानुभवोऽस्ति कस्यचिदपि स्थानत्रये जीवतः ।
भास्वच्छार्वरगोचरं ह्यनुभवं विभ्रज्जनो दृश्यते
नास्मिन्संसृतिमण्डले स न भवेत्कस्मादयं चेद्भवेत् ॥२२०॥

द्वैतेति । द्वैताद्वैतनिवेशिनः भेदाभेदविषयत्वादेकत्वानेकत्वविषयादित्यर्थः । अनुभवनादनुभवात् । अस्य जीवैकत्वानुभवस्यैतादृशानुभव एव नास्ति विरोधात् बाधकत्वन्तु दूरनिरस्तमित्यभिप्रायेण परिहरति—तादृगिति । जीवभेदाभेदविषय इत्यर्थः । कस्य चिदपि पुरुषस्य स्थानत्रये जाग्रदादिलक्षणे लोकत्रये वा जीवतः वर्त्तमानस्य विरुद्धधर्मद्वयसंसर्गगोचरानुभवाभावे दृष्टान्तमाह—भास्वदिति । भास्वान्सूर्यः शार्वरं तमः तदुभयसंसर्गगोचरं नह्यस्मिन्संसारमण्डले प्रचुरप्रकाशसवितृतमः संसर्गानुभववान् कश्चिदस्ति । तथा च जीवभेदाभेदानुभवे तमः प्रकाशसंसर्गोप्यनुभूयेतेत्यर्थः । ननु नायमस्ति नियमः यदि भेदाभेदविषयप्रत्ययः स्यात्तमः प्रकाशसंसर्गानुभवः स्यादिति न हि नियमेनापाद्यते किन्तु विरुद्धधर्मद्वयसंसर्गविषयानुभवाङ्गीकारे विनिगमकाभावात् तमः प्रकाशसंसर्गोऽपि स्यादित्येवापाद्यत इत्याह—स न भवेदिति । अयमेकस्य भेदाभेदविषयानुभवः भवेच्चेत्स तमः प्रकाशसंसर्गानुभवः कस्मान्न भवेत् भवेदेवेत्यर्थः ॥ २२० ॥

तस्माज्जीवैकत्वाङ्गीकारे कस्याप्यनुभवस्य विरोधाभावादयं पक्ष एवाङ्गीकार्य इत्युपसंहरति—

यत एवमत्र न विरोधलवोऽ-
प्युपढौकते कथितनीतिवशात् ।
उपगृह्यतां मतमिदं सुदृढं
गुरुसम्प्रदायवचनानुगतम् ॥ २२१ ॥

यत एवमिति । एवंशब्दार्थमेव दर्शयति कथितेति । अत्र जीवैकत्वाङ्गीकारे विरोधलवोपि नोपढौकते न प्राप्नोति अतः इदं वक्ष्यमाणं सुदृढं निःसंदिग्धमुपगृह्यतामङ्गीक्रियतामिति सम्बन्धः । न केवलमस्य

युक्तियुक्तत्वं किन्तु सम्प्रदायपरम्पराप्राप्तत्वमपीत्याह—गुर्विति। गुरूपदिष्टवचनप्राप्तमित्यर्थः॥ २२१॥

इदं शब्दार्थमेव दर्शयति—

तव गाढमूढतमसा रचितं
जगदीशजीववपुषा सकलम्।
प्रतिभाति तावदद्दढं दृढव-
त्समुदेति यावदवबोधरविः॥ २२२॥

तवेति। तव स्वप्रकाशचैतन्यस्वरूपस्य गाढं दृढं यथा भवति तथा मूढेन तादात्म्याध्यासप्राप्तेन तमसाऽज्ञानेन स्वप्रकाशचैतन्यस्वरूपत्वदाश्रयविषयत्वात्तादात्म्याध्यासप्राप्तानाद्यविद्ययेत्यर्थः। रचितं कल्पितं जगदीशजीववपुषा जगज्जडप्रपञ्चः जगज्जीवेश्वररूपेण कल्पितमिति सम्बन्धः। सकलं जडचेतनलक्षणसकलविश्वं जीवेश्वरजगद्रूपेण भिन्नं जगदाविद्यकमेव न पारमार्थिकं तथा च जीवभेदप्रतीतिरपि भ्रान्त्यैव वस्तुतस्त्वेक एव जीव इत्युक्तं भवति। ननु प्रतीतिदशायामात्मवत्प्रपञ्चस्यापि सत्त्वावभासनात् कथमाविद्यकत्वं तत्राह—अदृढामिति। अपारमार्थिकमेव पारमार्थिकमिव प्रतीयते शुक्तिरूप्यमिव अतस्तस्याविद्यकत्वं युक्तमित्यर्थः। ननु तत्राधिष्ठानशुक्तिसाक्षात्कारानन्तरं रजतबाधात्पूर्वं पारमार्थिकमिव प्रतीतमप्यपारमार्थिकं भवतु तत् अत्र तु यावज्जीवं सर्वदा सत्त्वेनैव प्रतीयमानत्वात्कथं तस्यासत्त्वमित्याशङ्क्याह—समुदेतीति। यावदखण्डात्मैक्याकारसाक्षात्कारलक्षणसहस्रांशुरुदेति तावदेव तामसं जगद्भाति न तदुत्तरम्। यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येदिति श्रुतेरतस्तस्य सद्विलक्षणत्वं युक्तमित्यर्थः॥ २२२॥

नन्वाश्चर्यमिदं यदसन्नेव प्रपञ्चः सच्चिदानन्दैकरसमविद्यया जीवेश्वरजगद्रूपेण प्रतिभातीति न तदविद्यावत आश्चर्यं तस्या अघटितघटनापटीयस्त्वात् यथाहुः 'अहो नु चित्रं यत्सत्यं ब्रह्म तद्विस्मृतं नृणाम्। यदसत्यमविद्याख्यं तत्पुरःपरिवल्गती"त्यभिप्रेत्याह—

प्रभुरेष सर्वविदहं कृपणो
जगदेतदद्भुतवितानमिति ।
प्रतिपत्तयस्तिमिरलुप्तदृशो
यदिहोद्भवन्ति न तदद्भुतकम् ॥ २२३ ॥

प्रभुरेष इति । एषः यः सर्वज्ञ इत्यादिप्रत्यक्षश्रुतिसिद्धः प्रभुरीश्वरः कृपणो दुःखी अद्भुतवितानं विचित्रनिर्माणं तिमिरलुप्तदृशः अविद्यावृतस्वरूपज्ञानस्य पुंसः प्रभुः सर्वज्ञः अहं कृपणः जगदद्भुतवितानमिति प्रतिपत्तयो भवन्तीति यत्तदद्भुतं किमद्भुतं न भवति अविद्याया दुर्घटघटनास्वभावत्वादित्यर्थः ॥ २२३ ॥

विदुषस्तु प्रपञ्चप्रतीत्यभावादेव नाश्चर्यप्राप्तिरित्याह—

अभयं सनातनमनातुरधी-
रवलोकयन्निजमनन्तसुखम् ।
न मुनिः प्रपश्यति किमप्यसुखं
सकलं जिघत्सति जगत्स्वचिता ॥ २२४ ॥

अभयमिति । संसारदुःखरहितं सनातनमनादिनिधनमनातुरधीः स्वस्थधीः निजस्वरूपभूतं मुनिर्मननादिमान् असुखं दुःखात्मकं वस्तु। ननु श्रवणादिसम्पन्नस्य शुद्धान्तःकरणस्य निर्दुःखनित्यानवच्छिन्ना-

नन्दस्वरूपावलोकनमात्रेण तद्विलक्षणप्रपञ्चदर्शनाभावः कथं न हि घटदर्शनमात्रेण परदर्शनाभाव इत्याशङ्क्य न विद्यमानस्य प्रपञ्चस्यादर्शनं ब्रूमः किन्त्वेतादृशस्वरूपदर्शनस्याधिष्ठानज्ञनत्वेन तेनाध्यस्तप्रपञ्चस्य बाधितत्वादेवेत्याह--सकलमिति । जिघत्सति बाधत इत्यर्थः । स्वचिता स्वस्वरूपसाक्षात्कारेण यतः स्वाकाररूपज्ञानेन सकलं जगद्बाधते ततो जगतोऽभावादेव तन्न पश्यतीत्यर्थः ॥ २२४ ॥

नन्वात्मव्यतिरिक्तस्य सर्वस्याविद्यात्मकत्वे आत्मवस्तुसिद्धिरपि न स्यात् गुर्वादिसाधकाभावात् । न चाविद्यैव तत्साधिका तस्याः विपरीतसिद्धिहेतुत्वात् । न चोभयहेतुत्वं विरोधात् । अतः पारमार्थिकत्वमेव प्रपञ्चस्य वक्तव्यमित्याशङ्क्याविद्यायाः स्वतो विपरीतबुद्धिहेतुत्वेपि स्वकार्यगुर्वादिद्वारा वस्तुसाधकत्वमपि संभवतीति पूर्वोक्तमेवार्थं द्रढयति—

तव चित्तमात्मतमसा जनितं
परिकल्पयत्यखिलमेव जगत् ।
तव कल्पनाविरचितः स गुरु-
स्तव रूपमद्वयमुदाहरति २२५ ॥

तव चित्तमिति । चित्तमन्तःकरणं रूपं स्वरूपमुदाहरति बोधयति ॥ २२५ ॥

नन्वावालवृद्धं सर्वैः परिदृश्यमानस्य प्रपञ्चस्य कथमाविद्यकत्वं दृश्यत्वादेवेत्याह—

न हि चित्तदृश्यमपि सत्यमिति
प्रतिपन्नमस्ति भुवि किंचिदपि ।

रशनाभुजङ्गसदृशं सकलं
जगदिन्द्रजालमिति सिद्धमतः ॥ २२६ ॥

नहीति । सर्वस्यापि चक्षुरादिद्वारा अन्तः करणवृत्तिदृश्यत्वात्तद्वृत्तिरूपत्वाद्वा चित्तं दृश्यमित्युक्तं न हि सत्यस्य दृश्यत्वं सम्भवति ब्रह्मणि दृष्टमिति चेत् न तस्य वाङ्मनसगोचरत्वश्रुतेः कथं तर्हि मनोवृत्तिवेद्यत्वं न ह्येतावता तस्य चेतोदृश्यत्वं चेतोऽधीनप्रकाशवत एव चेतोदृश्यत्वादात्मनश्च स्वतः प्रकाशरूपस्य तदभावात् । तथा च पूर्वार्द्धेन प्रपञ्चस्य सत्यत्वे दृश्यत्वं न स्यादिति विपक्षे बाधकतर्क उक्त इति द्रष्टव्यम् । यद्दृश्यं तदसत्यमिति व्याप्तेरज्जुभुजङ्गादौ दृष्टत्वात् विपक्षे बाधकसत्वाच्च जगन्मिथ्येत्यनुमानं रचयति—रशनेति । रशना रज्जुः इन्द्रजालशब्दो मिथ्यापर्यायः अतः शब्दो दृश्यत्वपरः विमतं मिथ्या दृश्यत्वाद्रज्जुसर्पवत् अन्यथा दृश्यत्वश्च स्यादिति गुर्वादिभेदेन भिन्नस्य जगदिन्द्रजालत्वं सिद्धमित्यर्थः ॥ २२६ ॥

ननु गुरोरपि कल्पितत्वे तस्य कथमुपदेष्टृत्वं किमेवं वदतो विवक्षितं कल्पितस्याप्युपदेष्टृत्वेऽविशेषात् घटादेरप्युपदेष्टृत्वं स्यादित्येतावन्मात्रमुत गुरोरुपदेष्टृत्वे सत्यत्वं वक्तव्यमिति नाद्य इत्याह-

परिकल्पितोऽपि सकलज्ञतया
गुरुरेव पूर्णमवबोधयति ।
परिकल्पितोऽपि मरणाय भवे-
दुरगो यथा न तु नभो मलिनम् ॥ २२७ ॥

परिकल्पितोऽपीति । पूर्णमद्वितीयपरमात्मानं परिकल्पितत्वाविशेषेपि

गुरोः सर्वज्ञत्वेन कल्पितत्वाद्घटादेश्च जडत्वेन कल्पितत्वादवान्तरवैषम्यसम्भवान्न घटादेरुपदेष्टृत्वप्रसङ्ग इत्यर्थः। कल्पितत्वाविशेषेऽप्यवान्तरवैलक्षण्येन कार्यवैचित्र्ये दृष्टान्तमाह—परिकल्पितोपीति । न तु नभो मलिनं मरणाय भवेदित्यनुषङ्गः ॥ २२७ ॥

द्वितीयं दूषयति—

यदि सत्यमित्यवगतिं कुरुते
घटते पदादपि हुताशनधीः ।
यदि चानृतं न जनयेत्प्रमितिं
ननु चोदनापि जनयेन्न धियम् ॥ २२८ ॥

यदीति । यदि गुर्वादिकं सत्यमिति कृत्वाऽवगतिं जनयतीति विवक्षितं तर्हि सत्यत्वाविशेषात् धूमाद्वह्निज्ञानवद्घटादपि वह्निज्ञानं स्यात् । तस्मात्कार्यवैचित्र्ये सत्यत्वासत्यत्वं न प्रयोजकं किन्तु स्वभाववैलक्ष्यण्यमेवेत्यर्थः । किं च किमसत्यस्य बोधजनकत्वं न सम्भवतीति वदन् मीमांसको वैशिषिको वा नाद्य इत्याह—यदि चेति । चोदनाविधिवाक्यं धियं स्वर्गसाधनत्वप्रमितिम् ॥ २२८ ॥

नन्वसत्यस्य बोधजनकत्वाभावे चोदनायाः कथं तदभावः तस्याः सत्यत्वादित्याशङ्क्य तस्या वर्णात्मना सत्यत्वेपि वाक्यात्मना मृषारूपेणैव धीजनकत्वान्नैवं वक्तुं शक्यमित्याह—

जनयत्यसाविह मृषा वपुषा
करणीयवस्तुनि मतिं सुदृढाम् ।
ध्वनिधर्मभेदघटितोऽपि मृषा
स्वरसेन सन्नपि तु वर्णगणः ॥ २२९ ॥

जनयतीति । असौ चोदनामृषावपुषा कल्पितरूपेण करणीय वस्तुनि कृतिसाध्ययागादौ विषये सुदृढामबाधिताम् । ननु स्वरूपेण सत्यभूतायास्तस्याः कथं वा मृषात्वं कथन्तरां मृषारूपेण बोधकत्वमित्याशङ्क्याह—ध्वनिधर्मेति । ध्वनिरवर्णात्मकशब्दस्तस्य धर्मभेदा उदात्तादयः तद्घटितस्तद्विशिष्ट. स्वरसेन स्वभावतः सन् परमार्थः वर्णगणः वर्णसमूहः । यद्यपि चोदना वर्णसमूहात्मिका स्वरूपेण सती तथापि स्वार्थप्रमितिजनकत्वोपयुक्ताकारेण मृषैव सा हि विशिष्टस्वरादिमत्तया ज्ञायमानचोदनाशब्दादेव भवति न तु शब्दमात्रात् स्वरादयश्च ध्वनिधर्मा एव न वर्णधर्माः ततोऽन्यदीयोदात्तादिविशिष्टत्वाकारेणैव तस्या अर्थप्रमितिजनकत्वात् तस्य च मृषात्वात् मृषारूपेणैव बोधकत्वमित्यर्थः ॥ २२६ ॥

उदात्तादिविशिष्टस्यैव शब्दस्य स्वार्थप्रतीतिजनकत्वं न तु तद्रहितस्य केवलस्येत्यत्र प्रमाणमाह—

मन्त्रो हीनः स्वरतो वर्णतो वा
मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति
यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥ २३० ॥

मन्त्रो हीन इति । स्वरतो वर्णतो वा हीनस्तदन्यतररहित इत्यर्थः । तदेवाह—मिथ्येति । उचितस्वरवर्णान्यतरहीनतयोच्चार्यमाणत्वमेव मिथ्याप्रयुक्तत्वं तमर्थं विवक्षितमर्थं न केवलं स्वरादिहीनस्य विवक्षितार्थाप्रतिपादकत्वं किन्त्वनर्थकारित्वमपीत्याह—स इति । वागेव वज्रः यथेन्द्रशत्रुरिति त्वष्टा हीन्द्रनिग्रहसमर्थपुत्रोद्देशेन इन्द्रशत्रुर्वर्द्धस्वेत्यनेन मन्त्रेणाग्नौ जुहवांचकार मन्त्रश्च स्वार्थप्रत्यायक एवेतिस्थितिः । तत्र हि तत्पुरुषस्वरे ऽन्तोदात्ते प्रयोक्तव्ये बहुव्रीहि-

स्वराद्युदात्तप्रयोगादिन्द्रः शत्रुः शातयिता हिंसको यस्योद्देश्यपुत्रस्येत्यर्थलाभेनेन्द्रवध्य एव वृत्रासुरनामा पुत्र उत्पन्न इति प्रसिद्धिः। तथा च केवलशब्दस्यैव विवक्षितार्थप्रमितिजनकत्वे तन्न स्यात् शब्दोच्चारणस्य तत्रापि विद्यमानत्वात्। तस्माद्विशिष्टस्वरविशिष्टस्यैव बोधकत्वमित्यर्थः॥ २३०॥

ननूदात्तादिमतो ध्वनेरेव चोदनात्वमस्तु न वर्णसमूहस्य तथा च नोक्तदोष इत्यत्राह—

न च वर्णपूगमपहाय भवे-
दिह चोदनेत्यभिमतं विदुषाम्।
यदि सत्यमेव गमकं भवति
स्फुटमप्रमाणमियमप्युदिता॥ २३१॥

नचेति। वर्णपूगं वर्णसमूहं न हि वर्णसमूहव्यतिरेकेण चोदना भवेत्। श्रवणात्मकत्वेन वाचकत्वायोगात्। अन्यथा समुद्रघोषादेरपि वाचकत्वप्रसङ्गादित्यर्थः। तथाऽभ्युपगमोऽपि नास्तीत्याह—इत्यभिमतामिति। फलितमाह—यदीति। इयं-चोदना। यदि सत्यस्यैव बोधकत्वमङ्गीक्रियते तर्हि चोदनाया उक्तरीत्याऽसत्यत्वेन बोधकत्वासम्भवादनिच्छतापि त्वयेयमप्रमाणमिति प्रतिपादितं स्यादित्यर्थः॥ २३१॥

एवं मीमांसकमतेऽसत्यस्य वस्तुप्रमितिजनकत्वमित्युदाहरणमुक्त्वा न्यायवैशेषिकमतेपि तदाह—

श्रवणेन्द्रियं च किल कर्णगतं
परिकल्पनोपचरितं नभसः।

बलयं प्रकाशयति शब्दगुणं
परमार्थमित्यपि कणादमतम् ॥ २३२ ॥

श्रवणेन्द्रियमिति । श्रोत्रेन्द्रियं कर्णगतं कर्णशष्कुल्युपहितं परिकल्पितोपचरितं नभसो बलयाकारत्वे उपाधिपरिकल्पितत्वेनोपचरितमेव न मुख्यमित्यर्थः । अपारमार्थिकमिति यावत् । नभसो बलयं बलयाकारं नभ इत्यर्थः । परमार्थमिति । तज्ज्ञानस्य भ्रान्तित्वं नास्तीति सूचितं वैशेषिकैर्हि कर्णशष्कुल्युपाधिबलयितं नभःश्रोत्रमिति श्रोत्रस्याकाशात्मत्वमुच्यते । न च तदाकाशस्य पारमार्थिकं स्वरूपं वस्तुनः स्वरूपद्वयायोगात् तस्यापरिच्छिन्नत्वप्रसङ्गाच्च किन्त्वसत्यमित्येव वक्तव्यम् । तथा चापारमार्थिकस्यापि श्रोत्रस्य पारमार्थिकशब्दबोधजनकत्वमङ्गीक्रियत इति तन्मतेपि सत्यस्यैव बोधकत्वमिति नियमो नास्तीत्यर्थः ॥ २३२ ॥

तस्माद् गुर्वादिप्रपञ्चस्यासत्वेपि संसारनिवर्त्तनक्षमतत्त्वप्रमितिजनकत्वसंभवात् न प्रपञ्चो मायिक इत्यस्मिन्नर्थे विमतिः कार्येत्यभिप्रेत्याह —

त्वमतः स्वमोहरचितं गहनं
भवसागरं तर परावगतेः ।
परिकल्पितद्वयनिबन्धनतः
परमार्थसंविदुदये सति भोः ॥ २३३ ॥

त्वमत इति । असत्यस्य तत्त्वप्रमितिजनकत्वमतः शब्दार्थः गहनं दुस्तरं भवसागरं तर संसारं निवर्त्तयेत्यर्थः । तरणे हेतुमाह— परावगतेरिति । परमात्मसाक्षात्कारादित्यर्थः । तत्सिद्धौ हेतुमाह —

पारेकल्पितेति । कल्पितगुर्वादिद्वैतप्रपञ्चकारणादित्यर्थः परमार्थो ब्रह्मात्मैक्यम् ॥ २३३ ॥

एवं कल्पितस्य तत्त्वावगतिहेतुत्वं प्रतिबन्ध्योक्तम् । इदानीं कैमुतिकन्यायेनापि गुर्वादेस्तत्त्वावगतिहेतुत्वं वक्तुं स्वाभिमतस्य पराभिमताद्विशेषमाह —

भ्रान्तं तथोपचरितं च यथाविभाग-
मङ्गीकृतं कणभुगादिमुनीन्द्रमुख्यैः ।
यन्नास्ति तत्फलनिबन्धनमस्मदीये
तन्त्रे तमोविरचितं न फलाय कस्मात् ॥२३४॥

भ्रान्तमिति । उदात्तादिधर्मविशिष्टवर्णस्वरूपमुपचरितमुक्तरूपं श्रोत्रं यथाविभागं विभागो मतभेदः स्वस्वमतानुसारेणेति यावत् । अयथाविभागमिति पाठेऽपारमार्थिकोदात्तादिस्वरपरिच्छेदादियुक्तं तादृशकर्णशष्कुल्यादिपरिच्छेदयुक्तं चेत्यर्थः । कणभुगादीत्यादिपदेन मीमांसको गृह्यते । नास्ति असत्तुच्छमित्यर्थः । फलनिबन्धनमवबोधरूपफलजनकं यन्नास्ति तत्फलनिबन्धनमितिकणभुगादिमुनीन्द्रमुख्यैर्यथाविभागमङ्गीकृतमिति सम्बन्धः । यच्छब्दार्थस्य प्रदर्शनं भ्रान्तं तथोपचरितं चेति द्रष्टव्यम् । एतदुक्तं भवति मीमांसकादिपक्षो वर्णात्मकशब्दस्याकाशात्मकश्रोत्रस्य च यदिदमुदात्तादिविशिष्टत्वं कर्णशष्कुल्युपाधिबलयितत्वं च तन्न तावत्सद्वर्णात्मकशब्दे उदात्तादेरभावादाकाशे च बलयाभावात् नापि सदसद्विलक्षणमनिर्वचनीयम् तैरनङ्गीकारात्तस्मात्तुच्छापरपर्यायमसदित्येव वक्तव्यं तथा चासत एव प्रमितिजनकत्वेनाभिमतस्य गुर्वादेरनिर्वचनीयत्वमेव न तु तुच्छत्वमिति ततो विशेषं सूचयति—तमोविरचितमिति । अनिर्वचनीयाविद्याविजृम्भितमित्यर्थः गुर्वादीतिशेषः ॥ २३४ ॥

इदानीं कैमुतिकन्यायमेव स्पष्टयति—

असदपि फलवत्तामश्नुते युष्मदिच्छा-
मनुसरदथ कस्मान्मायया निर्मितं सत् ।
न भवति फलवत्ताभाजनं चित्रमेत-
द्वयमिह न समर्था यूयमत्यन्तशक्ताः ॥२३५॥

असदपीति । तुच्छमपि श्रोत्रादिकमित्यर्थः । फलमवबोधः तद्वत्तां तज्जनकत्वमित्यर्थः । युष्मादिच्छामनुसरदित्युपहासः नूनं भवदिच्छा-मात्रेण वन्ध्यापुत्रोपि विचित्रसौभाग्यमनुभवेदित्यर्थः । सत्-असद्विल-क्षणमित्यर्थः । फलवत्ताभाजनं फलवत्त्वभाक् निःस्वभावस्य शशवि-षाणतुल्यस्यापि फलजनकत्वे किमु वक्तव्यम् न्यायसिद्धमनिर्व-चनीयस्य तुच्छविलक्षणस्य तत्त्वम् । तथापि गुर्वादिकं बोधजनकं न भवतीत्येतद्भवतामिति साहसवचनमाश्चर्यमित्यर्थः । तस्माद्धाष्ट्या-देवैवं ब्रूध्वे न तु न्यायतः न्यायस्तु विपरीत एवेत्युपसंहरति— वयमिहेति । इह अतिसाहसोक्तौ ॥ २३५ ॥

एवं गुर्वादेः कल्पितस्याप्यवगतिहेतुत्वेनानुपपत्तिः परैरप्य-ङ्गीकृतत्वादित्युक्तमिदानीं कल्पितस्य न कुत्रापि कारणत्वं किन्तु सर्वत्र ब्रह्मैव कारणमिति स्वसिद्धान्तमाह—

परमेव तत्त्वमगृहीतमभू-
दखिलस्य कारणमनर्थकरम् ।
परमेव तत्त्वमवबुद्धमतः
परितृप्तये भवति पुष्कलत ॥ २३६॥

परमेवेति। तत्त्वं ब्रह्मात्मवस्त्वगृहीतं यथावदनवगतमविद्यावृतं सदित्यर्थः। अखिलस्य जडचेतनप्रपञ्चस्य कारणमत एवानर्थकरमवबुद्धं यथावदहं ब्रह्मेत्यपरोक्षीकृतं सदित्यर्थः। अतः यस्मादगृहीतं सदनर्थकरमतः पुष्कलतः सर्वात्मना परितृप्तये आनन्दावाप्तये परिमितानन्दावाप्तिलक्षणपरमपुरुषार्थायेत्यर्थः। पुष्कलतोऽवबुद्धमित्यपि सम्बन्धनीयम्। एतदुक्तं भवति। द्विविधं हि कारणत्वमेकमनर्थं प्रत्यपरं पुरुषार्थं प्रति तत्रानर्थं प्रति कारणत्वमविद्यायाः तत्रापि तस्याः न स्वतस्तद्धेतुत्वं निःस्वभावत्वात् किन्त्वधिष्ठानब्रह्मावलम्बनेन तदुक्तं प्रत्यक्त्वमात्मविषयाश्रयतावलेनेति। तथा च ब्रह्मैव तत्रापि कारणं नारोपितमविद्यामात्रं पुरुषार्थसाधनत्वमपि साक्षात्परम्पराभेदेन द्विविधमुभयमपि ब्राह्मण एव तत्र साक्षात्साधनत्वमखण्डाकारवृत्यारूढत्वेन परम्परया साधनत्वं तु विद्वत्तया कल्पितगुर्वादिद्वारेण तथा च विद्वत्तया कल्पितदेहद्वारेण ब्रह्मण एवावगतिहेतुत्वाज्ज्ञानिर्वचनीयस्य बोधकत्वासम्भवाशङ्केति। अथवा-भवतु कल्पितस्य प्रतीतिहेतुत्वं तन्न निराकुर्मः कल्पितस्योपदेष्टृत्वमेव तत्कस्य हेतोः। उपदेशो ह्युपदेष्टव्यज्ञानपूर्वकः। न च कल्पितस्य ज्ञानं सम्भवतीत्याशङ्क्य न कल्पितस्य गुरोरुपदेष्टृत्वं ब्रूमः। किन्तु सर्वकारणत्वात्सर्वनियन्तृत्वाच्च गुर्वादिकारणत्वेनान्तर्यामित्वेन चानुस्यूतसर्वज्ञब्रह्मण एवेत्याह—परमेवेति। अस्मिन्पक्षेऽवबुद्धं सर्वज्ञमित्यर्थः। परितृप्तये भवति तत्साधनब्रह्मोपदेशद्वारेति शेषः। एतदुक्तं भवति। ब्रह्मैव हि स्वाश्रितावियायां प्रतिबिम्बितं सत्तेन रूपेण स्वात्मन्यनर्थमारोपयति। बिम्बरूपेण सत्त्वप्रधानमायाप्रतिबिम्बरूपेण वा सर्वज्ञमन्तर्यामितया गुर्वादिप्रपञ्चान्तर्भूतं च सत्स्वाभिन्नस्य प्रतिबिम्बलक्षणजीवस्यानर्थनिवृत्तये तेन रूपेण ब्रह्मात्मोपदेष्टृ भवतीति॥ २३६॥

ननु परतत्त्वानवबोधाच्चेत्संसारः तर्हि कदाचिदपि मम स न विवर्त्तेतान्यस्य ततोन्यात्मतासाक्षात्कारासंभवेन मम परतत्त्वा-

भेदसाक्षात्कारासंभवादित्याशङ्क्य न परतत्त्वं त्वत्तोऽतिरिच्यते । किन्तु त्वमेव तत्त्वमादिश्रुतेः तर्हि किमिति मया तन्नानुभूयते । विषयबर्हिर्मुखचित्तत्वात् । अतो यावद्विषयबहिर्मुखस्थः तावत्तव-त्वत्स्वरूपज्ञानाभावादनर्थपरंपरैव स्यात् । यदा तु विषयान्मनोनिव-र्त्तयेस्तदा तव त्वत्स्वरूपं स्फुरेत् ततः पुरुषार्थो भवेदित्यभिप्रेत्याह—

तव रूपमेव तव दुःखकरं
यदि तन्न पश्यसि बहिर्मुखधीः ।
तव रूपमेव तव तृप्तिकरं
यदि तत्प्रपश्यसि निवर्त्य तमः ॥ २३७ ॥

तव रूपमिति । रूपमनवच्छिन्नानन्दचैतन्यैकरसलक्षणं तत्तादृशं स्वरूपं बहिर्मुखधीरहंकाराद्यनात्मावहितचित्तः निवर्त्यबाह्यविषया-दिति शेषः । मनः अन्तःकरणम् । न चात्मन एवार्थानर्थकरत्वे प्रमाणा-भावः इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिरिति श्रुतेः आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मन इति भगवद्वचनस्य च प्रमाणत्वात् तस्यादात्मस्वरूपस्यैवानवबोधद्वारा सर्वानर्थ-हेतुत्वं बोधद्वारा च पुरुषार्थहेतुत्वमिति सिद्धमिति भावः ॥ २३७ ॥

एवं वर्णितस्य फलमाह—

तव बोधमात्रमुपनेयमत-
स्तव मोहमात्रमपनेयमपि ।
तव बोधमोहजनिहानिकरं
वचनं त्रयीशिरसि तत्त्वमिति ॥ २३८ ॥

तवेति । अत इत्यादौ सम्बन्धनीयम् । बोधमात्रमखण्डाकार-

ज्ञानमात्रमुपनेयं संपाद्यं तत्र हेतुः मोहमात्रमनिर्वचनीयम्। मिथ्याभूताविद्यामात्रमपनेयं निवर्त्यं न तु वस्तुभूतं किञ्चिदित्यर्थः। बोधमोहोपनयापनयसाधनमाह—तवेति। तत्त्वमितिवचनमिति सम्बन्धः। गुरूपदिष्टं तत्त्वमसीति वाक्यमेव साक्षाद्बोधजन्मकरं ज्ञानद्वारामोहहानिकरमित्यर्थः। तथा च तत्त्वमादिना तत्त्वज्ञानमात्रमेव सम्पादनीयन्न तु तस्मिन्नानन्दावाप्त्यादिलक्षणातिशय आधेय इत्यर्थः॥ २३८॥

ननु ज्ञानव्यतिरेकेणात्मन्यतिशयाभावे मुक्तिसंसारयोर्विशेषो न स्यात् अत आनन्दावाप्तिलक्षणातिशय आधेय इत्याशङ्क्यानन्दस्यात्मस्वरूपत्वेन नित्याप्तत्वाद्भ्रान्तिमात्रेणैवानवाप्तत्वप्रतिभासात्तस्य च ज्ञानोत्पत्तिमात्रेण निवृत्तेः नात्मनि कालत्रयेपि कश्चिदतिशयोऽस्तीत्याह—

तव बोधजन्मनि पुरा न पुन-
स्तव कश्चिदप्यतिशयो भवति।
तम एव पूर्वमभवन्न भव-
त्यवबोधजन्मनि ततो न परम्॥ १३९।

तव बोधजन्मनीति। पुनः पश्चात्तत्त्वज्ञानोत्पत्तिसमये ततः पुरासंसारावस्थयां ततः पश्चान्मोक्षावस्थायां च नात्मनि कश्चिदतिशयः तव नित्याप्तैकरसानन्दरूपत्वादित्यर्थः। नन्वानन्दावाप्तिलक्षणातिशयाभावेप्यात्मन्यनर्थः पूर्वमभूदिदानीं तन्निवृत्तिरित्येवंरूपातिशयोऽस्त्येवेत्याशङ्क्यानर्थस्य मोहकार्यतया मोहात्मकत्वेन मोहव्यतिरेकेणाभावात् न तत्सहभावाभावाभ्यामात्मन्यतिशय इत्यभिप्रेत्याह—तम एवेति। पूर्वंतत्त्वबोधात् पूर्वं ततः तमसः परं व्यतिरिक्तं नाभवत् न भवति। न च निवर्त्तत इत्यर्थः॥ २३९॥

तर्हि तमसो भावाभावावेवातिशय इत्याशङ्क्याह—

न तमोऽपि पूर्वमभवन्न भव-
त्यवबोधजन्मनि तमोऽभिभवः।
तम एव केवलमिदं सकलं
न तमो विनाऽत्मनि किमप्यभवत् ॥ १४० ॥

न तमोऽपीति। तमोऽभिभवः तमोनिवृत्तिः तमसोऽसङ्गात्मवस्तुसंस्पर्शित्वासंभवान्नात्मनि तमोप्यस्ति। अत एव न तन्निवृत्तिरपीत्यर्थः। तर्हि कथं पूर्वमात्मन्यनर्थकरतमोभूत् इदानीं तन्निवृत्त्या कृतकृत्यतेति तव रूपमित्यत्रोक्तं तत्राह—तम एवेति। इदं सकलमात्मनि पूर्वं तमोभूदिदानीं तन्निवृत्तमित्येतत्सकलं तम एव मोहमात्रमेव तमो विना मोहमात्रं विना किमपि न वस्तुभूतम्। एतदुक्तं भवति। यद्यप्यनर्थकरं तमोस्ति तथापि तस्य कल्पितत्वेन वास्तवत्वाभावात् वास्तवस्यैवातिशयाधायकत्वात् तादृशस्य चात्मन्यभावात् कल्पितनिवृत्तेश्चाधिष्ठानमात्रत्वात् नात्मनि तमस्तन्निवृत्तिप्रयुक्तातिशयः संभवतीति ॥ २४० ॥

ननु तम एवेदमित्यत्र तमोनिवृत्तेरपि तमस्त्वमुक्तमनुपपन्नमभावस्य प्रतियोग्यात्मत्वानुपपत्तेः आत्मस्वरूपत्वाच्चेत्याशङ्क्याह—

न तमः परिहृत्य लभ्यते
तमसो हानिगता निरूपणा।
इति सा तम इत्युदीरिता
न निवृत्तिस्तमसस्तमोमयी ॥ २४१ ॥

न तम इति। हानिगता हानिविषया तमोनिवृत्तिनिरूपणेत्यर्थः। सा तमोनिवृत्तिस्तमोमयी तम आत्मिका। यद्यप्यात्मस्वरूपैव तमोनिवृत्तिः तथापि सा तमोदशायामेव तत्त्वेन निरूप्यते न तु तमः परिहृत्येति-

तमइत्युक्ता । अथवा तमोलक्षणप्रतियोगिनिरूपणाधीननिरूपणत्वात्तमइत्युक्ता न तु तम आत्मकत्वेनेत्यर्थः ॥ २४१ ॥

तदेवमद्वैतसमन्वयस्य प्रत्यक्षादिविरोधः परिहृतः इदानीं कर्मकाण्डप्रमेयस्य धर्मस्याज्ञातविरोधं परिहरति—

विधयश्च कर्मविषया स्वतमः-
पटलावृत्ते त्वयि बहिर्मनसि ।
कुत एव सम्यगवबोधहते
तमसि प्रवृत्तिरिति सम्भवति ॥ २४२ ॥

विधयश्चेति । यद्यपि धर्मेपि तत्त्वमतिरेवेत्यत्रैतद्विरोधोपि परिहृत एव तथापि कर्मकाण्डप्रमेयस्य धर्मस्याज्ञातत्त्वसंभवात्तत्प्रतिपादकस्य तस्य तात्त्विकप्रामाण्यमित्याशङ्क्य मुख्याज्ञातत्त्वासंभवेन तत्त्वावेदनप्रामाण्याभावात्तेनाद्वैतसमन्वयस्य विरोधो नास्तीत्युक्तम् । इदानीं प्रकारान्तरेण तद्विरोधः परिहियत इति न पौनरुक्त्यम् । कर्मविषयाः कर्मबोधकाः स्वतमःपटलावृते स्वस्य देहादेरविवेकस्तमस्तदेव पटलं तेनावृतेऽविवेकिनीत्यर्थः । बहिर्मनसि क्षुद्रस्वर्गादिफलाभिलाषिणि त्वयि प्रवर्त्तन्त इति शेषः । तमस्यविवेके सम्यगवबोधहते विवेकज्ञानेन निवृत्ते सति इह त्वयि प्रवृत्तिः विधीनामिति शेषः । विधिव्यापारः कुत एव संभवति न कुतोऽपि तत्प्रयोजकाविवेकाद्यभावादित्यर्थः । एतदुक्तं भवति—ब्राह्मणो यजेतेत्यादिविधयो ह्यशुद्धाशयस्य ब्राह्मण्याद्यभिमानिनः स्वर्गाद्यभिलाषिणोऽविवेकदशायां लोकप्रसिद्धकर्त्रादिभेदमादाय कर्म बोधयन्ति । वेदान्तास्तु शुद्धाशयस्य मुमुक्षोर्नित्यानित्यविवेकादिदशायामद्वैतं बोधयन्ति । न च भिन्नाश्रयभिन्नकालप्रमाणद्वयस्य परस्परं प्रतिद्वन्द्वत्वमस्ति । न हि कालभेदेनैकत्र घटतदभावावगाहिप्रमाणद्वयं पुरुषभेदेन शुक्तिर-

जततदभावावगाहिप्रमाणद्वयं च परस्परं स्पर्धते । तथा च काण्डद्वयस्य भिन्नकाले भिन्नाश्रय एव प्रवर्त्तमानत्वान्न विरोध इति ॥ २४२ ॥

ननु विवेकिनोपि ब्रह्मण्याद्यभिमानसत्त्वात् स्वर्गादिकामनया कर्मणि प्रवृत्तिसंभवात् न काण्डद्वयस्य भिन्नकालभिन्नाश्रयप्रवृत्तिः इत्याशङ्क्य विवेकिनः सकृमिकदुर्गन्धश्वमांसवत् परित्यक्तक्षुद्रस्वर्गाद्यभिलाषाभावात्तदभिलाषवत एव कर्मादिविधानान्न तस्य कर्मणि प्रवृत्तिः न वा काण्डद्वयस्य भिन्नकालभिन्नाश्रयत्वाभाव इत्यभिप्रेत्याह—

विदिते पदे भगवतः परमे
परिपुष्कले परमतृप्तिमतः ।
तव तृष्णया विरहितस्य कथं
विधिषु प्रवृत्तिरपवर्गवतः ॥ २४३ ॥

विदित इति । विवेकवतः प्रतिपन्ने पदे स्वरूपे परिपुष्कले पूर्णे परमतृप्तिमतः परमतृप्तिमभिलषतः तृष्णया विरहितस्य कर्मफलराग विहीनस्य तृणीकृतब्रह्मलोकस्येत्यर्थः । अपवर्गवतः अपवर्गसाधनवतः शमादिमतः इत्यर्थः । विधिषु विधीयमानेषु कर्मसु कथं प्रवृत्तिः संभवेदित्यर्थः । तथा च रागिणं प्रत्येव कर्मकाण्डस्य बोधकत्वात् ब्रह्मकाण्डस्य विरक्तं प्रत्येव बोधकत्वान्न परस्परविरोधः । न च वेदस्य पुरुषभेदेन प्रामाण्यमयुक्तं तथा सति सर्वस्यापि वेदस्य सर्वाध्येतृपुरुषार्थपर्यवसायित्वाभावेनाध्ययनविधिव्याकोपप्रसङ्गादिति वाच्यम् । ब्राह्मणाद्यधीतराजसूयादिभागवद्ब्रह्मचर्यावस्थायामग्निहोत्रादिभागवच्च पुरुषभेदेन कालभेदेन प्रामाण्येऽपि नित्याध्ययनादिना फलपरत्वोपपत्तेरित्यर्थः ॥ २४३ ॥

ननु फलरागाभावात् काम्यवाक्यं मैनं प्रति प्रमाणमस्तु

नित्यवाक्यन्तु ब्राह्मण्यादिमात्रनिमित्तकं कथमस्य न प्रमाणं विवेकदशायामपि ब्राह्मण्यादिनिमित्तस्य सत्त्वात्। तथा च कथं भिन्नाश्रयत्वादिना विरोधपरिहार इत्याशङ्क्य एवमपि पशुभार्यादिसाधनानां मिथ्यात्वप्रतिसंधानेन संन्यस्तत्वात् न तस्य तस्मिन् प्रवृत्तिरिति न विरोध इत्यभिप्रेत्य कर्मोपयोगिभाव्यकरणाद्यन्यतमाभावेपि तत्राप्रवृत्तौ दृष्टान्तमाह—

अभिचारकर्मविधयो हि यथा
फलभागबाधमनु बाधयुजः।
करणादिभागनिरुपाख्यतया
विधयस्तथैव परमात्ममतेः॥ २४४॥

अभिचारात। श्येनेनाभिचरन्यजेतेत्यादयः फलभागबाधमनु फलांशस्य बाधं लक्ष्यीकृत्य बाधयुजः बाधभाजः फलबाधेन बाधिता इत्यर्थः। यथा न हिंस्यादिति हिंसानिषेधवाक्यार्थनिश्चयवन्तं पुरुषं प्रति श्येनेनाभिचरन्यजेतेतिवाक्यं प्रमाणं सत् प्रवर्त्तकन्न भवति तत्फलीभूतहिंसाया अभाव्यत्वप्रतीतेः। भाव्याभावे च प्रवृत्त्यनुपपत्तेः। एवं विवेकिनं विरक्तं प्रति नित्यविधिरप्यप्रमाणं प्रवर्त्तकन्न भवति तत्फलीभूतहिंसाया अभाव्यत्वप्रतीतेः भाव्याभावे च प्रवृत्त्यनुपपत्तेः एवंविवेकिनं विरक्तं प्रति नित्यविधिरप्यप्रमाणं प्रवर्त्तकं न भवति पशुभार्यादिसाधनाभावादिति दार्ष्टान्तिकमाह—करणादीति। करणं पश्वादिसाधनमादिपदेन सम्प्रदानादिकं गृह्यते। करणादिभागस्य निरुपाख्यतया अपारमार्थिकत्वेन संन्यस्यत्वात् विधयः नित्यविधयः तथैव बाधयुज इत्यर्थः॥ २४४॥

किं च नित्यविधावपि फलं वक्तव्यमन्यथा तस्य पुरुषार्थपर्यवसायित्वाभावेन प्रामाण्यानुपपत्तेः। न च तत्र प्रमाणाभावः। कर्मणा पितृलोकः यस्यैते चत्वारिंशत्संस्कारा इत्याद्यविशेषश्रुतिस्मृतिसिद्धत्वाद्विध्यनुपपत्तेश्च। विधिर्हि शब्दभावनार्थभावनां निष्पादयति।

सा चांशत्रयमपेक्षमाणा फलभूतमेव भाव्यत्वेनादत्ते । अतादृशस्य तादृत्तत्वायोगात् । तथा च हिंसानिषेधवाक्यार्थनिश्चयवतोऽभिचारकर्मणि भाव्यस्यैकस्याभावेपि तदन्वयद्वाराकरणान्वयाभावात् तदभावे च तद्द्वारकेतिकर्त्तव्यान्वयाभावान्नार्थभावना सिद्धयति । तदभावे च न शब्दभावनालक्षणविधिसिद्धिरिति श्येनादिवाक्यस्याप्रवर्त्तकत्वे किमु वक्तव्यम् । विवेकिनं विरक्तं प्रति भाव्यकरणेतिकर्त्तव्यानां त्रयाणामभावे नित्यविधेरप्रवर्त्तकत्वमित्याशयेनाह—

यदि भाव्यभागविलये न भवे-
त्फलभावना कथमिहोत्सहते ।
करणादिभागविलये भवितुं
विधिरन्तरेण घटते न च ताम् ॥ २४५ ॥

यदि भाव्येति । फलभावनापुरुषप्रयत्नरूपार्थभावना भाव्यभागविलयेऽभिचारकर्मणि फलांशबाधोपि न भवेद्यदि करणादिभागविलये ससाधनकर्मफलस्य संन्यस्तत्वात् करणभाव्येतिकर्त्तव्यबाधे कथमिव भवितुमुत्सहते न कथमपीत्यर्थः । ननु तावता विधेः किमायातं तत्राह—विधिरिति । शब्दभावना तां फलभावनां तस्या अपि भाव्यसाकाङ्क्षत्वादित्यर्थः ॥ २४५ ॥

एवं भावनावाक्यार्थवादिमते कर्मकाण्डस्य विवेकिनं प्रत्यप्रमाणत्वमुक्त्वा नियोगवाक्यार्थवादिमतेपि तदाह—

अधिकारिणं च विषयं च विना
न नियोगबुद्धिरुपपत्तिमती ।
न विना तमस्तदुभयं घटते
विदितात्मनश्च न तमो घटते ॥ २४३ ॥

अधिकारिणामिति । फलस्वामिनं विषयं फलकरणं नियोगो हि स्वर्गादिकामिनो यागे नियोग इति नियोज्यविषयघटित एवावगम्यते । नियोज्यश्च फलस्वाम्येव भवति । विषयश्च फलकरणीभूत एव । तथा च भावनावन्नियोगोऽप्यधिकारिविषयाभावे न संभवतीत्यर्थः । नन्वस्तु तद्द्वयमपीत्याशङ्क्य कारणाभावान्नास्तीत्याह—न विनेति । तमः अविवेकं तदुभयमधिकारो विषयश्च । ननु तमोऽप्यस्तीत्याशङ्क्याह—विदितात्मन इति । विवेकिन इत्यर्थः । विवेकाविवेकयोः परस्परविरुद्धत्वेन विवेकिनो विवेकासम्भवात्तदभावे च फलकामनासम्भावनाधिकारसम्भवः । न तावत्करणलक्षणविषयसम्भवः । तथा च नियोगवादेपि कर्मकाण्डस्य भिन्नकालीनत्वं भिन्नाश्रयत्वं चास्तीत्यर्थः ॥ २४६ ॥

तस्मात्कर्मकाण्डस्याविवेकदशायां प्रवृत्तेर्ब्रह्मकाण्डस्य विवेकदशायां प्रवृत्तेर्न तेनास्य विरोध इत्युपसंहरति—

व्यवहारगोचरमतः सकलं
विधिवाक्यमित्यवगतिं मनसि ।
उपनीय वेदशिरसो विधिभि-
र्न विरोध इत्यपि समाकलय ॥ २४७ ॥

व्यवहारेति । व्यवहारो विवेकपूर्वकव्यवहारः तद्गोचरं तत्कालप्रवृत्तिकमित्यर्थः । उपनीय निधाय विधिभिरपीति सम्बन्धः । यथा प्रत्यक्षादिभिर्विरोधाभावः । एवं विधिभिरपि वेदशिरसो न विरोध इति समाकलयेत्यर्थः । अथवा—कर्मकाण्डस्य विद्याबाधितविद्वदुपेक्षणीयप्रमेयत्वेन न तत्त्वावेदनप्रामाण्यं किन्तु हिंसानिषेधाज्ञानदशायामिवाभिचारकर्मविधेरविद्यादशायामेव प्रामाण्यमतो न तेन कर्मोपयोगिलोकसिद्धकर्त्रादिभेदानुवादिकर्मकाण्डेन तत्त्वावेदकवेदान्तबाध इति धर्मेपीत्युक्तमेवार्थं प्रपञ्चयति—विधयश्चेत्यादिना । अस्मिन् पक्षे तमो-

बोधादिशब्दाः प्रसिद्धार्था एव ग्राह्याः । परितृप्तिरानन्दावाप्तिः अपवर्गोऽविद्यानिवृत्तिरिति भेदः ॥ २४७ ॥

एवमद्वैतसमन्वयस्य प्रत्यक्षादिविरोधं परिहृत्य कपिलस्मृत्यादिविरोधपरिहारं च भाष्येणैव सिद्धवत्कृत्याध्यायार्थमुपसंहरति--

एवं वेदान्तवाक्यैरवगतिपदवीमद्वये नीयमाने
प्रत्यक्तत्वे समस्तद्वयकृतितमसि क्षीयमाणे च सद्यः ।
स्वाराज्यं त्वय्यवाप्ते परमसुखभुजि स्वच्छचैतन्यमात्रे
शेषो मानान्तराणामपि दुरवगमस्तत्र दूरे विरोधः ॥२४८॥

एवमिति । एवमुक्तप्रकारेणाद्वये प्रत्यक्त्वे ब्रह्मात्मैक्ये वेदान्तवाक्यैस्तत्त्वमस्यादिभिरवगतिपदवीन्नीयमाने साक्षात्क्रियमाणे सति सद्यः तदानीमेव समस्तद्वयकृतिसकलप्रपञ्चकारणे तमसि क्षीयमाणे निवृत्ते सति स्वच्छचैतन्यमात्रेऽविद्याविनिर्मुक्तचैतन्यमात्रस्वरूपे त्वयि स्वराज्यमवाप्तेपूर्णानन्दस्वरूपमवाप्तवति सति मानान्तराणां शेषोवशेषः ईषत्सद्भावोपि दुरवगम स्वकारणाविद्यानाशेन नष्टत्वात् तत्र वेदान्तवाक्येषु विरोधो दूरापास्तः । सति धर्मिणि धर्माश्रिन्त्यन्ते इति न्यायात् । तस्माद्व्यावहारिकप्रमाणभूतप्रत्यक्षादिभिस्तत्त्ववेदनवेदान्तविरोधाभावादद्वितीयासङ्गात्मप्रमितिर्निरुपद्रवं सम्भवतीति सिद्धम् ॥ २४८ ॥

इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीमज्जगन्नाथाश्रमश्रीचरण-
चरणपरिचरणप्राप्तविद्यनिखिलविद्वज्जनमनोहरश्रीमन्नृ-
सिंहाश्रमश्रीचरणविरचितायां संक्षेपशारीरक-
व्याख्यायां तत्त्वबोधनीसमाख्यायामविरो-
धाख्यो द्वितीयोऽध्यायः समाप्तः ॥

DATE DUE

Class No._____ **Book No.**_____

Accession No. 1132

This book should be returned to the Library on the date last stamped. A fine of 0.6 nP. will be charged for each day the book is kept over time.